ISBN 978-81-928110-7-9



शास्त्रेषु शब्दार्थसम्बन्धः

अञ्जनदास-विप्लवकोटालौ

# शास्त्रेषु शब्दार्थसम्बन्धः



सम्पादकौ

अञ्जनदास-विप्लवकोटालौ
संस्कृतविभागस्य

रामकृष्णमिशन्विद्यामन्दिरम्
बेलुडमठः, हावडा - ७११२०२

# शास्त्रेषु शब्दार्थसम्बन्धः

# ŚĀSTREṢU SABDĀRTHASAMBANDHAḤ

*Editors:*

Dr. Anjan Das
&
Prof. Biplab Kotal

RAMAKRISHNA MISSION VIDYAMANDIRA
BELUR MATH, HOWRAH - 711 202

**Publishers:**
Swami Shastrajnananda
Principal, Ramakrishna Mission Vidyamandira
Belur Math, Howrah - 711 202
Website: www.vidyamandira.ac.in
Email: vidyamandira@gmail.com
Tel: 033 2654-9181

**Editors:**
Dr. Anjan Das & Prof. Biplab Kotal

**Distributor:**
Sales Counter
Ramakrishna Mission Vidyamandira
Belur Math, Howrah - 711 202

First Edition: 7 February 2017
ISBN 978-81-928110-7-9

Price: Rs. 200.00 only

Cover Design & Type-setting by Niladri Shekhar Chakrabortty

Printed at :
Soumen Traders Syndicate
9/3, K.P. Coomar Street
Bally, Howrah – 711 201
Phone : 2654-3536

# PROGRAM SCHEDULE

Registration: 10.00 am — 10.30 am

| | | | |
|---|---|---|---|
| Vedic Chanting | : | Students | 10.30 am |
| Welcome Address | : | Swami Shastrajnananda<br>Principal,<br>Ramakrishna Mission Vidyamandira | 10.35 am |
| Introductory Remarks | : | Dr. Harekrushna Pattajoshi<br>Dept. of Sanskrit,<br>Ramakrishna Mission Vidyamandira | 10.45 am |
| Keynote Address | : | Dr. Satyabrata Pahari<br>Head, Dept. of Sanskrit,<br>Ramakrishna Mission Vidyamandira | 11.00 am |
| Speaker | : | Prof. Gangadhar Kar<br>Dept. of Philosophy,<br>Jadavpur University<br>Topic: न्यायनये शब्दार्थसम्बन्धः | 11.20 am |
| Interaction | : | | 12.05 pm |
| Speaker | : | Dr. Ananda Sankar Pahari<br>Dept. of Sanskrit,<br>Dantan Bhattar College<br>Topic: वैदिकवाङ्मये शब्दार्थसम्बन्धः | 12.15 pm |
| Interaction | : | | |

## LUNCH: 1.10 PM — 2.00 PM

| | | | |
|---|---|---|---|
| Speaker | : | Prof. Ayan Bhattacharya<br>Head, Dept. of Sanskrit,<br>West Bengal State University<br>Topic: शब्दशास्त्रीय: शब्दार्थसम्बन्धः | 2.05 pm |
| Interaction | : | | 2.50 pm |
| Speaker | : | Dr. Shaikh Sabir Ali<br>Dept. of Sanskrit,<br>West Bengal State University<br>Topic: साहित्यशास्त्रे शब्दार्थसम्बन्धः | 3.00 pm |
| Interaction | : | | 3.45 pm |
| Vote of Thanks | : | Prof. Biplab Kotal<br>Dept. of Sanskrit,<br>Ramakrishna Mission Vidyamandira | 4.00 pm |
| Distribution of Certificates | | | 4.10 pm |

# सम्पादकीयम्

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।

जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।।

सुरसरस्वतीविभागेन फेब्रुयारिमासस्य सप्तमे अहनि शास्त्रेषु शब्दार्थसम्बन्ध इति विषयमाधारीकृत्य एका दिवसव्यापिनी प्रादेशिकसारस्वतसंगोष्ठी आयोजिता। अस्यां संगोष्ठ्यां प्रधानवक्तृत्वेनोपस्थिता आसन् अस्मन्महाविद्यालयस्य प्रधानाध्यापकाः सत्यव्रतपाहाडीमहाभागाः हरेकृष्णपट्टजोशिमहाभागाः, यादवपुरविश्वविद्यालयस्य दर्शनविभागीयाध्यापका गंगाधरकरमहाभागाः, दॉतनभट्टरमहाविद्यालयस्य संस्कृतमहाविभागस्याध्यापकचरा अन्नदाशंकरपाहाडीमहोदयाः, पश्चिमवंगराष्ट्रियविश्वविद्यालयस्य मान्याध्यापका अयनभट्टाचार्यपादाः तथा च तस्यैव विश्वविद्यालयस्याध्यापकपादा अपि च रामकृष्णमिशन्विद्यामन्दिरस्य छात्रचराः शेख-साबिर-आलिमहाभागाः।

एतेषामाचार्याणां भाषणानि संगृह्य **शास्त्रेषु शब्दार्थसम्बन्धः** नामा ग्रन्थः समुपस्थापयावः। अत्र ग्रन्थे वेद-

साहित्य-न्यायदर्शन-व्याकरणादिविषया आचार्यैः सरलया शैल्या सुबोधया भाषया आधुनिकदृष्टिसम्पन्नया च प्रस्तुताः। तैः पूर्वाचार्याणां विचारान् यथायथमुपन्यस्य युक्तिप्रमाणाभ्यां स्वमतपोषणं परमतनिराकरणं च विहितम्। एतेषां नवचिन्तनं ग्रन्थेऽस्मिन् यथायथतया ग्रथितम्।

परिशेषे हि पुस्तकस्यास्य यथायथतया विनिर्माणे यत्ने यथाशक्ति क्रियमाणेऽपि यदि केचन प्रमादा विदुषां दृष्टिपथमागच्छेयुस्तर्हि ते कृपया मर्षणीया इति विनीतं प्रार्थये।

दिनाङ्कः – ०७/०२/२०१७

विनीतयोर्विदुषां वशंवदयोः

अञ्जनदास-विप्लवकोटालयोः

# सूचीपत्रम्


| | | | |
|---|---|---|---|
| १. | अध्यक्षभाषणम् | स्वामी शास्त्रज्ञानन्देन | १ |
| २. | कुञ्चिकाभाषणम् | ड. सत्यव्रतपाहाडिना | ४ |
| ३. | न्यायनये शब्दार्थसम्बन्धः | ड. गङ्गाधरकरेण | ४७ |
| ४. | वैदिकवाङ्मये शब्दार्थसम्बन्धः | ड. अन्नदाशंकरपाहाडिना | ९२ |
| ५. | शब्दशास्त्रीयः शब्दार्थसम्बन्धः | ड. अयनभट्टाचार्येण | १४२ |
| ६. | साहित्यशास्त्रे शब्दार्थसम्बन्धः | ड. शेखसाविर-आलिना | १७२ |
| ७. | शाबरभाष्यभाषितशब्दार्थसम्बन्धतत्त्वविवेकः | सुव्रतगायेनेन | २१५ |

# ॥ अध्यक्षभाषणम् ॥

विद्यामन्दिरस्य पञ्चसप्ततिवर्षपूर्तिमुपलक्ष्य संवत्सरं व्याप्य प्रत्येकैः विभागैः आलोचनसत्रस्यायोजनं कृतम्। तेषु संस्कृतविभागोऽप्यन्यतमः। विभागेनानेनालोचोनसत्रेस्मिन् आलोचनार्थं यो विषयो निर्धारितः स त्वतीव कठिन इत्यहं मन्ये। नैवाहं संस्कृतस्य दर्शनस्य वा छात्रः, परन्तु साहित्यस्य छात्ररूपेण भाषातत्त्वाध्ययनावसरे विषयेणानेन सह मम परिचयो जातो भिन्नरीत्या। वर्तमाने शब्दः अर्थश्चेति दर्शनचर्चायाः साहित्यचर्चायाश्चोपादानम्। भाषादर्शनन्तु पाश्चात्यस्याकर्षणविषयतया परिणतम्, परन्तु आ बहोः कालात् भारतवर्षेऽपि विषयेऽस्मिन् चर्चा प्रारब्धा इत्यस्य प्रमाणं वर्ततेऽस्माकं सर्वविधेषु शास्त्रेषु।

एकः प्रश्नः पुनः पुनः मनस्यायाति यत्- शब्दार्थवाक्येषु कस्तावत् भाषायाः व्यवहारगतैककः? कुतो वा भाषायाः सूत्रपात इति? भाषायाः निर्माणगतैककतया ध्वनिं लभामहे वयम्। ततो निर्मीयते तस्याः एकैकं रूपम्। परन्तु निःसन्दिस्धोऽयं प्रश्नो यत्- मयोच्चारितध्वनिरेव किं भाषैककः? स किं विशिष्टार्थं बोधयति? बोधयेत् चेत् किमर्थम्? अपरोऽप्येकः प्रश्नः समायाति यदेकस्य शब्दस्यार्थो नैव ध्रुवः, अपि तु परिवर्तनशीलः। सर्वासु भाषासु एवं परिवर्तनशीलता समालोक्यते भाषेतिहासपर्यालोचनात्। वस्तुतः गतिशीले शब्दार्थे भाषापि गतिशीला भवति। किञ्च, शब्दार्थस्य जाड्यतायां भाषापि असमृद्धा स्यात्। परन्तु प्रश्नोऽयं यत्- किमर्थं शब्दमध्ये गतिशीलता तथा परिवर्तनशीला प्रकृतिस्तिष्ठति? अपि च शब्दार्थस्य परिवर्तनं प्रत्यस्माकं समाजेतिहाससंस्कृतिराष्ट्रनीतीनां प्रभावो वर्तते न वा

इत्यपरोऽपि विषयश्चिन्तनीयः। शब्दार्थः किं केवलं व्यक्तेरनुभूतेः जातः , न वा सामाजिकपर्यावरणात्, न वा स एव जनयति सामाजिकसांस्कृतिकपर्यावरणम्? ये खलु संज्ञापनविषयकचर्चाशीलाः वैज्ञानिकाः तेषां नये शब्दार्थयोर्मध्ये वर्तमानं तावदस्माकं भाषाविनिमयक्षेत्रम्। परन्तु आश्चर्यजनकमिदं यत्- एक एव शब्दो विविधेषु क्षेत्रेषु एकार्थमवलम्ब्य विविधभावविनिमये समर्थः।

अहं मन्ये यत्- शब्दार्थतत्त्वस्य एतेषु विषयेष्वपि संस्कृतभाषातत्त्वसमालोचकैः आलोचना करणीया वैशद्येन। ग्रन्थेऽस्मिन् येषु विषयेषु आलोचोना जाता, तेषु नवीनत्वं स्थास्यतीति तु सन्देहातीतः। अन्यथा प्राचीनविषयाणां चर्वितचर्वणेन ज्ञानालोकविस्तारसम्भावना निर्वापिता स्यादिति दिक् ॥

----------------------

# कुञ्चिकाभाषणम्

प्रधानाध्यापकसत्यव्रतपाहाडीमहोदयप्रस्तुतम्

शास्ति यत् तच्छास्त्रम् – शास्-धातोः ष्ट्रन्प्रत्ययेन निष्पन्नोऽयं शब्दः। सर्वेषां हितकारकं भवति शास्त्रम्। अतः शास्त्रं सदैवालोच्यम्। आलोचनायां हानोपादानोपेक्षाबुद्धिर्जायते। ततः कार्याकार्यव्यवस्थित्यनुसारेण कर्तव्याकर्तव्यं निर्णीतं भवति। अतः "सर्वेषां लोचनं शास्त्रं यस्य नास्त्यन्ध एव स" इति प्रसिद्धा भणितिः। श्रीमद्भगवद्गीतायां शास्त्रस्य गुरुत्वविषये उक्तं-

**"यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः।**

**न स सिद्धिमवाप्नोति न सुखं न परां गतिम्।।**

**तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।**

**ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि"।।** (गीता-१६/२३-२४)

शास्त्रं कथं पाठ्यमिति पृच्छाया निरसनं न्यायमञ्जर्यामेवं कृतम्। जयन्तभट्टमते दृष्टादृष्टभेदेन पुरुषार्थो द्विविधः, अतस्तस्योपायोऽपि द्विविधः। दृष्टपुरुषार्थे अनुरागे सति दृष्टोपाये प्रवृत्तिर्जायते। यथा भोजनेन क्षुन्निवृत्तिविषये शास्त्रेण नास्ति प्रयोजनम्। परं स्वर्गमोक्षादिरूपे अदृष्टपुरुषार्थे ज्ञानलाभार्थं शास्त्रज्ञानमत्यावश्यकम्। शास्त्रं भवत्यलौकिकतत्त्वज्ञापनार्थमस्माकं दिव्यनेत्रम्। अतः शास्त्रमध्येयम्। तदुक्तम् -

**"अदृष्टे तु स्वर्गापवर्गमात्रे नैसर्गिकमोहान्धतमसविलुप्त-विलुप्तालोचकस्य लोकस्य शास्त्रमेव प्रकाशः। तदेव सकलसदुपायदर्शने दिव्यं चक्षुरस्मदादेः, न योगिनामिव योगसमाधिज-ज्ञानाद्युपायान्तरमपीति, तस्मादस्मदादेः शास्त्रमेवाधिगन्तव्यम् ।"** (न्यायमञ्जरी-१.१)

शास्त्रं यद्यपि असंख्येयं तथापि विद्वांसः शास्त्राणां चतुर्दशसंख्यां निर्णीतवन्तः। ऋक् साम यजुरथर्व इति चत्वारो वेदाः, शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति षड्

वेदाङ्गानि, पुराणं धर्मशास्त्रं न्यायशास्त्रं मीमांसाशास्त्रमिति भेदेन विद्याश्चतुर्दशसंख्यकाः। तदुक्तं जयन्तेन-

**पुराण-न्याय-मीमांसा धर्मशास्त्राङ्गमिश्रिताः।**

**वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश।।** (न्या.म. पृ.-७)

प्रकारान्तरेणोक्तम् -

**अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।**

**पुराणं धर्मशास्त्रञ्च विद्या ह्येताश्चतुर्दश।।** इति।

एतेषु शास्त्रेषु सर्वत्रैव दृश्यते शब्दार्थसम्बन्धः। शब्दार्थयोः सम्मेलनेन प्रकाशितो भवति भावः। भावो यदि यथार्थः स्यात् मानवानां ज्ञानमपि यथार्थं भवति। ज्ञानेन तुल्यं पवित्रं किमपि पृथिव्यां नास्ति। उक्तञ्च गीतायां-

**'न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।'** इति ।

शब्दार्थसम्बन्धव्याख्यायां को नाम शब्द इति भवति महान् प्रश्नः? शब्दतत्त्वं ये बहुभावेनालोचयन्ति ते शाब्दिका इति प्रसिद्धाः। शाब्दिकानामन्यन्नाम वैयाकरणाः। प्राचीने भारते

अष्ट शाब्दिकाः प्रसिद्धा आसन्। तेषु पाणिनिः मुख्यः। अष्टाध्याय्यां शाकल्यः काश्यपः शाकटायनः सेनक आपिशलिः चाक्रवर्मणः स्फोटायनो गालवो भारद्वाजो गार्ग्य इति पाणिनिपूर्वाचार्याणाम्(दशसंख्यकानाम्) उल्लेखो दृश्यते। एतेभ्यः प्रागपि माहेश्वरव्याकरणं, बार्हस्पत्यव्याकरणं च प्रचलितमासीत्। व्याकरणं नाम शब्दशास्त्रम्। शङ्कराचार्यस्य ब्रह्माद्वैतवादो यथा कोविदैः उररीकृतस्तथैव महाशाब्दिकस्य भर्तृहरेः शब्दाद्वैतवादः शब्दब्रह्मवादः स्फोटवादो वा सर्वजनविदितः। स्फोटो नाम वाचकः शब्दः। वैखरीरूपः समस्तो वाग्व्यापारः स्फोटस्यैवाभिव्यञ्जकः। योगरूढोऽयं स्फोटशब्दः। श्रवणेन्द्रियग्राह्यः शब्दो नित्योऽथवा अनित्य इति विषयमवलम्ब्य पण्डितेषु मतानैक्यं प्रकटितम्। शाब्दिकैः शब्दस्य नित्यत्वमङ्गीकृतम्। न्यायदर्शने शब्दश्चतुर्थप्रमाणरूपेण स्वीकृतः- **'प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि'** इति सूत्रेण (न्या.सू.-१.१.३)। तत्र को नाम शब्द इति विषये गौतमेन सूत्रितम्- **'आप्तोपदेशः शब्दः'**(१.१.७)

इति। को नाम आप्त इति पृच्छायाः समाधानं वात्स्यायनेन न्यायभाष्ये एवं कृतम्-

**'आप्तः खलु साक्षात्कृतधर्मा। यथादृष्टस्यार्थस्य चिख्यापयिषया प्रयुक्त उपदेष्टा। साक्षाकरणमर्थस्याप्तिः, तया प्रवर्तत इत्याप्तः। ऋष्यार्यम्लेच्छानां समानं लक्षणम्'** इति। अयं शब्दोऽनित्यः क्षणिकोऽव्याप्यवृत्तिः, आकाशस्य नित्यगुणश्च।

शब्दार्थ इत्यत्र अर्थो नाम विषयः, यद्यपि अर्थशब्देन धनं प्रयोजनं सामर्थ्यमभिधेयविषयश्चेत्यादिकं बोध्यते परं व्याकरणे अर्थो नामाभिधेयः। शब्दप्रयोगेण विषयज्ञानं जायते। तेन लोकयात्रा चलति। शब्दे राजते शक्तिः। अर्थबोधार्थं शक्तिज्ञानमत्यावश्यकम्।

का नाम शक्तिः इति पृच्छा स्वाभाविकी। विषयेऽस्मिन् मुक्तावल्यां विवृतं- शक्तिश्च पदेन सह पदार्थस्य सम्बन्धः। सा चास्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छारूपा।... आधुनिके नाम्नि शक्तिरस्त्येव। नव्यमते ईश्वरेच्छा न शक्तिः किन्तु इच्छैव। आधुनिके सङ्केतेऽपि शक्तिरस्तीति तेषां सिद्धान्तः।

अतः शक्तिग्रहो नाम सङ्केतग्रहः। शक्तिनिश्चये जाते पदात्पदार्थोपस्थितिः स्यात्। कथमिदं सम्भवतीति प्रश्ने भाषापरिच्छेदे भणितं-

**शक्तिग्रहं व्याकरणोपमानकोषाप्तवाक्याद्व्यवहारतश्च।**

**वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः।।** इति।

अतो व्याकरणादुपमानात्कोषादाप्तवाक्याद् वृद्धव्यवहाराद् वाक्यशेषाद् विवरणात् प्रसिद्धपदसान्निध्यात् इति अष्टविधोपायैः शक्तिज्ञानं भवतीति बोध्यम् । (व्याकरणाद् धातुप्रत्ययादिभिः, उपमानात् सादृश्यात्, कोषात् यथा - 'विष्णुर्नारायणः कृष्णो वैकुण्ठो विष्टरश्रवाः' इत्यादिभिः, आप्तवाक्याद् यथा -'कोकिलः पिकपदवाच्यः' इत्यस्माद्, वृद्धव्यवहाराद् यथा – 'घटं नय', 'घटमानय' इत्यादौ घटपदस्यान्वयः, वाक्यशेषाद्यथा – यवपदस्य दीर्घशूकविशेषे आर्याणां प्रयोगः, प्रियङ्गुतण्डुले तु म्लेच्छानाम् , विवरणाद् इत्यनेन तत्समानार्थकपदान्तरेण तदर्थकथनम्, घटोऽस्ति

कलशोऽस्ति वा इत्यनेन घटपदस्य कलशे शक्तिग्रहः। क्वचित्प्रसिद्धपदसान्निध्याद्यथा – इह सहकारतरौ मधुरं पिको रौति इत्यत्र पिकशब्दस्य कोकिले शक्तिग्रहः। शब्दार्थसम्बन्धविषये शक्यार्थज्ञानमत्यावश्यकम्। पदस्य मुख्योऽर्थः शक्यार्थः। पदशक्त्या यस्य धर्मविशिष्टस्य धर्मिणः स्मरणं भवति स एव शक्यपदवाच्यः। शब्दस्य मुख्यार्थेन सह सम्बन्धात् शक्यार्थः प्रतीयते। शक्त्या उपस्थापितः पदार्थः शक्यार्थः। शक्यार्थस्वरूपविषये बहुविधा विप्रतिपत्तिः राजते।

बौद्धमते अपोह एव शक्यार्थः। अपोहो नाम इतरेभ्यो व्यतिरिच्य पदार्थविशेषस्य व्यावृत्तिः। यथा – गौः इत्युक्ते गोभिन्नभिन्नस्य पदार्थविशेषस्य प्रतीतिः। यद्वा, गोभिन्नभिन्नत्वं गोत्वम्। अतोऽन्यापोहो भवति शब्दस्वरूपम्। तत्त्वसंग्रहे शान्तरक्षितेनोक्तं – **भावाच्चाव्यतिरिक्तत्वात् नित्यत्वं संस्कृतेरपि प्राप्नोति, तेन वस्तूनां विज्ञानं सर्वदा भवेत्। व्यतिरेके तु तस्येति सम्बन्धो नोपलभ्यते।** (तत्त्वसंग्रहः, श्लोकः-

२५१४-१५) तत्त्वसंग्रहटीकाकारेण कमलशीलेनापि विषयोऽयं सुविस्तृतमालोचितं परमतखण्डनसहकारेण।

वैयाकरणानां मते शक्यार्थश्चतुर्विधः – जातिः, गुणः, क्रिया, द्रव्यम् इति। यथा – गौः शुक्लः, चलो डित्थः इत्यत्र गौः इत्यत्र गोत्वजातौ शक्तिः, शुक्लः इत्यत्र गुणे शक्तिः ,चलः इत्यत्र क्रियायां शक्तिः, डित्थः इत्यत्र नाम्नि शक्तिः इत्येवं शक्यार्थः चतुर्विधः भवति। अतः चतुष्टयी शब्दानां प्रवृत्तिरिति महाभाष्यकारेण साधूक्तम्। साहित्यदर्पणेऽप्युक्तम् –

**'सङ्केतो गृह्यते जातौ द्रव्यगुणक्रियासु च'** इति।

अतः जातिः, गुणः, क्रिया, द्रव्यं चेति चतुर्विधः भवति शक्यार्थः। आकृतिः अवयवसंस्थानं वा शक्यार्थ इति केचित्। यथा गौः इति पदे उच्चारिते गलकम्बलावयवविशिष्टस्य पदार्थस्य स्मरणं भवति। आकृतिद्वारेणैव अश्वाद् गोर्भेदः सूच्यते । अतः पदोच्चारणेन आकृतेरेव स्मरणं भवतीति आकृतिः भवति पदस्यार्थः।

पदानां व्यक्तौ एव शक्तिरिति केचन लौकिकाः। तत्र कारणं पदे उच्चारिते द्रव्यरूपं व्यक्तिविशेषं व्यतिरिच्य सङ्केतेन जात्यादीनां ग्रहणं न भवति। व्यक्तेरेव अर्थक्रियाकारित्वं फलजनकत्वं वा विद्यते। अर्थक्रियाकारित्वं सत्त्वस्य स्वरूपम्। यथा – दोहन- वाहादिरूपा अर्थक्रिया गोत्वादिधर्मेण सम्पद्यते । यतः व्यक्तिद्वारेण इदं सम्भवति अतः व्यक्तौ एव सङ्केतः शक्तिर्वा ग्राह्या।

मीमांसाकानां मते तु व्यक्तिवृत्तिजातावेव शब्दशक्तिः , अतः जातिरेव शब्दस्य शक्यार्थः। तदुक्तम् –

**जातिव्यक्तिगता नित्या प्रत्यक्षज्ञानगोचरा।**

**भिन्ना भिन्ना च सा व्यक्तेः कुमारिलमते मता।।**

(मानमेयोदयः)

अतो व्यक्तौ शक्तिग्रहः दुष्करो गौरवाद् आनन्त्याद् व्यभिचाराच्च। मीमांसकैरत्र प्रश्नः उत्थाप्यते – गोशब्देन गोव्यक्तेः बोधेन अतीतानागतवर्तमानकालीनानां सर्वेषां गवां प्रत्यक्षमसम्भवम्। व्यक्तिभेदेन शक्तिस्वीकारे आनन्त्यं कल्प्यम्।

एतेन महागौरवदोषः भवति। सकलगोव्यक्तौ सङ्केतग्रहः असम्भवः। सङ्केतं विनैव अर्थस्वीकारे गोशब्देन अश्वादीनामुपस्थितिः दुष्परिहरः। एतेन पदार्थस्मृतौ पदज्ञानं करणमिति नियमः व्यभिचारी स्यात्। अतः न व्यक्तौ, जातौ एव शक्तिग्रहः स्वीकार्यः इति मीमांसाराद्धान्तः। तन्मते जातिविशिष्टव्यक्तौ शक्तिस्वीकारे गौरवापत्तिः। अपि च जातौ एव शक्तिस्वीकारे यदि व्यवहारसिद्धिः स्यात् तर्हि व्यक्तौ शक्तिस्वीकारे किं प्रयोजनम्?

नैयायिका अत्र विप्रतिष्ठन्ते। जातिशक्तिवादखण्डनार्थं विश्वनाथेन मुक्तावल्यां ख्यापितं - "तन्न, शक्तिं विना व्यक्तिभानानुपपत्तेः"इति। मीमांसकैः लक्षणया व्यक्तेः भानं यत् स्वीकुर्वन्ति तदसम्भवं व्यक्तौ शक्तिस्वीकारं विना व्यक्तेः उपस्थितिः कदापि न भवति। अपि च, व्यक्तौ शक्तिस्वीकारे 'गामानय' इत्यादिस्थले अन्वयानुपपत्तिरूपाया हेतोः अभावे लक्षणा निरवकाशा स्यात्। अपि च, आक्षेपलभ्यार्थः न

शाब्दबोधस्य गोचरः (विषयो वा)। अतो व्यक्तौ शक्तिः स्वीकार्या, न जातौ।

परमेतेन व्यभिचारः, अपि च अनन्तशक्तिस्वीकाररूपः गौरवदोषः आपद्येत। तन्न सर्वेषु गोषु एका एव शक्तिः नैयायिकैः स्वीक्रियते। ईश्वरेच्छारूपा शक्तिस्तु एका एव। यद्यपि व्यक्तेः भिन्नत्वमस्ति परं जात्यावच्छिन्नायां व्यक्तौ एकायाः शक्तेः विद्यमानत्वात् न आनन्त्यदोषः। अपि च, मीमांसकमते, जातौ शक्तिग्रहे गोशब्दात् गोत्वप्रकारकं गोपदार्थस्मरणं तथा शाब्दबोधः न जायते। तत्र कारणं – यथा शक्तिग्रहः, तथैव पदार्थस्मरणम्, तथा त शाब्दबोधः भवतीति नियमः स्वाभाविक एव।

पुनश्च, जातिशक्तिवादे गोशब्दस्य गोत्वे शक्तिः स्वीक्रियते। तत्र शक्यतावच्छेदकः भवति गोत्वत्वम्। गोत्वत्वं भवति एवं धर्मः यत् गवेतरप्राणिषु न विद्यते, परं सर्वास्यां गोव्यक्तौ विद्यते गवेतरसमवेतत्वे सति सकल-गो-समवेतत्वं गोत्वमिति। अतः मीमांसकमते सकलगोव्यक्तेः

शक्यतावच्छेदके अन्तर्भावात् गौरवदोषो भवेत्। न्यायमते अनेकव्यक्तौ शक्तिकल्पनात् गौरवः। स एव गौरवः अनेकव्यक्तौ शक्यतावच्छेदकजन्यगौरवात् परित्याज्यः। अतो लाघवात् न्यायमतमेव ग्राह्यमिति सिद्धान्तः।

प्रत्युत, जात्याकृतिविशिष्टव्यक्तिरेव शाब्दबोधे भासते। गोशब्दश्रवणेन गोत्वजातेरथवा गोव्यक्तिमात्रस्य भानं न भवति, परं जात्याकृतिविशिष्टायाः गोव्यक्तेर्बोधो भवति। आकृतिर्नाम अवयवसंस्थानम्। जातिर्भवति संस्थानादि-व्यङ्ग्यानुवृत्तिव्यावृत्तिजनकं गोत्वं घटत्वादि। व्यक्तिर्भवति एकैकं द्रव्यादि, यथा- गौः, घटः इत्यादि। गोशब्दात् सास्नादिसंस्थानव्यङ्ग्यायाः गोत्वविशिष्टाया गोव्यक्तेः प्रतीतिर्भवति। अस्मात् वास्तविकप्रतीतिबलादेव जात्याकृति-विशिष्टायां व्यक्तौ नैयायिकैः शक्तिः स्वीक्रियते। अतः साधूक्तं विश्वनाथेन मुक्तावल्याम् –

**‘शक्तिः जात्याकृतिविशिष्टव्यक्तौ एव विश्राम्यतीति।’**

शब्दस्य वृत्तिविषयकमालोचनमप्यत्यावश्यकम्। वृत्तिपदेन सम्बन्धो बोध्यते। इयं वृत्तिर्द्विधा भिद्यते—शक्तिर्लक्षणा चेति। शक्तितुल्या लक्षणापि शब्दनिरूपिता अर्थस्मारिका सम्बन्धविशेषा। शक्तिरूपेण सम्बन्धज्ञानेन यथा पदार्थस्मरणं भवति तथैव लक्षणयापि। अतः लक्षणावृत्तिः शक्यसम्बन्धरूपा। तदुक्तम्—**'लक्षणा शक्यसम्बन्धस्तात्पर्यानुपपत्तितः'** (भा.प.-८२)। शक्त्या उपस्थापितः अर्थः शक्यार्थः, शक्यो वेति कथ्यते। यथा गङ्गापदस्य शक्यार्थो भवति भगीरथरथखातावच्छिन्नजलप्रवाहः। अतः गङ्गायां घोषः इत्युक्ते भगीरथरथखातावच्छिन्ने जलप्रवाहे घोषपल्ल्या अवस्थानमसम्भवम् इति बोधे अन्वयानुपपत्तिः भवति। ततः जलप्रवाहरूपशक्यार्थस्य सामीप्यात् तटादीनां बोधो जायते। एतेन गङ्गातटवृत्तिः घोष इति शाब्दबोधो जायते।

यद्यत्र प्रश्नो भवेत गङ्गापदस्य शक्त्या एव तीररूपः अर्थः भवतु, तदा जलप्रवाहः अपि च तीर इति अर्थद्वयं स्वीकार्यम्। एतेन गौरवमपि च नानार्थकल्पनं स्यात्। अतः

लाघवात् एका एव लक्षणा स्वीकार्या। पुनश्चात्र वक्तव्यं - शक्यार्थलक्षणार्थयोः सम्बन्धः पञ्चविधः भवितुमर्हति- वाच्यत्वं, सामीप्यम्, आधाराधेयभावः, वैपरीत्यं, कार्यकारणभावश्चेति। यथा द्विरेफपदं भ्रमररूपं लक्ष्यार्थं बोधयति, स्ववाच्य-द्विरेफघटित-भ्रमरपदवाच्यत्वसम्बन्धेन। गङ्गायां घोष इत्यत्र वाच्यार्थलक्ष्यार्थयोः सामीप्यसम्बन्धेन जलप्रवाहतीरयोः बोधो भवति। यष्टीः प्रवेशय इत्यत्र आधाराधेयभावसम्बन्धेन यष्टि-यष्टिधरयोः बोधः। उपकृतं बहु मम इत्यत्र (अपकारिणमुद्दिश्य) उपकारशब्दः वैपरीत्यसम्बन्धसूचकमपकारमर्थं सूचयति। अन्नधनादि-हारिणमुद्दिश्य ‘मम प्राणान् हरसि’ इत्युक्ते कार्यकारणसम्बन्धेन प्राणशब्देन लक्ष्यार्थमन्न धनं बोद्ध्यम्।

भाषापरिच्छेदकारेण विश्वनाथेनोक्तं यत्- लक्षणा शक्यसम्बन्धस्तात्पर्यानुपपत्तितः इति। तन्मते तात्पर्यानुपपत्तिरेव लक्षणाबीजम्। परं तेन गङ्गायां घोष इत्यत्र अन्वयानुपपत्तिर्लक्षणाबीजमित्युक्तम्। अत्रायं प्रश्नः -

विश्वनाथस्य कः सिद्धान्तः? विश्वनाथेन अन्वयानुपपत्तेः दोषप्रदर्शनं कृतम्, अतः तात्पर्यानुपपत्तिरेव लक्षणाबीजमिति सिद्धान्तितम्। विश्वनाथकविराजेन साहित्यदर्पणकारेण, परमलघुमञ्जूषाकारेण नागेशेनापि तात्पर्यानुपपत्तिः लक्षणाबीजमिति स्वीकृतम्। अतः प्राचीनमते अन्वयानुपपत्तिः, नव्यमते च तात्पर्यानुपपत्तिर्लक्षणाबीजमिति बोध्यम्।

अन्वयानुपपत्तेः दोषप्रदर्शनावसरे भाषापरिच्छेद-कृतोक्तं- यदि अन्वयानुपपत्तिः लक्षणाबीजं स्यात् तर्हि गङ्गापदं विहाय घोषपदे अपि लक्षणा स्यात्। यदि घोषपदस्यार्थः मत्स्यः अथवा जलं स्यात्तर्हि अन्वयबोधः स्पष्टतया भवेत्। परमेतेन वक्तुरभिप्रायो विफलो भवेत्। परं यदि यष्टीः प्रवेशय इत्यत्र अन्वयबोधं विनापि लक्षणा स्वीक्रियते, तदा वक्तुरभिप्रेतार्थः दुर्लभः भवेत्। अतः कुत्रापि अन्वयानुपपत्तिः क्वचिच्च तात्पर्यानुपपत्तिरिति इति संशयः

आपद्यते। अतः तात्पर्यानुपपत्तिरेव लक्षणाबीजमिति सिद्धान्तितं विश्वनाथेन।

अत्रापि पृच्छा जायते – वक्तुरिच्छा तात्पर्यम्। अर्थविशेषबोधनेच्छा वक्तृनिष्ठा, परं शाब्दबोधः भवति श्रोतुः, अतः वक्तुः तात्पर्यं श्रोत्रा कथं ज्ञायते? प्रश्नस्यास्य उत्तरं विश्वनाथेन न विवृतम्। परं भर्तृहरिणास्योत्तरमेवं प्रदत्तं- प्रकरणात् तात्पर्यमनुमाय लक्षणावृत्त्या श्रोतुः वाक्यार्थबोधो भवितुमर्हति।

अत्रोल्लेख्यं यत्प्राभाकरैः यद्यपि लक्षणा स्वीकृता तथापि सा न अनुभावकरूपा शाब्दबोधकारणरूपा वा। लक्ष्यार्थः यत् शाब्दबोधे भासते तत्तु शक्यार्थस्य विशेषणं भवति। अतः गङ्गायां घोष इत्यस्य वाक्यस्य शाब्दबोधः एवं भवति- 'गङ्गातीरान्विता घोषपल्ली'। शक्तं घोषपदमेव शाब्दबोधे समर्थम्, न तु लाक्षणिकं गङ्गापदमिति बोध्यम्।

परं विश्वनाथेन लाक्षणिकपदस्यापि अनुभावकत्वं शाब्दबोधजनकत्वं वा स्वीकृतम्। पदार्थोपस्थितिः भवति शाब्दबोधस्य व्यापारः। अस्यां पदार्थोपस्थितौ शक्तिवृत्तिः यथा कारणं तथैव लक्षणावृत्तिरपि। यदि शक्तं पदमनुभावकं भवेत्, कथं न लाक्षणिकं पदम्? अतः गङ्गादिषु लाक्षणिकपदेष्वपि अनुभाविकी शक्तिः स्वीकार्या। भाट्टमीमांसकैः वाक्ये अपि लक्षणा स्वीकृता। परं नैयायिकैः पदलक्षणा न स्वीकृता, वाक्यलक्षणा न्यायमते अनावश्यिकी। अतः आलंकारिकैः शक्तिलक्षणाभ्यां व्यतिरिच्यातिरिक्ता व्यञ्जनावृत्तिः स्वीक्रयते। इयं वृत्तिः गौणी वृत्तिः। नैयायिकैः गौणीवृत्तिः व्यञ्जनावृत्तिश्च न स्वीकृता। न्यायमते गौणीवृत्तिः लक्षणैव, व्यञ्जनावृत्तिः अनुमानमेव।

लक्षणा जहत्स्वार्था अजहत्स्वार्था अपि च जहदजहत्स्वार्थारूपेण त्रिधा भिद्यते। जहच्छब्दार्थः त्यागः, यत्र शक्यार्थं त्यक्त्वा अर्थान्तरः गृह्यते तत्र जहत्स्वार्था लक्षणा

(यथा गङ्गायां घोषः, मञ्चाः क्रोशन्ति)। यत्र स्वार्थमपरित्यज्यार्थान्तरं गृह्यते तत्र अजहत्स्वार्था लक्षणा। यथा काकेभ्यो दधि रक्ष्यताम् इत्यत्र काकरूपमर्थमपरित्यज्य अन्यानपि दधिनाशकान् लक्षयति। एवञ्च यष्टीः प्रवेशय इत्यत्र भोजनकार्यनिर्वाहणार्थसम्बन्धात् तत्सम्बन्धिनि यष्टिधरे लक्षणा।

यत्र शक्यार्थस्य एकदेशपरित्यागेन अपरांशो वाक्यार्थे अन्वेति सा जहदजहत्स्वार्था लक्षणा। यथा सोऽयं देवदत्तः इत्यादौ पूर्वदृष्टस्य देवदत्तस्य अधुना प्रत्यक्षेण प्रत्यभिज्ञा जायते। (अत्र तत्कालवृत्तित्वविशिष्टेन देवदत्तेन सह एतत्कालविशिष्टस्य देवदत्तस्य अभेदान्वयात्विरुद्धयोः तत्कालवृत्तित्वैतत्कालवृत्तित्वयोःपरित्यागेन केवलदेवदत्ते लक्षणा। केवलदेवदत्तोऽपि शक्तिलभ्ययोस्तदेतत्पदयोः अंशविशेष एव। तथा च, किञ्चिदंशस्य परित्यागेन किञ्चिदंशस्यापरित्यागात् जहदजहत्स्वार्था लक्षणा। इयं जहदजहत्स्वार्था लक्षणा लक्षितलक्षणा इति केचित्। अतः इयं

लक्षणा जहत्स्वार्थायामन्तर्भावात् न स्वतन्त्रा। यथा द्विरेफपदे द्विरेफपदशक्यस्य रेफद्वयस्य सम्बन्धो भ्रमरपदे जायते। भ्रमरपदस्य च सम्बन्धः भ्रमरे जायते इति द्विरेफपदे लक्षितलक्षणा। इयं जहत्स्वार्थायामनुभूता। लक्षणाविषये वहुधा विचारो दृश्यते। यथा मीमासका वाक्ये लक्षणां स्वीकुर्वन्ति। नैयायिकास्तन्मतं न सहन्ते वाक्ये शक्तेरभावात्। शक्तिमत्त्वं पदत्वं, लक्षणा न शक्यार्थसम्बन्धरुपा इत्येकं मतम्। परमत्र वहुधा विचारःअस्ति। अत्र केवलं दिग्दर्शनं कृतम्।

शब्दार्थसम्बन्धविषये शाब्दबोधकारणं चालोच्यम्। शाब्दबोधो नाम पदपदार्थयोः अन्वयबोधः। शाब्दबोध-कारणानि षट्संख्यकानि आसत्तिः, योग्यता, आकाङ्क्षा, तात्पर्यज्ञानम्, पदज्ञानं, पदजन्यपदार्थोपस्थितिरिति नैयायिकाः। तत्र पदज्ञानं करणं, पदजन्यपदार्थोपस्थितिः व्यापारः, आसत्त्यादीनि सहकारिकारणानि। यथा 'गामानय क्षेत्रात्-दण्डेन' इत्युदाहरणे आसत्त्यादिसत्त्वात शाब्दबोधः।

परमग्निना सिञ्चति, गौः अश्वः पुरुषः इत्यादौ आसत्तादेरभावात् न शाब्दबोधः।

एवञ्च शब्दार्थसम्बन्धनिर्णये शाब्दबोधविषये वा सावधानता अवलम्बनीया। शाब्दबोधः भवति फलं, तत्र करणं भवति पदज्ञानं, व्यापारः भवति पदार्थस्मरणं, निमित्तकारणं भवति शक्तिज्ञानम्, समवायिकारणमात्मा, असमवायिकारणमात्ममनःसंयोगः इत्येवं बोध्यम् ।

शब्दा नियतमस्माकं कर्णगोचरी भवन्ति। एतेषां शब्दानां विषये दार्शनिकाः बहुभावेन चिन्तिताः, वेदस्तु शब्दराशिमयः, अतः तत्रापि शब्दविषये बहुविधं चिन्तनं राजते। यथा किं वायुः शब्दरूपेण परिणमते?मतान्तरेण शब्दः आकाशगुणः। शब्दः उपादानहीनः नित्यपदार्थः। शब्दः तरङ्गमयः। मतान्तरेण च शब्दः अनित्य इति। एवं दृश्यते शब्दतत्त्वमवलम्ब्य सुप्राचीनकालादेव उद्भूतो वहुविधः मतवादः। अत्र प्रश्नः भवति शब्दः कदा उत्पन्नः? अनादिकालादेव सर्वं

जगच्छब्दमयम्। प्रथमं शब्दद्वयमासीत् ॐकारः अपि च अथ। कथितमस्ति –

**ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा।**
**कण्ठं भित्वा विनिर्यातो तेन माङ्गलिकावुभौ।।**
(ब्रह्मसूत्रशाङ्करभाष्यम्-१/१/१)

देवतासु प्रथम आसीत् ब्रह्मा –

**“ब्रह्मा देवानां प्रथमः संबभूव”।** (मुण्डकोपनिषत्-१)

स एव चतुर्मुखेन ॐकारमपि च अथ इति शब्दद्वयमुच्चारितम्। अतः जगतः आदिशब्दः ॐकारः। ऋग्वेदसंहितायां शब्दस्य अवस्थाचतुष्टयं वर्णितं - परा पश्यन्ती मध्यमा वैखरीति। तथाहि चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः। गुहत्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ।।

(ऋग्वेदः-१०/१४६/१४५)

चतुर्विधासु वाक्षु परां पश्यन्तीमपि च मध्यमां साधारणमनुष्याः न प्रकाशयितुं समर्थाः। **“तुरीयं वाचं मनुष्या वदन्ति”।** तथा चोक्तम्-

> **परावाङ् मूलचक्रस्था पश्यन्ती नाभिसंस्थिता।**
> **हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा।।** इति।

(परमलघुमञ्जूषा, पृष्ठा-२२)

ऋग्वेदस्य वाक्सूक्ते दृश्यते यत् आम्भृणी वाक् आत्मज्ञानं प्राप्य जगति सर्वत्रैव आत्मनः अस्तित्वमनुभवति स्म।

तथाहि –

> **अहमेव वात इव प्रवाम्यारभ्यमाणा भुवनानि विश्वा।**
> **परो दिवा परो एना पृथिव्यैतावती महिना संबभूव।।**

(ऋग्वेद-१०/१२५/१५)

व्यक्ताव्यक्तभेदेन वाक् द्विविधा। व्यक्ता मनुष्याणाम्, अव्यक्ता

मनुष्येतराणाम्। परा पश्यन्ती मध्यमा इति त्रिविधा वाक् अव्यक्ता। चतुर्थी वाक् वैखरी व्यक्तरूपा। सूक्ष्मा सूक्ष्मतरा सूक्ष्मतमा इति भेदेनापि वाक् त्रिधा भिद्यते। परा पश्यन्ती मध्यमा इति तस्या नामान्तराणि। सृष्टेः प्रथमावस्थायामपि वाचः अस्तित्वमासीदिति जैमिनीयब्राह्मणे आम्नातम्। वाचा यज्ञमनुष्ठितम्। तस्मात् यज्ञात् वेदत्रयमुत्पन्नम्। ततः भूः भुवः स्वः इति महाव्याहृति-त्रयमुत्पन्नम्। एवञ्च वाचः माहात्म्यं ब्राह्मणेषु ( काठक-शतपथ-ताण्ड्यादिषु ) प्रकटितम्। साध्वसाधुभेदेनापि वाक् द्विविधा भवति। विषयेऽस्मिन् पतञ्जलिना उक्तम् –

.....ब्राह्मणेन न म्लेच्छितवै नापभाषितवै, म्लेच्छो ह वा एष यदपशब्दः म्लेच्छा मा भूमेत्यध्येयं व्याकरणम्।। (पस्पशा)

अतो ब्राह्मणेन कदापि म्लेच्छभाषाप्रयोगः अपभाषाप्रयोगः वा ना क्रियेत। अपशब्दो नाम अशुद्धः शब्दः, म्लेच्छशब्दो वा। वयं कदापि म्लेच्छा न भवेम। शब्दोच्चारणप्रक्रियापि अर्थववेदे एवमाम्नाता। तथाहि-

**धृति वा ये अनयन् वाचो अग्रं मनसा वा ये वदन्नृतानि।**

**तृतीयेन ब्रह्मणा वावृधानास्तुरीयेनामन्वत नाम धेनोः।।**

मानवो यदा आत्मनः अनुभवं प्रकाशयितुमिच्छति तदा तस्य अन्तरे उच्चारणेच्छा जायते। ततस्तस्या इच्छाया अनुकूलः प्रयत्नः जायते। प्रयत्नेन मूलाधारस्थः प्राणवायुः स्पन्दते। ततो मूलाधारे सूक्ष्मतमा परा वाक् आविर्भवति। ऋग्वेदसंहितायां वाग् देवतारूपेण स्तुता। तथाहि –

**ऋचो अक्षरे परमे व्योमन्**

**यस्मिन् देवा अधि विश्वे निषेदुः।**

**यस्तन् न वेद किमृचा करिष्यति**

**य इत् तद्विदुस्त इमे समासते ।।** (१.१६४.३९)

अन्यत्राप्युक्तं -

**वागेवार्थं पश्यति वाग् ब्रवीति**

**वागेवार्थं निहितं सन्तनोति ।**

**वाच्येव विश्वं बहुरूपं निबद्धं**

**तदेतदेकं प्रविभज्योपभुङ्क्ते ॥**

एकस्मिन् ब्राह्मणेऽपि दृश्यते-

**वागेव विश्वा भुवनानि यज्ञे**

**वाच इत् सर्वममृतं यच्च मर्त्यम् ।**

**अथेतदेवाग् बुभुजे वागुवाच**

**पुरुत्रा वाचो न परं यच्च नाह ॥** इति।

शङ्कराचार्येणापि शारीरकमीमांसाभाष्ये वैदिकशब्दात् देवादिजगत् प्रादुरभवन् इति तत्त्वं स्वीकृतम्—**'अत एव हि वैदिकाच्छब्दाद् देवादिकं जगत् प्रभवति'**(१.३.२८) इति।

वेदशास्त्रं सर्वज्ञानमण्डितम्। तत्र न केवलं शब्दशास्त्रमालोचितम् अपि चात्र काव्यशास्त्रस्याप्यालो-चनमस्ति। ऋग्वेदस्य प्रथममण्डलस्य अग्निसूक्ते दृश्यते वैश्वामित्रेण मधुच्छन्दऋषिणा उपमालङ्कारः प्रयुक्तः- 'स नः

पितेव सूनवेऽग्ने सूपायनो भव’ इति। प्रथममण्डलस्य सूर्यसूक्तेऽपि उपमाप्रयोगः प्रशंसनीय एव -

**‘सूर्यो देवीमुषसं रोचमानां**

**मर्यो न योषामभ्येति पश्चात् ।’** इति (१.११५.२)

अस्मिन् सूक्ते रूपकालङ्कारस्य प्रयोगो दृश्यते **-‘चक्षुर्मित्रस्य वरुणस्याग्नेः’** इति (१.११५.१)। एवञ्च ऋग्वेदे व्यतिरेकालङ्कारो यथा -

**‘द्वादशारं न हि तमुवाय**

**वर्धति चक्रं परि द्यामृतस्य’** (१.१६४.११)।

जीवात्मपरमात्मनोः विषये अतिशयोक्तेरुदाहरणं-

**द्वा सुपर्णा सयुजा सखाया**

**समानं वृक्षं परिषस्वजाते ।**

**तयोरन्यः पिप्पलं स्वाद्वत्त्य-**

**नश्नन्नन्योऽभिचाकशीति** ।। (१.१६४.२०)

अत्र जीवात्मनि परमात्मनि च पक्षित्वस्याध्यवसायः, अपि च देहे वृक्षत्वस्याध्यवसायः। इदम् अतिशयोक्तेः प्रकृष्टमुदाहरणमिति रसगङ्गाधरकारराद्धान्तः। इयं चातिशयोक्तिः वेदेऽपि यथा द्वा सुपर्णा...शीति। एवञ्चातिशयोक्तिः—चत्वारि शृङ्गात्रयोऽस्य पादा...(ऋ.वे. ४.५८.३)इत्यादिमन्त्रे दृश्यते। अत्र देवता ऋषभरूपेण तुलिता। वेदे उत्प्रेक्षालङ्कारप्रयोगः 'सा अपां नपादनभि...' इत्यादिमन्त्रे दृश्यते।

उपनिषद्यपि अलङ्कारप्रयोगः सुलभ एव। यथेशोपनिषदः पञ्चमे मन्त्रे –

**तदेजति तन्नैजति तद्दूरे तद्वन्तिके ।**

**तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः।।**इति। (ईश.-५)

अस्यामुपनिषदि नवमे मन्त्रे अज्ञानमन्धकाररूपेण तुलितम् –

‘अन्धं तमः प्रविशन्ति येऽविद्यामुपासते’ इत्यत्र रूपकालङ्कारः। एवञ्च कठोपनिषदि आत्मानं रथिरूपेण तुलितम् – **“आत्मानं रथिनं विद्धि शरीरं रथमेव तु”**(कठ-३/३)। अत्र रूपकालंकारः। छान्दोग्योपनिषदि च दृश्यते - **"सौम्येकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारं भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्।"** अत्र मृत्तिकाब्रह्मविकारयोर्मध्ये विम्बप्रतिविम्बभावात् दृष्टान्तालंकारः।

न केवलं शब्दालंकारः वेदे प्रयुक्तः, अर्थालंकारोऽपि ऋषिभिः परिज्ञात आसीत्। अनुप्रासयमकयोः प्रयोगविषये उदाहरणमप्यत्र समुपन्यस्यते। तथा च अनुप्रासाः– (‘अनुप्रासः शब्दसाम्यं’)

**रक्षा नो अग्ने तव रक्षणेभी रारक्षाणः(छा. ४/३/१४)**

**अब्जा गोजा खचतजा अद्रिजा खचतम् (४/४०/५)**

**वयमग्ने वनुयाम त्वोता वसूयवो (५/३/६)**

यमकालंकारो यथा –

**दददृचा सनिं यते ददन् मृधामृतायते(५/२७/४)**

**हंसः शुचिषद् वसुरन्तरिक्षसद्धोता वेरदिषदतिथिर्दुरोणसत् (४/४०/५)** (यत्, सत्)

केवलं नालङ्कारशास्त्रं रसशास्त्रं च वेदे प्रविष्टं दृश्यते । यथा – इन्द्रसूक्तस्य मन्त्राः(२/११) वीररसव्यञ्जकाः। पुरुषसूक्तेऽपि अद्भुतरसः सुलभः, यथा –

**सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।**

**स भूमिं विश्वतो वृत्वात्यतिष्ठद् दशाङ्गुलम्।।**

एवं करुणरससञ्चारः अक्षसूक्ते (१०/३४) कितवस्य खेदोक्तिमध्ये सुलभ एव।

आश्चर्यमिदं यत् तदा अलङ्कारशास्त्रं न विरचितं, परमलङ्कारप्रयोगः सुलभः। एवञ्च आदिकविः यद्यपि बाल्मीकिः,परं कविशब्दस्य काव्यशब्दस्य च उल्लेखः दृश्यते। काव्यशब्दस्य प्रयोगो यथा –

**'आ देव्यनामभवः केतुरग्ने**

**मन्त्रो विश्वानि काव्यानि विद्वान् ।'**(ऋ-३/१/१७)।

निघण्टुमध्ये (३/१३) निरुक्ते च उपमायाः भूयशः उल्लेखः दृश्यते। यथा – कर्मोपमा,भूतोपमा,रूपोपमा,सिद्धोपमा,अपि च लुप्तोपमा।

व्याकरणशास्त्रं पदशास्त्रमिति प्रसिद्धम्। अवैयाकरणस्त्वन्धः। अस्मिन् शास्त्रे प्रश्न उत्थापितः( गौरित्यत्र कः शब्दः इति प्रश्ने उत्थापिते) -'कस्तर्हि शब्दः' इति। उत्तरमेवं भवति– **"येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः"।** शब्दो न द्रव्यं, न क्रिया,न गुणः,न च जातिः इत्येवं निषेधमुखेन विचारः कृतः। वैयाकरणैः नादेन ध्वनिना वा अभिव्यङ्ग्यः स्फोट एव शब्द इति स्वीकृतः। यतः ध्वनिना स्फोटः अभिव्यङ्ग्यः भवति अतः ध्वनिर्भवति स्फोटाभिव्यञ्जकः। कण्ठताल्वादिभिः वागिन्द्रियैः प्राणवायुः अभिहतो भूत्वा ध्वनिरूपतां लभते। अतः ध्वनितः स्फोटः

अभिव्यक्तः भवति, न उत्पद्यते। वैखरीनादेन स्फोटः अभिव्यक्तः भवति। परं नागेशभट्टमते "मध्यमानादोऽर्थवाचकस्फोटात्मकशब्दव्यञ्जकः"।

न्यायवैशेषिकमते मीमांसामते च वर्णसमुदायादर्थज्ञानं भवति, परं वैयाकरणा अत्र विप्रतिष्ठन्ते। तन्मते ध्वनितः स्फोटाभिव्यक्तिः भवति। वर्णवादिनां मते यदि वर्णसमुदायादर्थज्ञानं न स्यात् तर्हि ध्वनिसमुदायादपि स्फोटाभिव्यक्तिः असम्भवा। ध्वनिनां क्षणस्थायित्वात् तेषां समुदायः कथं स्यात्? शब्दकौस्तुभकारमते स्फोटः अविद्याकल्पितः पदार्थः। इदं तु न भर्तृहरिमतम्। उल्लिख्यते यत्– स्फोटशब्दः योगरूपः।यत्र यथार्थप्रतीतिर्भवति तत्रैव वैयाकरणाः स्फोटं स्वीकुर्वन्ति। स्फोटः शब्दस्वरूपः, ध्वनिः स्फोटस्याभिव्यञ्जकः। वैयाकरणैः स्फोटस्याष्टविधत्वम् अङ्गीकृतम्। वर्णस्फोटः, पदस्फोटः (सखण्डपदस्फोटः), वाक्यस्फोटः (सखण्डवाक्यस्फोटः), अखण्डपदस्फोटः, अखण्डवाक्यस्फोटः, वर्णजातिस्फोटः, पदजातिस्फोटः,

वाक्यजातिस्फोटश्चेति। स्फोटतत्त्वं यद्यपि भर्तृहरिणा प्रपञ्चितं परमस्य विस्तारः शब्दकौस्तुभे वैयाकरणभूषणसारे लघुमञ्जुषायां स्फोटचन्द्रिकायां शारदतिलके च विहितः। मीमांसकैः वैशेषिकैः वैदिकैः बौद्धैः जैनैः च स्फोटतत्त्वं खण्डितम्। भगवता शङ्कराचार्येण वाचस्पतिमिश्रेण अमलानन्देन च स्फोटतत्त्वमस्वीकृतम्। विषयेऽस्मिन् बहु जल्पितमाचार्यैः, मयात्र केवलं समास आश्रीयते। परं भर्तृहरिमतमत्रोल्लेख्यम्, उपनिषदि यथा ब्रह्मतत्त्वं ख्यापितं तथैव वाक्यपदीयग्रन्थे शब्दब्रह्मतत्त्वं ख्यापितम्। तदुक्तम्-

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**

**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।**(वाक्यप.-१/१)

विषयेऽस्मिन् मैत्रायण्युपनिषदि कथितमस्ति-

**द्वे ब्रह्मे वेदितव्ये शब्दब्रह्म परं च यत्।**

**शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति।।**

स्फोटात्मको नित्यशब्द एव शब्दब्रह्मरूपेण कथितः। अयं मतवादः शब्दविवर्तवाद इति कथितः। यथा शङ्करस्याद्वैतवादः तथैव व्याकरणशास्त्रे शब्दाद्वैतवादः सुप्रसिद्धः। परब्रह्म यथा एकम् अद्वितीयम् अनादिनिधनं तथैव शब्दोऽपि इति बोध्यम्। परं भर्तृहरेः शब्दब्रह्म उपनिषदनुसारेण अपरब्रह्मरूपेण प्रकाशितम्। अस्यामपरब्रह्मविद्यायां निष्णातः मानवः परब्रह्मस्वरूपं जानाति। शारदातिलकेऽप्युक्तं- **"शब्दब्रह्मेति तं प्राहुः सर्वागमविशारदाः"**(१/११)। गीतायामप्युक्तम्- **"ओमित्येकाक्षरं ब्रह्म"** इति। सगुणब्रह्म एव शब्दब्रह्म इति राद्धान्तः।

शब्दस्य नित्यानित्यविषये बहुधा विप्रतिपत्तिरस्ति। शब्दो गुणः। आकाशः ब्रह्मण उत्पन्नः, अतः अनित्यः। अनित्यस्य आकाशस्य गुणत्वात् शब्दोऽपि अनित्यः। मनुसंहितायाः प्रथमाध्यायेऽपि मतमिदं समर्थितम्। तथाहि-

**ताभ्यां स शकलाभ्यां दिवं भूमिं च निर्ममे।**

**मध्ये व्योमो दिशश्चाष्टावपां स्थानञ्च शाश्वतम्।।**

एवञ्च पुराणे (विष्णु १/२/१३), महाभारते (महा, अश्वमेधिक,२२) च शब्दस्य अनित्यत्वं घोषितम्। न्यायदर्शने, वैशेषिकदर्शने सांख्यदर्शने(५/४५), वेदान्तदर्शने(१/३/२९), योगदर्शने, बौद्धदर्शने जैनदर्शने च शब्दानित्यत्वं स्वीकृतम्।

परं शाब्दिकाः शब्दनित्यत्ववादिनः। पाणिनिसम्प्रदाये शब्दनित्यत्वमुररीकृतम्। "तदशिष्यं संज्ञाप्रमाणत्वात्" इति सूत्रं, "सिद्धे शब्दार्थसम्बन्धे" इति वार्तिकम्, "नित्येषु शब्देषु कूटस्थैः" इति महाभाष्यवाक्यञ्चात्र प्रमाणम्। उदुम्बरायणेन यास्केन चायं विषयः बहुधा विचारितः। भर्तृहरिमते अनित्यता त्रिविधा- संसर्गानित्यता, विपरिणामानित्यता, वस्तुविनाश्यानित्यता। एतेषां विपर्ययेण नित्यता भवति। शब्दे त्रिविधा अनित्यता नास्ति अतः शब्दो नित्यः।

शब्दार्थनिरूपणविषये बहुधा मतभेदो दृश्यते। भर्तृहरिमते शब्दश्रवणात्परं यस्यार्थस्य बोधो भवति, तस्य शब्दस्य स एव अर्थः। तथाहि-

**यस्मिंस्तूच्चारिते शब्दे यदा योऽर्थः प्रतीयते।**

**तमाहुरर्थं तस्यैव नान्यदर्थस्य लक्षणम्।।** (२/३/२९)

अतः शब्दश्रवणादनन्तरं श्रोतुः प्रतीतिविशेष एव शब्दार्थः। जयन्तभट्टेनापि मतमिदं समर्थितम्-

**अयमस्य पदस्यार्थ इति केचित् स तेन वा।**

**योऽर्थः प्रतीयते यस्मात् स तस्यार्थ इति स्मृतम्।।**

परमत्रावधेयं वाक्यपदीयकारमतम्। तन्मते-

**वाक्यात् प्रकरणादर्थादौचित्याद्देशकालतः।**

**शब्दार्थाः प्रविभज्यन्ते न रूपादेव केवलात्।।** (२/३/१४)

पुनश्च भर्तृहरिणा अर्थनिश्चयार्थं चतुर्दशहेतूनामुल्लेखः कृतः। ते च – संयोगः, विप्रयोगः, साहचर्यम्, विरोधिता, अर्थः, प्रकरणम्, लिङ्गम्, अन्यशब्दसन्निधिः, सामर्थ्यं, योग्यता (औचित्यं), देशः, कालः, व्यक्तिः, अपि च उदात्तादिस्वरप्रयोगः (वाक्यपदीयम् २/३/१५-१६)। महाभाष्यकारेण “अथ

गौरित्यत्र कः शब्दः” इत्यस्य विचारकाले शब्दो न द्रव्यं, न गुणः, न जातिः, न क्रिया अथवा अतिरिक्तं किमपि इतिभावेन गौरिति शब्दस्यार्थः विचारितः। शब्दस्वरूपं शब्दार्थमध्ये निहितमस्ति। एतेन अन्तरशब्दं स्फोटं वाचकरूपेण अपि च बौद्धार्थं वाच्यत्वेन गृहीतम्। बुद्धिकल्पितः अभिधेयार्थ एव शब्दार्थः। प्रत्युत, शब्दशक्तिः अर्थशक्तिश्च पुरुषभेदेन कालभेदेन अवस्थाभेदेन च भिन्नत्वमर्हति। अतः जातिपक्षस्वीकारेण शब्दार्थयोः नित्यता स्वीक्रियते। भर्तृहरिमते त्रिमुनेः मतमिदं यत् शब्दार्थसम्बन्धो नित्यः। तथाहि-

**नित्याः शब्दार्थसम्बन्धाः समाम्नाता महर्षिभिः।**

**सूत्राणां सानुतन्त्राणां भाष्याणाञ्च प्रणेतृभिः ।।** इति (१.२३)

अतः शब्दानुबिद्धोऽर्थ एव ज्ञानस्य विषयः, शब्दानुबिद्धत्वमेव शब्दतादात्म्यापन्नत्वम्, शब्दार्थस्य तादात्म्यं शक्तिग्राहकं भवेदिति नागेशेन विचारितम्।

शास्त्रेषु शब्दार्थनिरूपणमन्तहीनम्। वैयाकरणाः पदनिरूपणपटवः, नैयायिकाः प्रमाणनिरूपणकुशलाः,

मीमांसका वाक्यनिरूपणनिपुणा इत्येवं भवन्ति प्रसिद्धाः सम्प्रदायाः। एकस्मिन् सम्प्रदाये आचार्यभेदेन युक्तितैक्ष्ण्येन च विचारभेदात् मतभेदः प्रकटित एव। यथा बौद्धार्थवादिनं शाब्दिकं प्रति नैयायिकानामयमाक्षेपः- १. शब्दार्थः कदापि बौद्धो न भवति बौद्धार्थानामप्रामाणिकत्वात्। २. घटोऽस्ति घटो नास्ति इत्यादिप्रयोगोपपत्त्यर्थं बौद्धार्थस्वीकारः आवश्यकः इत्येवं कथनमपि अयुक्तम्। घटोऽस्तीत्यादिप्रयोगस्थले बाह्यसत्ताविशिष्टो घटो घटपदस्य नार्थः, परं घटत्वविशिष्टो घट एव घटपदस्यार्थः। अतः घटपदेन अस्तित्वस्य अबोधितसत्ताया वा बोधार्थम् 'अस्ति'पदप्रयोगः यथार्थ एव। एवञ्चानुयोगिकभूतलादिपदाभावात् केवलं घटो नास्तीति वाक्यात् यथार्थतया शाब्दबोधाभावात् भूतले घटो नास्तीति प्रयोगः समीचीन एव। अत्र भूतलवाचकपदोत्तरसप्तमीविभक्त्यर्थः निरूपितत्वम्, 'अस्'धातोरर्थः आधेयत्वम्। अतः 'भूतलनिरूपिताधेयत्वा-

भाववान् घटः’ इत्येवं शाब्दबोधः सुलभ एव, अतः एतादृशं वाक्यं न बौद्धार्थसाधम्।

एवञ्च, ‘शशशृङ्गं नास्ति’, ‘अङ्कुरो जायते’ इत्यादिवाक्यजन्यस्य शाब्दबोधस्य अन्यथानुपपत्त्या बौद्धार्थः सिद्ध्यति इति शाब्दिकमतमपि असङ्गतम्। तत्र कारणं ‘शशशृङ्गं नास्ति’ इति वाक्यस्यार्थः शशे शृङ्गाभाव, अपि च, ‘अङ्कुरो जायते’ इत्यादिवाक्यात् अङ्कुरः उत्पत्तेराश्रय इत्येवं बोधो जायते। यद्यपि शाब्दबोधस्य विषयः अङ्कुरः शाब्दबोधकाले नास्ति, तथापि बोधस्यानुपपत्तिर्न भवति। यतः प्रत्यक्षं प्रति विषयस्य करणता स्वीक्रियते, न तु शाब्दबोधं प्रति। अतीतानागतविषयकं परोक्षज्ञानञ्च उत्पद्यते, अतः ज्ञानमात्रं प्रति विषयस्य कारणता न स्वीक्रियते।

एवञ्च ‘नलः’, ‘रावणः’ प्रभृतिपदघटितेभ्यो वाक्येभ्यश्च शाब्दबोधार्थं बौद्धार्थस्वीकारः अनावश्यकः। नल इति पदस्थले लक्षणा स्वीक्रियते, अतः नलपदबोध्यः कश्चित् राजा इत्येवं

शाब्दबोधो निर्बाध एव। अतः बौद्धार्थस्वीकारः निरवकाश एव। अतः जातिविशिष्टव्यक्तिरेवात्र पदस्यार्थः। अतः साधूक्तं न्यायसूत्रकारेण - 'जात्याकृतिव्यक्तयस्तु पदार्थः' इति (न्या.सू.-२/२/६३)। यथा गोपदेन गोत्वजातेः गोरवयवसंस्थानरूपाया आकृतेः अपि च गोव्यक्तेः स्मरणं निर्बाधमेव। जात्याकृतिव्यक्तय इति त्रयाणां सम्मेलनेनैव सापेक्षतया पदार्थः। अत्र गोपदेन भासमाना गोत्वजातिः, गोराकृतिः, गोव्यक्तिश्च विशेषणरूपेण प्रकाशिता भवति। अतः गोत्वजातिः गोराकृतिश्च गोव्यक्तेः विशेषणतया पदार्थः, अपि च गोव्यक्तिः विशेष्यरूपेण पदार्थः। अत्र गोव्यक्तिः गोपदवाच्या, गोत्वधर्मो गोपदवाच्यतावच्छेदकः। गोः आकृतेः भिन्नत्वात् तस्याः स्वीकारे गौरवदोषः। अतो लाघवात् गोपदस्य वाच्यतावच्छेदके एव स्वीकारः।

अत्रोल्लेख्यं यत् गौतमेन पदार्थविषये सूत्रितम्-'व्यक्ताकृतिजातयस्तु पदार्थः' इति (२.२.६३)। ततस्तेन व्यक्तिविषयकं सूत्रं रचितम्—'व्यक्तिर्गुणविशेषाश्रयो मूर्तिः'

इति (२.२.६६)। ततश्चाकृतिविषयकं सूत्रम्– 'आकृतिर्जातिलिङ्गाख्या' इति (२.२.६७)। ततो जातिविषयकं सूत्रं -- 'समानप्रसवात्मिका जातिः' इति (२.२.६८)। आकृतिर्नामावयवसंस्थानम्। परं न्यायकौस्तुभकारेण 'जात्याकृतिव्यक्तयः' इत्यत्र त्रिषु पदेषु एका शक्तिः स्वीकृता। जातिविशिष्टायां व्यक्तौ शक्तिरस्तीत्यभिप्रायेण नव्यनैयायिका 'जात्याकृतिव्यक्तयः पदार्था' इति न्यायसूत्रं विपरीतक्रमेण विन्यस्य 'जात्याकृतिव्यक्तयः पदार्थः' इत्याकारेण व्यवहृतम्।

शब्दार्थसम्बन्धविचारे एकः प्रश्नः समुदेति – विभिन्नैः पदैः उपस्थितानां भिन्नानां पदार्थानां पारस्परिकसम्बन्धरूपः वाक्यार्थः कथमुपस्थितः भवति? विषयेऽस्मिन् मीमांसायां मतत्रयं प्रचलितम्– अन्विताभिधानवादः, अभिहितान्वयवादः, अनन्विताभिधानवादो वा। अयमन्विताभिधानवादः अन्वितप्रतिपत्तिवादः संसर्गमर्य्यादावादो वेति प्रसिद्धः।

कुमारिलस्य अभिहितान्वयवादः, प्रभाकरस्य शालिकनाथस्य श्रीकरस्य भवनाथस्य च अन्विताभिधानवादः समुल्लेख्यः।

अत्रेदं स्मरणीयं यत् व्यासशिष्यस्य जैमिनेः मीमांसादर्शनस्य सूत्रमेकमवलम्ब्य व्याख्यानभेदेनैव अभिहितान्वयवादः अन्विताभिधानवाद इति वादद्वयं प्रतिष्ठितम्। तथाहि सूत्रं– **"तद्भूवतानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वात्"** (जै.सू. १/१/२५) इति। तत्र सूत्रे वाक्यार्थप्रतीत्यर्थं पदार्थः करणं भवतीति स्पष्टतयोक्तम्। शबरस्वामिनापि व्याख्यातं यत्- वाक्यघटकानि पदानि स्वस्यार्थमभिधाय निवृत्तव्यापाराणि भवन्ति ("पदानि हि स्वमर्थमभिधाय निवृत्तव्यापाराणि। अथेदानीं पदार्थाः अवगताः सन्तः वाक्यार्थं गमयन्ति") इति। कुमारिलेन शाबरभाष्यान्तर्गतं गमयन्ति इति पदं लक्षयन्तीत्यर्थे गृहीत्वा अभिहितान्वयवादपरतया व्याख्यातम्। प्रभाकरेणात्र अन्विताभिधानपरतया व्याख्यातमिति द्वयोर्भेदः।

अभिहितान्वयवादिभिः व्याख्यातं यत्- अभिहितेषु पदार्थेषु केवलमेकं विशेष्यम् अन्यानि पदानि अस्य विशेषणानि सन्तः ज्ञानस्य विषया भवन्तीति बोध्यम्। अन्विताभिधानवादिभिः व्याख्यातं यत्- विभक्त्यन्तस्य प्रत्येकस्य पदस्य इतरपदार्थान्विते स्वार्थे शक्तिरस्तीति बोध्यम्। एतेषां मते पदेन अनुपस्थितः पदार्थः शाब्दबोधस्य न विषयो भवति अपि च पदवृत्त्या इतरपदार्थान्वयः ( शाब्दबोधो वा) जायते।

अन्विताभिधानवादः पुनर्द्विविधः योग्येतरान्वित-स्वार्थाभिधानवादः, कार्यान्वितस्वार्थाभिधानवाद इति। इतरान्वितस्वार्थाभिधानवाद इति वेदान्तिनां मतम्। कार्यान्वितस्वार्थाभिधानवादः प्राभाकरमतम्। नैयायिकाः अन्वितप्रतिपत्तिवादस्य संसर्गमर्यादावादस्य वा समर्थकाः। अतः पदपदार्थयोः सम्बन्धज्ञानं व्याख्यानभेदेन विचित्रम्। यथा पृथिव्यां सर्वे पदार्थाः साक्षाद्भावेन परम्परया वा परस्परं सम्बद्धा एवञ्च एकेन शास्त्रेण सह अन्यस्य शास्त्रस्य सम्बन्धः व्याख्यानवैचित्र्येणैव भिन्नत्वमर्हति। सर्वाणि हि शास्त्राणि

शब्दार्थसम्बद्धानि, अतः गदाधरमतमत्र स्मर्यते- **“शाब्दबोधे चैकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते। स च क्वचिदभेदः क्वचिच्च तदतिरिक्त एवाधाराधेय-प्रतियोग्यनुयोगिविषयविषयिभावादिः”** इति शम्।

--------------------

# न्यायनये शब्दार्थसम्बन्धाः

इत्याख्यः प्रबन्धः अध्यापकश्रीगङ्गाधरकरन्यायाचार्यप्रस्तुतः

प्रमाणविवेचनप्रसङ्गे महामतिगौतमेनोक्तं **प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि** इति। प्रमाणेषु शब्दस्य महत्त्वमत्यधिकम्।सर्वे अपि लौकिकाः परीक्षकाश्च शब्देनैव व्यवहारं प्रवर्तयन्ति, बुभुत्सितान् श्रोतृपुरुषानवगतमर्थं बोधयितुमिच्छन्तो वाक्यमुच्चारयन्ति, प्रतिपत्तुमिष्टञ्च प्रमेयं पृच्छन्ति बोद्धारः। एवम्प्रकारेण शब्दः लोकयात्रां निर्वहति। अतः शब्दः सर्वार्थप्रकाशकः ज्योतिःस्वरूपः। उक्तञ्च दण्डिना

**इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्।**

**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्येत॥** इति।

हरिरप्याह - **अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम्** इति। यद्भवतु शब्दः एवास्माकं चक्षुः। पदरूपस्य वाक्यरूपस्य च शब्दस्य प्रामाण्यविषये पृथक्प्रामाण्यविषये च विस्तरं

मतपार्थक्यमस्ति। तत्र चार्वाकाः प्रत्यक्षमेकमेव प्रमाणमिति वदन्तः शब्दस्य प्रामाण्यं नाङ्गीकुर्वन्ति। तेषां मते केचन शब्दा अप्रमाणभूता अपि दृश्यन्ते इति तत्साधर्म्येण सर्वे शब्दा अप्रमाणम् इति। तथा च **विमतः शब्दः अप्रमाणं शब्दत्वात् अप्रमाणत्वेन संप्रतिपन्नशब्दवत्** इत्यनुमानमेव फलितम्। चार्वाकाणामेतादृशमनुमानं प्रत्यक्षातिरिक्तस्यानुमानस्य शब्दस्य च प्रामाण्यानङ्गीकारे न घटते। शब्दस्याप्रामाण्यसाधकं यदनुमानं तस्याप्रामाण्ये शब्दस्य प्रामाण्यमेव स्थिरीकृतं भवति। अनुमानस्य प्रामाण्ये तु अनुमानप्रामाण्यमेव स्थिरीकृतं भवति । अतः **प्रत्यक्षमेकमेव प्रमाणम्** इत्यादिवचनं व्यर्थमेव भवति। एवं **शब्दः अप्रमाणमि**त्यादिप्रयोगः अप्रामाण्यसंशयवन्तम् अप्रामाण्यविपर्ययवन्तं प्रति संघटितो भवति। अपरपुरुषगतौ संशयविपर्ययौ प्रत्यक्षगोचरौ न भवतः। अतोऽनुमानेन अथवा शब्देन पुरुषान्तरीयसंशयविपर्ययौ ज्ञात्वा तन्निरासाय पुरुषान्तरं प्रति शब्दाप्रामाण्यसाधकानुमानस्य प्रयोगः कार्यः इति शब्दानुमानयोः प्रामाण्यमवर्जनीयम्। एवं **प्रत्यक्षातिरिक्तं**

**न प्रमाणम्** इति चार्वाकवचनं शब्दस्य प्रामाण्यस्वीकारे एव सङ्गतं भवति। अतः शब्दस्य अप्रामाण्यं केनापि प्रकारेण साधयितुं न शक्यते ।

शब्दस्य पृथक्प्रामाण्यविषये मतभेदोऽस्ति। बौद्धाः वैशेषिकाश्च शब्दस्य पृथक्प्रामाण्यं नाङ्गीकुर्वन्ति। तेषां मते शब्दः अनुमानविशेषः एव, शब्दः अनुमानविधया एव अर्थप्रत्यायकः। श्रुतेन शब्देन पश्चादर्थो ज्ञायते इति सर्वेषामनुभवः। यथा प्रत्यक्षेण ज्ञायमानं वह्न्यादिसाध्यं ज्ञातेन धूमादिलिङ्गेनानुमीयते, तथैव ज्ञातेन शब्देन पश्चादर्थो ज्ञायते। अतः शब्दः लिङ्गविधयैव अर्थबोधकः। तस्माच्छब्दः अनुमानविशेषः एव, एवं शाब्दबोधः अनुमितिविशेषः एव इति बौद्धवैशेषिकानामभिप्रायः

**यथा प्रत्यक्षतो धूमं दृष्ट्वाग्निरनुमीयते ।**

**तथैवशब्दमाकर्ण्य तदर्थोऽप्यवगम्यते ।।** इति ।

अस्मिन् विषये नैयायिकानामुद्घोषणं विषयभेदात् सामग्रीभेदाच्च शब्दः अनुमानात् पृथक्। शब्दः द्विविधः पदं

वाक्यञ्च। तत्र वाक्यमज्ञातसम्बद्धं सत् वाक्यार्थमवगमयति, यतः वाक्ये शक्तिर्नास्ति। अभिनवपुरुषविरचितश्लोकश्रवणे सति पदशक्तिसंस्कृतमतीनां वाक्यार्थावगमदर्शनात्। अतः सम्बन्धज्ञानमूलकप्रवृत्तिमता अनुमानेन सह वाक्यस्य नास्ति साम्यसम्भावना। शब्दानुमानयोर्मध्ये विषयभेदः सुप्रकटः। पदलिङ्गयोः विषयस्तावत् विसदृशः। न्यायमते जातिविशिष्टव्यक्तिमात्रं पदस्यार्थः, अनुमानं तु वाक्यार्थविषयकम्, **अत्राग्निः** अथवा **अग्निमान् पर्वतः** इति अनुमानतः प्रतीतेः। अपि च अनुमानस्थले पर्वतादिरूपं यद्विशेष्यं तज्ज्ञानपूर्वकम् अग्न्यादिविशेषणज्ञानं लिङ्गात् उदेति, परन्तु पदात् विशेषणज्ञानपूर्वकं विशेष्यज्ञानमिति विषयभेदः सुस्पष्टः।

प्रत्यक्षानवगम्यमानानां स्वर्गः अप्सरसः इत्यादीनामर्थानां न शब्दमात्रात् प्रत्ययः, परन्तु अयं शब्दः आप्तैरुक्तः इति शब्दगतस्य आप्तोक्तत्वस्य ज्ञानादेव

समीचीनः प्रत्ययो भवति। अनुमानस्थले तु नैवमिति प्रवृत्तिभेदसद्भावात् शब्दस्य अनुमानातिरिक्तत्वमिति।

सामग्रीभेदवशादपि शब्दो न अनुमानम्। पक्षसत्त्वादिरूपधर्मसापेक्षमनुमानम्, परन्तु शब्दे तादृशधर्मापेक्षा नास्ति। एवम् अन्वयव्यतिरेकौ अपि शब्दार्थयोः दुरूपपादौ, देशे काले च शब्दार्थयोः साहचर्याभावात्। न हि यत्र देशे शब्दस्तत्र अर्थः। कर्णप्रदेशे शब्दमुपालभामहे, अर्थं तु भूतलदौ। नास्ति एकस्मिन् काले शब्दार्थयोः साहचर्यम्, इदानीं युधिष्ठिररूपार्थाभावेऽपि युधिष्ठिरशब्दसम्भवात्। अनुमानस्थले तु लिङ्गलिङ्गिनोः साहचर्यं सदैव अपेक्षितम्। किञ्च, लिङ्गलिङ्गिनोर्हि अविनाभावो नाम सम्बन्धः, शब्दार्थयोस्तु वाच्यवाचकभावसम्बन्धः। एवम्प्रकारेण विषयभेदात् सामग्रीभेदाच्च शब्दः अनुमानादन्यः।

**लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिरि**ति शब्दलक्षणविवेचनप्रसङ्गे गौतमेनोक्तम् **आप्तोपदेशः शब्दः**

इति। अत्र शब्दः इति लक्ष्यनिर्देशः, आप्तोपदेशः इति लक्षणम्। उपदिश्यते अनेन इति उपदेशः इति व्युत्पत्या आप्तोदेपशशब्देन वाक्यज्ञानं वा तदर्थज्ञानं वा अभिधीयते। वाक्यं तु आकाङ्क्षायोग्यतासत्तिमत्पदकदम्बकम्। तस्य ज्ञानं, ज्ञायमानं तदित्यर्थः। तत्र ज्ञायमानं वाक्यं प्रमाणमिति पक्षे वाक्यार्थज्ञानमेव फलम्, पदार्थस्मरणादयस्तु आन्तरालिका इतिकर्तव्यता। तदर्थज्ञानं प्रमाणमिति पक्षे हानादिबुद्धिः फलम्।

कोऽसौ आप्तः इति प्रश्नावसरे भाष्यकारेण वात्स्यायनेन उक्तम् **आप्तः खलु साक्षात्कृतधर्मा यथादृष्टस्य अर्थस्य चिख्यापयिषया प्रयुक्त उपदेष्टा। साक्षात्करणमर्थस्य आप्तिः, तया प्रवर्तत इत्याप्तः** इति। आप्तानामृष्यार्यम्लेच्छानाम् उपदेशः शब्दः, न तु अनाप्तानाम्। हिताहितप्राप्तिपरिहारप्रयोजनकपदार्थतत्त्वनिश्चयवन्तः कारुणिकाः अनलसाः अमत्सरिणः स्थानकरणपाटववन्तः आप्ताः। ते च ऋषयः आर्याः म्लेच्छा वा भवितुमर्हन्ति।

तेषामुपदेशः अर्थात् तैः उच्चरितम् आकाङ्क्षायोग्यतासत्तियुक्तपदसमूहात्मकं वाक्यमेव शब्दः इति शब्दलक्षणम्।

न्यायसारे भासर्वज्ञेन उक्तम् **समयबलेन सम्यक्परोक्षानुभवसाधनागमः** इति। समयबलेन इति कथनाद् अविनाभावबलेन परोक्षानुभवसाधनेऽनुमाने, एवं सम्यक्पदेन संशयविपर्ययसाधने नातिव्याप्तिः। गङ्गेशोपाध्यायेन उक्तम् **प्रयोगहेतुभूतार्थतत्त्वज्ञानजन्यः शब्दः प्रमाणम्** इति, अर्थात् प्रयोगकारणीभूतं यत् अर्थविषयगतत्त्वज्ञानं तज्जन्यः शब्दः प्रमाणम्। तर्कभाषायां केशवमिश्रेण उक्तम् **आप्तवाक्यं शब्दः** इति। आप्तस्तु यथाभूतस्य अर्थस्य उपदेष्टा पुरुषः। आकाङ्क्षायोग्यतासन्निधिमतां पदानां समूहः वाक्यम् । तेन **गौरश्वः पुरुषो हस्ती** प्रभृतिपदानि परस्पराकाङ्क्षाविरहात् न वाक्यम्। योग्यताविरहात् **वह्निना सिञ्चति** इत्यपि न वाक्यम्। अत्र न अग्निः सेके करणीभवितुं योग्यः । एवम्

एकैकशः प्रहरे प्रहरे असहोच्चारितानि **गामानय** इत्यादिपदानि न वाक्यम्। अतः यानि तु साकाङ्क्षाणि योग्यतावन्ति सन्निहितानि पदानि तानि एव वाक्यम्। यथा **ज्योतिष्टोमेन स्वर्गकामो यजेत** इत्यादि।

अर्थास्तावत् स्वपदश्रोतरि अन्योन्यविषयाकाङ्क्षा-जनकत्वेन साकाङ्क्षा इत्युच्यन्ते। तद्द्वारेण तत्प्रतिपादकानि पदानि अपि साकाङ्क्षाणि इत्युपचर्यन्ते। अथवा पदानि एव अर्थान् प्रतिपाद्य अर्थान्तरविषयाकाङ्क्षाजनकानि इत्युपचारात् साकाङ्क्षाणि। अतः अर्थप्रतिपादनद्वारा श्रोतुः पदान्तरविषयाम् अर्थान्तरविषयां वा आकाङ्क्षां जनयतां प्रतीयमानपरस्परान्वययोग्यार्थप्रतिपादकानां सन्निहितानां पदानां समूहो वाक्यम्।

पदं च वर्णसमूहः। समूहश्चात्र एकज्ञानविषयीभावः। अतः वर्णानां क्रमवताम् आशुतरविनाशित्वेन एकदा अनेकवर्णानुभवासम्भवात् पूर्वपूर्ववर्णाननुभूय अन्त्यवर्ण-श्रवणकाले पूर्वपूर्ववर्णानुभवजनितसंस्कारसहकृतेन अन्त्यवर्ण-

सम्बन्धेन पदव्युत्पादनसमयग्रहानुगृहीतेन श्रोत्रेण एकदैव सदसदनेकवर्णावगाहिनी पदप्रतीतिर्जन्यते प्रत्यभिज्ञानवत्। प्रत्यभिज्ञानप्रत्यक्षे हि अतीतापि पूर्वावस्था स्फुरत्येव। ततः पूर्वपूर्वपदानुभवजनितसंस्कारसहकृतेन अन्त्यपदविषयेण श्रवणेन्द्रियेण पदार्थप्रत्ययानुगृहीतेन अनेकपदावगाहिनी वाक्यप्रतीतिः क्रियते।

यद्भवतु, तदिदं वाक्यम् आप्तपुरुषेण प्रयुक्तं सत् शब्दनामकं प्रमाणम्। अस्य फलं वाक्यार्थज्ञानम्। एतच्छब्दलक्षणं लोके वेदे च समानम्। इदमत्र अवगन्तव्यम्, लोके यः कश्चिदेव आप्तो भवति न सर्वः। तस्मात् किञ्चिदेव लौकिकं वाक्यं प्रमाणम्, यत् आप्तवक्तृकम्। वेदे तु परमाप्तेन ईश्वरेण कृतं सर्वमेव वाक्यं प्रमाणम्।

तर्कसंग्रहग्रन्थे अन्नम्भट्टेनोक्तम् **आप्तवाक्यं शब्दः** इति। आप्तोच्चरितत्वे सति वाक्यत्वमेव शब्दस्य लक्षणम्। तर्कसंग्रहदीपिकाव्याख्यायां नृसिंहप्रकाशिकायामुक्तं यत्

**आप्तवाक्यं शब्दः**, आप्तोच्चारितवाक्यमेव शब्द4प्रमाणम्। इदञ्च ज्ञायमानशब्दस्य प्रमाणत्ववाद्याचार्याणां मते। परन्तु वाक्यज्ञानमेव शब्दप्रमाणम्। तेन वाक्याभावेऽपि मौनिपुरुषकर्तृकवाक्यबोधकलिप्यादिज्ञानजन्यवाक्यज्ञानात् शाब्दबोधोत्पत्त्या व्यतिरेकव्यभिचारेण वाक्यस्य शब्दप्रमाणत्वं न संगच्छते। दीपिकाव्याख्यानावसरे रामरुद्रेणोक्तम् मौनिश्लोकादौ वाक्याभावेऽपि शाब्दबोधोत्पत्त्या वाक्यस्य शाब्दबोधकारणत्वासम्भवेऽपि न क्षतिः, तत्रापि संकेतितवाक्यानुमानेन वाक्यज्ञानसत्त्वात्। आप्तोच्चरितत्व-प्रकारकवाच्यविशेष्यकज्ञानं शब्दप्रमाणम्। शब्दशक्ति-प्रकाशिकाग्रन्थे जगदीशेनोक्तम्-

**अनुभवहेतुः सकले सद्यः समुपासिता मनुजे ।**

**साकाङ्क्षासन्ना च स्वार्थे योग्या सरस्वती देवी।। इति**

अनेन अनुभवजनकसाकाङ्क्षासन्नयोग्यपदसमूहात्मकं ज्ञायमानं वाक्यं शब्दप्रमाणमिति लक्षणं सूचितं भवति। भाषापरिच्छेदग्रन्थे विश्वनाथेन उक्तं-

**पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः।**

**शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी**।। इति।

नव्यनैयायिकः विश्वनाथः **आप्तोपदेशः शब्दः** इति सूत्रस्य व्याख्यानावसरे न्यायसूत्रवृत्तौ उक्तवान् **आप्तो यथार्थः, उपदेशः शाब्दबोधो यस्माद्** इति। तेन यथार्थशाब्दबोधकारणमेव शब्दप्रमाणम्। यद्भवतु गौतमकृतं शब्दलक्षणम् अधिकृत्य प्रचीननवीननैयायिकाः विविधप्रकारेण शब्दलक्षणं प्रदर्शितवन्तः।

अधुना शब्दस्य अर्थः कः इति विषये विचारः प्रस्तूयते। न्यायसूत्रकारेण गौतमेन उक्तम् **ते विभक्तन्ताः पदम्** इति अर्थात् यथादर्शनं विकृताः वर्णाः विभक्त्यन्ताः पदसंज्ञकाः भवन्ति। विभक्तिश्च द्विविधा नामिकी आख्यातिकी च। नामिकी सुप् आख्यातिकी तिङ् चेति। तथा च सुबन्तं तिङन्तञ्च पदमित्युक्तं भवति। उपसर्गनिपातानाम् अव्ययसंज्ञकत्वात् **अव्ययादाप्सुपः** इति सूत्रेण लुप्तां विभक्तिमाश्रित्य पदत्वम्। तत्र सुबन्तस्य नामपदस्य अर्थः क

इति परीक्ष्यते। तत्र घटपदस्य किं व्यक्तिः अर्थः उत आकृतिः अथवा जातिरिति संशयः। संशयबीजन्तु व्यक्त्यादीनामविनाभावः। अविनाभावे वर्तमानासु व्यक्त्याकृतिजातिषु घटशब्दस्य प्रयोगो भवति। तत्र न ज्ञायते किमन्यतमः पदार्थः उत सर्वे इति। अत्र व्यक्तिवादिनः वदन्ति घटव्यक्तिरेव घतपदस्यार्थः। आकृतिवादिनामाशयः अकृतिरेव पदस्यार्थः जातिवादिनः वदन्ति न व्यक्तिः न वा आकृतिः परन्तु जातिरेव नामपदस्य अर्थः।

अत्र व्याक्तिवादिमते व्यक्तिरेव प दस्यार्थः। **या गौस्तिष्ठति, सा निषण्णा** प्रभृतिस्थले यदि गोशब्दस्य जातिरेवार्थः स्यात् तदा जातेः एकत्वात् तिष्ठति, निषण्णा इति तस्याः विशेषणमनर्थकं भवति। किन्तु व्यक्तिवाचित्वे स्थित्याद्यनाश्रयगोव्यक्तिव्यवर्तनाय एतादृशविशेषणं सङ्गतं भवति। एवं **ब्राह्मणाय गां ददाति** इत्यत्र दाधातोरर्थः **स्वस्वत्वध्वंसपूर्वकपरस्वत्वोत्पत्त्यवच्छिन्नत्यागः**। अत्र गोव्यक्तेः पदार्थत्वे त्यागः सङ्गच्छते, जातेः अमूर्तत्वात् तन्न सङ्गच्छते।

एवं **दश गावः** इति सङ्ख्यानं द्रव्यपक्षे युज्यते। जातेरेकत्वात् दशत्वादिसंख्यावत्त्वं तस्याः न युज्यते। अतः व्यक्तिरेव पदार्थः न जातिः आकृतिर्वा इति व्यक्तिवादिनामाशयः।

अत्र जातिशक्तिवादिनः वदन्ति, व्यक्तौ न शक्तिः व्यभिचारात् आनन्त्याच्च । तेषामाशयः, व्यक्तिशक्तिपक्षे यस्यां कस्याञ्चिद् व्यक्तौ शक्तिः सर्वासु वा? तद्विषकशाब्दबोधं प्रति तद्धर्मिकशक्तिज्ञानमेव हेर्तुवाच्यः। अन्यथा घटादिपदात् पटादिविषयकशाब्दबोधापत्तेः। तथा च यत्किञ्चिद् एकघटव्यक्तौ घटपदशक्तिस्वीकारे घटान्तरधर्मिकशक्ति-ज्ञानाभावेऽपि घटपदात् घटान्तरविषयकशाब्दबोधोदयेन शक्तिज्ञानकारणतायां व्यतिरेकव्यभिचारः। एतद्दोष-परिजिहीर्षया सर्वासु व्यक्तिषु शक्तिस्वीकारे व्यक्तिनाम् आनन्त्यात् शक्तीनामानन्त्यम्। तथा च अनन्तशक्तिकल्पनायां गौरवाद् व्यक्तौ शक्तिर्न स्वीकार्या । तस्मात् जातौ एव शक्तिः। जातिं विना व्यक्तेः अवस्थित्यभावात्। अतः **या गौस्तिष्ठति, सा गौ निषण्णा**

इत्यत्र जात्या अविशिष्टं द्रव्यमात्रं न गोपदेन अभिधीयते, अपि तु जातिविशिष्टम् । यदि जातिरहितं व्यक्तिमात्रम् अभिधेयं स्यात् तदा यस्यां कस्यामपि अश्वादिव्यक्तौ गौरिति प्रत्ययः स्यात् । एवं समूहादिषु अपि द्रष्टव्यम् । गोसमूह इति शब्दात् अश्वसमूहस्यापि प्रतिपत्तिः स्यात् । जातिविशिष्टव्यक्तौ शक्तिस्वीकारे जातावपि शक्तिग्रहः आवश्यकः, विशिष्टबुद्धेर्विशेषणविषयत्वनियमात्, **नागृहीतविशेषणा बुद्धिर्विशिष्टेषूपजायते** इति न्यायात्। तथा च उभयत्र शक्तिकल्पनापेक्षया जातावेव शक्तिः कल्पनीया लाघवात् । **विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे** इति अभिधारूपशक्तेः विशेषणमात्रबोधनसमर्थत्वेन विशेष्यबोधने सामर्थ्याभावात् तत्र शक्तिस्वीकारो निष्प्रयोजनक इति ।

आकाङ्क्षा जायते, यदि व्यक्तौ न शक्तिः तर्हि व्यक्तौ गवादिशब्दानां कथं प्रयोगः इत्याशङ्क्य जातिसहचरितत्वात् व्यक्तेर्जातिवाची शब्दः व्यक्तौ लाक्षणिकः इत्याशयेन सूत्रकृतोक्तं **सहचरण-स्थान-तादर्थ्य-वृत्त-मान-**

**धारण-सामीप्य-योग-साधनाधिपत्येभ्यो ब्राह्मण-मञ्च-कट-राज-सक्तु-चन्दन-गङ्गा-शाटकान्नपुरुषेष्वतद्भावेऽपि तदुपचारः** इति। तत्पदाशक्यस्यापि तत्पदेन अभिधानं दशभ्यो हेतुभ्यो भवति। अत्राभिधानं गौण्या लक्षणया वा।

सहचरणाद्यथा **यष्टिकां भोजय** इत्यत्र यष्टिकाशब्देन यष्टिकासहचरितो ब्राह्मणो लक्षणया अभिधीयते। **मञ्चाः क्रोशन्ति** इत्यत्र मञ्चशब्देन मञ्चस्थिताः पुरुषा अभिधीयन्ते। **कटं करोति** इत्यत्र कटार्थेषु वीरणेषु कटशब्दः वर्तते। एवम्प्रकारेण सर्वत्र लक्षणया व्यक्तिबोधसम्भवः।

आकृतिशक्तिवादिनः आहुः प्रयोगतदधीनप्रतिपत्तिभ्यां किल अयमस्य शब्दस्य अर्थः इति शब्दार्थनिश्चयो भवति। प्रयोगकुशलवृद्धाः यस्मिन्नर्थे गोशब्दं प्रयुञ्जते श्रोतारश्च ततो मर्मार्थं जानन्ति, स तस्यार्थः। तत्र गोशब्दः केसरादिमति न प्रयुज्यते, सास्नादिमति च प्रयुज्यते इति असाधारणसन्निवेशविषयक एव स इत्यवगम्यते। अपि च प्रत्यक्षविषये अर्थे गौरित्यादिपदं प्रयुज्यते।

प्रत्यक्षमाकृतिविषयकं भवति। अश्वपिण्डसन्निवेशात् विलक्षणः गोपिण्डसन्निवेशः इन्द्रियेण प्रतीयते। अवयवसन्निवेशकृतमेव वस्तूनां परस्परवैलक्षण्यम्। अतः प्रत्यक्षविषये अर्थे पदं प्रयुयज्यमानम् आकृतौ एव वर्तितुमर्हति। न च **गामानय** इत्यादिव्यवहारविषयः आनयनादिक्रियायोगः आकृतौ असम्भवी, अतः कथम् आकृतिः शब्दस्य अर्थ इति वाच्यम्। व्यक्तिद्वारा आकृतौ क्रियायोगसम्भवात् अर्थात् स्वाश्रयाश्रयत्वसम्बन्धेन आकृतौ क्रियान्वय इति। अतः अवयवानां नियतसन्निवेशरूपा आकृतिः एव पदस्य अर्थः। न्यायसूत्रकारेण उक्तम् **आकृतिस्तदपेक्षत्वात् सत्त्वव्यवस्थान-सिद्धेः** इति। यस्य ग्रहणात् सत्त्वव्यवस्थानं अर्थात् अवयवसन्निवेशव्यवस्था **अयं गौरयमश्वः** इत्येवंरूपा सिध्यति स गोशब्दस्य अर्थः।

व्यक्तिशक्तिवादिनामयमभिप्रायः जातिः कदापि अर्थो भवितुं न अर्हति। पदं हि विभक्त्यन्तो वर्णसमुदायः, न प्रातिपदिकमात्रम्। पदे प्रकृति-प्रत्ययौ परस्परान्वितमर्थं

प्रतिपादयतः इति स्थितम्। द्वितीयादिश्च विभक्तिः प्रातिप्रदिकादुच्चरन्ती प्रातिपदिकार्थान्वितत्वेन स्वार्थं प्रतिपादयति, यतः **प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वम्** इत्यस्ति न्यायः। विभक्त्यर्थः कारकं लिङ्गं संख्या च। एतत्त्रितयं न प्रातिपदिकार्थे जातौ अन्वेति अयोग्यत्वात्। न हि जातिः कारकम्, न वा स्त्रीत्वादिलिङ्गवती, न वा द्वित्वादिसंख्यावती। न च प्रातिपदिकस्य व्यक्तौ लक्षणास्वीकारात् लक्ष्यार्थव्यक्तौ विभक्त्यर्थलिङ्गसंख्या-दीनाम् अन्वयात् नानुपपत्तिरिति वाच्यम्। आदौ प्रकृतिः कश्चिद् अर्थं वदति, ततो अर्थान्तरं लक्षयति। तद्गतत्वेन विभक्तिः लिङ्गसंख्याद्यभिधत्त इति नायं प्रतीतिक्रमः। किन्तु पदश्रवणसमनन्तरमेव **पशुना** इत्यादौ करणत्व-पुंस्त्व-एकत्वविशिष्टा व्यक्तिरवगम्यते। जात्यन्वितत्वेन लिङ्गसंख्या-द्यभिधानं तु असंगतम्।

केनापि वक्तुं शक्यते, प्रातिप्रदिकार्थजातिगतत्वेनैव विभक्त्या स्वार्थो अभिधीयते। स तु विभक्त्यर्थः जातौ

साक्षादसम्भवन् व्यक्तिद्वारको भविष्यति, आत्मवत्। यथा आत्मा अमूर्तत्वात् देहेन्द्रियद्वारेण तत्तत्कार्याणि कुर्वन् कर्ता भवति इति।

एतन्न समीचीनम्, यतः आत्मनो ज्ञानप्रयत्नादियोगित्वेन कारकत्वोपपत्तेः। जातेस्तु साक्षान्न मनागपि व्यापारलेशसंस्पर्श इति स्वतो दुर्लभं तस्याः कारकत्वम्। तस्मात् तत्र विभक्त्यर्थान्वयः सुदुर्लभः। अतः जातिविशिष्टायां व्यक्तौ विभक्त्यर्थकारकादेरन्वयप्रतीतेः अनुभवात् जात्यनुरञ्जिता व्यक्तिरेव पदस्य अर्थः।

दीधितिकारमते गवादिपदानां व्यक्तौ एव शक्तिः, न जातौ। न च शाब्दबोधप्रयोजकशक्त्यभावात् गोत्वादीनां शाब्दबोधे प्रकारतया भानानुपपत्तिरिति वाच्यम्। पदार्थांशे गोत्वादिधर्मस्य शाब्दबोधे प्रकारतायां गोत्वाद्यंशे तत्पदशक्यतावच्छेदकत्वस्यैव प्रयोजकत्वात्। शक्यताव-च्छेदकत्वञ्च सङ्केतीयतत्पदजन्यबोधविषयत्वनिष्ठप्रकारता-निरूपितविशेष्यतावच्छेदकत्वम्, न तु बोधविषयताव-

च्छेदकतया सङ्केतविषयत्वरूपं विशेषणविधया वाच्यत्वम्। तथा च तद्धर्मप्रकारकशाब्दबोधं प्रति तद्धर्मावच्छिन्नत्व-विशिष्टतादृशविशेष्यतासंसर्गकशक्तिज्ञानस्यैव कारणत्वमिति गोत्वादीनां शाब्दबोधे प्रकारतया न भानानुपपत्तिः।

मीमांसकमते गवादिपदानां गोत्वादिजातिरेव वाच्या, न तु व्यक्तिराकृतिर्वा। व्यक्तिस्तु आक्षेपलभ्या। तत्र प्राभाकराः पदानां स्मारकशक्तिः अनुभावकशक्तिरिति शक्तिद्वयं स्वीकुर्वन्ति। तत्र आनुभाविकी शक्तिः कार्यान्वितेऽर्थे, स्मारिका शक्तिस्तु जातौ। **गामानय** इत्यादौ आनयनादिरूपः व्यवहारः व्यक्तौ एव इति यद्यपि व्यक्तावेव शक्तिरुचिता, तथापि आनन्त्यव्यभिचाराभ्यां न तत्र शक्तिः। यदि यत्र शक्तिग्रहः तत्र शाब्दधीः तदानन्तासु व्यक्तिषु शक्तिग्रहासम्भवात् अगृहीतशक्तिकव्यक्तेः शाब्दधीर्न स्यात्। यदि अन्यविषयकशक्तिग्रहात् अन्यविषयकः शाब्दबोधः तदा शक्तिधीः शाब्दज्ञाने व्यभिचारिणी स्यात्। सकलव्यक्तीनां शक्यत्वे न केवलं आनन्त्यदोषः, परन्तु **गां दद्यात्** इत्यादौ

सकलगोव्यक्तीनां दानकर्मत्वानुपपत्तिश्च। अन्यतमव्यक्तेः शक्यत्वस्वीकारे इयं व्यक्तिः शक्या अन्या वा इति अनिर्धारणात् **गां दद्यात्** इत्यादौ अप्रवृत्त्यापत्तेः। गोत्वरूपसामान्यार्थकत्वे गोशब्दात् गोव्यक्तेः अप्रतीत्यापत्तेः। तत्तद्व्यक्तित्वेन सर्वा व्यक्तिः शक्या इति स्वीकारे गोपदं नानार्थम् इति न च वाच्यम्। तथापि प्रत्येकरूपेण सर्वासां ज्ञातुमशक्यत्वात् अनेकशक्तिकल्पेन अनेकशक्यतावच्छेदक-कल्पने च गौरवात्। अपूर्वगवि तद्व्यक्तित्वेन पूर्वं शक्तिग्रहाभावात् प्रतीत्यभावादिप्रसङ्गाच्च।

प्राभाकरमते जातिशक्तमेव पदं जातिव्यक्त्योः स्मृतिम् अनुभवञ्च जनयति। तस्माद् व्यक्तरेपि शाब्दत्वं स्वीकर्तव्यम्। वृत्त्यधीनान्वयानुभवविषयस्यैव शाब्दत्वात् व्यक्तौ शक्त्यनङ्गीकारे कथं शाब्दत्वम् इति न वाच्यम्। जातिव्यक्त्योः तुल्यवित्तिवेद्यत्वात् जातिशक्तपदात् जातेरनुभवकाले तस्मिन् अनुभवे व्यक्तिरपि भासत इति

जातिशक्त्यधीनान्वयानुभवविषयस्य व्यक्तौ सत्त्वेन व्यक्तेरपि शाब्दत्वोपपत्तेः।

प्रत्यक्षस्थले जातिभासकसामग्री संययुक्तसमवायः, व्यक्तिभासकसामग्री च संयोगः। सामग्रीभेदवशात् जातिं विना प्रत्यक्षादिना केवलव्यक्तेर्ज्ञानं सम्भवति, उभयज्ञापकसामग्री-द्वयसमवधानात् कदाचित् जातिविशिष्टव्यक्तिज्ञानमपि भवति। जातिव्यक्तिविषयकप्रत्यक्षादिज्ञाने सामग्रीद्वयस्य पृथगेव हेतुत्वम्। व्यक्तिप्रत्यक्षं प्रति इन्द्रिसंयोगः हेतुः, जातिप्रत्यक्षं प्रति इन्द्रियसंयुक्तसमवायः हेतुः, पृथगन्वयव्यतिरेकग्रहात्। परन्तु शब्दाधीने व्यक्तिबोधे जातिशक्तिज्ञानमेव हेतुः न व्यक्तिशक्तिज्ञानं लाघवात्। जातिशक्तिज्ञानशत्त्वे व्यक्तिशक्तिज्ञानविलम्बेन व्यक्तिज्ञानविलम्बाभावात्। तस्मात् जातिशक्तत्वेन ज्ञातं पदं जातिविशिष्टव्यक्तेः स्मारकम् अनुभावकञ्च।

कुमारिलभट्टमते जातिः पदशक्या, व्यक्तिस्तु आक्षेपलभ्या। अत्र **आक्षेप**शब्दस्यार्थः अनुमानम्। **गोपदं**

**गोत्वशक्तम्** इत्याकारकशक्तिज्ञानान्तरं **गामानय** इति वाक्यात् गोत्वोपस्थित्यनन्तरं स्वाश्रयवृत्तित्वरूपपरस्परा-सम्बन्धेन कर्मत्वधर्मिकगोत्वप्रकारकशाब्दबोधानन्तरं **कर्मत्वं गोवृत्ति गोत्वनिष्ठकर्मतात्वात्** अथवा **आनयनं गोवृत्तिकर्मताकं गोत्ववृत्तिकर्मताकत्वात्** इति व्यतिरेक्यनुमानेन गोगतकर्मतानिरूपकानयनस्य बोधः अनायासेन भवति। अतः जातिशक्तिस्वीकारेणापि व्यक्तिबोधः आक्षेपेण सम्भवति। भट्टमते अर्थापत्तिप्रमाणेनापि व्यक्तिबोधः भवतीति केषाञ्चिन्मतम्।

शक्तिवादग्रन्थे मण्डनमिश्रस्य मतं तु शब्दादेव जातिवद् व्यक्तेरपि बोधो भवति। शक्तितः जातेर्बोधो लक्षणातः व्यक्तिबोधः। तेन उक्तं-

**जातेरस्तित्वनास्तित्वे न हि कश्चित् विवक्षति।**

**नित्यत्वाल्लक्ष्यमाणायाः व्यक्तेस्ते हि विशेषणे।।**

अर्थात् **गौरुत्पद्यते, गौर्नश्यति** प्रभृतिस्थले उत्पत्याश्रयत्वविनाशप्रतियोगित्वादिना व्यक्तिरेव विवक्ष्यते।

तस्मात् लक्षणया व्यक्तिबोधः स्वीकर्तव्यः। अत्र लक्षणा जातिप्रकारेणैव व्यक्तिं बोधयति न व्यक्तित्वादिना। नीलादिपदस्य शक्यनीलादिगुणपुरस्कारेण लक्षणया गुणिबोधकत्ववत् शक्यगोत्वादिजातिपुरस्कारेण लक्षणया गवादिपदस्य व्यक्तिबोधकत्वे नास्ति विरोधः। आकाङ्क्षा जायते **स्वार्थादन्येन रूपेण ज्ञाते भवति लक्षणा** इति उक्तत्वात् स्वार्थात् स्वशक्यात् अन्येन तीरत्वादिना बोधे लक्षणा भवति। प्रकृतस्थले शक्येन गोत्वादिनैव व्यक्तिबोधात् कथं व्यक्तौ लक्षणा? उत्तरं तु, तत्र स्वार्थपदस्य शक्यतावच्छेदकार्थकत्वात्। तथा च शक्यतावच्छेदकादन्येन रूपेण ज्ञाते लक्षणा भवति। जातिशक्तिवादे जातिः शक्या, न तु शक्यतावच्छेदिका। ततश्च शक्यतावच्छेदकादन्येन गोत्वादिना ज्ञातायां व्यक्तौ लक्षणास्वीकारेऽपि न हानिः।

आपत्तिर्जायते **गोर्जायते** इत्यादिस्थले अन्वयानुपपत्तितः लक्षणा स्वीकृता भवति। परन्तु **गां पश्यति** प्रभृतिस्थले दर्शनक्रियायाः विषयता गोव्यक्तिवत् गोत्वादिजातावपि

सत्त्वात् गोत्वविषयकदर्शनादिक्रियायाः यथार्थशाब्द-बोधसम्भवः। अतः एतादृशस्थले अन्वयानुपपत्त्यभावात् लक्षणा कथं स्वीकार्या? अत्र मण्डनमिश्रेणोक्तं **यष्टीः प्रवेशय** इत्यादिस्थले अन्वयानुपपत्त्यभावेऽपि तात्पर्यानुपपत्तितः यथा लक्षणा भवति, तद्वद् अत्रापि गोव्यक्तिदर्शनतात्पर्येण **गां पश्यति** इत्यादिकम् उच्चारितं भवति।

श्रीकरमते पदस्य जातौ व्यक्तौ च शक्तिः, जातौ शक्तिः ज्ञाता सती उपयोगिनी, व्यक्तौ शक्तिस्तु स्वरूपसती। अपरे वदन्ति, श्रीकरमते **आक्षेप**शब्दस्य अर्थः अर्थापत्तिः। तन्मते **पीनो देवदत्तः दिवा न भुङ्क्ते** इति वाक्यात् **दिवसीयभोजनकर्तृत्वं स्थूलदेवदत्ते नास्ति** इत्येतादृशः शाब्दबोधः प्रथमं जायते। पश्चात् **दिवा भोजनाभाववतो देवदत्तस्य रात्रिभोजनं विना पीनत्वमनुपपन्नम्** इति अर्थापत्तिप्रमाणेन **स्थूलदेवदत्तः रात्रिभोजी** इति अर्थापत्तिप्रमितिः भवति। तद्वत् **गोपदं गोत्वशक्तम्** इति एतादृशशक्तिज्ञानजन्य-**गामानय** इति वाक्यात् गोत्वस्यो-

पस्थितिद्वारा स्वाश्रयवृत्तित्वसम्बन्धेन **अम्**पदार्थकर्मत्व-धार्मिकगोत्वप्रकारकशाब्दबोधानन्तरं कर्मत्वस्य गोवृत्तित्वं विना गोत्ववृत्तित्वमनुपपन्नम् इत्यनुपपत्तिज्ञानात् अर्थापत्तिप्रमाणंसहकारिरूपेण गृहीत्वा **गामानये**ति वाक्यात् **कर्मत्वं गवीयम्** इति वृत्तित्वसम्बन्धेन गोव्यक्तिप्रकारककर्मत्वविशेष्यक-औपादानिको बोधो जायते। मतेऽस्मिन् **कर्मत्वं गवीयम्** इति बोधे गोत्वस्य भानं शब्दप्रमाणजन्यं तथा गोव्यक्तिज्ञानं अर्थापत्तिप्रमाणजन्यम् इति प्रमाणद्वयं मिलित्वा एतादृशबोधजनकं भवतीति बोधोऽयं औपादानिक इति।

भाट्टदीपिकाग्रन्थे मीमासाचार्येण खण्डदेवेन उक्तम् **आकृत्यधिकरणे व्यक्तौ लक्षणा** इति। भाट्टचिन्तामणिग्रन्थे गागाभट्टेन मतमिदं समर्थितम्। तौतातिकमततिलकग्रन्थे भवदेवभट्टेन भणितं **व्यक्तिः आक्षेपलभ्या** इति। आक्षेपशब्दस्य अर्थः व्यवहिताभिधानम्। गोपदात् शक्ति-ज्ञान-

जन्य-गोत्वजातेः अव्यवहितभावेन अभिधानं भवति, गोव्यक्तेश्च व्यवहितभावेन अभिधानं भवतीति संक्षेपः।

प्राचीनन्यायमते आकृतिशब्दस्य अर्थः अवयवसंस्थान-विशेषः, नव्यमते जाति-व्यक्त्योः सम्बन्धः समवायः, मीमांसकमते जातिरेव आकृतिशब्दार्थः।

न्यायमते जात्याकृतिव्यक्तिषु त्रिसृषु एकैव शक्तिः। गौतमेन सूत्रितं **व्यक्त्याकृतिजातयस्तु पदार्थः** अर्थात् जात्याकृतिविशिष्टव्यक्तिरेव पदार्थः। त्रिषु एकशक्तिलाभार्थ-मेकवचनम्। सूत्रान्तर्गतेन **तु**शब्देन शब्दार्थानां गुणप्रधानभावनियमो नास्तीति सूच्यते। तेन प्रयोगविशेषे जातेः प्राधान्यं व्यक्तेरङ्गभावः। यथा **गौर्न पदा स्प्रष्टव्या** इति सर्वगवीषु प्रतिषेधो गम्यते। क्वचिद् व्यक्तेः प्राधान्यं जातेरङ्गभावः। यथा **गां मुञ्चे**ति नियतां काञ्चिद् व्यक्तिमुद्दिश्य प्रयुज्यते। क्वचिदाकृतेः प्राधान्यं व्यक्तेरङ्गभावो जातिर्नास्त्येव। यथा **पिष्टकमय्यो गाव क्रियान्तामि**ति अवयव-सन्निवेशचिकीर्षया प्रयोगः।

शक्तिवादग्रन्थे परिशिष्टकाण्डे गदाधरभट्टाचार्येण उक्तम् **गवादिशब्दात् संस्थानरूपायाः आकृतेरपि बोधस्य आनुभाविकतया गोत्वादिजातिवत् आकृतिरपि गोशब्दवाच्ये विशेषणम्** इति। परन्तु तस्याः वाच्यविशेषणत्वेऽपि न प्रवृत्तिनिमित्तम् अर्थात् शक्यतावच्छेदकम्। यतस्तस्याः साक्षात्सम्बन्धेन वाच्यवृत्तित्वाभावात् अवयवसंयोगरूपायाः आकृतेः अवयववृत्तित्वात्। एकविशिष्टापरावच्छिन्ने शक्तिरिति तु न सत्। विशेष्यविशेषणभावे विनिगमनाविरहेण जातिविशिष्टाकृतिविशिष्टे आकृतिविशिष्टजातिविशिष्टे च शक्तिप्रसङ्गात्। तदपेक्षया उभयविशिष्टे शक्तिः लाघवात्, गद्यांशे साक्षाद् जात्याकृत्युभयप्रकारकबोधस्यानुभवसिद्ध-त्वाच्च। **पिष्टकमय्यो गावः क्रियन्ताम्** इत्यादिस्थले यत्र केवलाकृतिविशिष्टे गवादिपदतात्पर्यं तत्र केवलाकृतिविशिष्टे गोपदस्य लक्षणा।

अरुणाधिकरणसरणिविवरणीग्रन्थे जातिमात्रशक्तिवादे दोषोद्भावनपूर्वकं जातिविशिष्टव्यक्तौ शक्तेः समर्थनं दृश्यते।

**गामानय शुक्लां दण्डेन, अग्नीषोमीयं पशुमालभेत, गौश्चाश्वश्चाश्वतरश्च गर्दभश्च, ब्राह्मणो न हन्तव्यः, व्रीहिन् प्रोक्षति** इत्यादिकं सर्वं लौकिकं वैदिकञ्च वाक्यं क्रियागर्भतया जात्यादिविशिष्टव्यक्तिगोचरमेव। नहि केवलं जातिगुणादिकमानेतुमालब्धुं दातुं हन्तुं प्रोक्षितुं वा शक्यम्। अतः प्रयोगप्रतिप्रत्तिभ्यां जात्यादिविशिष्टव्यक्तौ वृत्तिरङ्गीकरणीयेति सर्वं तस्मिन् ग्रन्थे प्रतिपादितमेव।

प्रथमोपस्थितत्वात् लाघवाच्च विशेषणमात्रे जातौ शक्तिरिति मीमांसकमतं निराकर्तुं ग्रन्थकारेणोक्तम्, आश्रयप्रतीतिमन्तरा जातिगुणयोरप्रतीतेः जात्याश्रयव्यक्तेः प्रथमोपस्थितिर्भवति। अपि च, चक्षुसंयुक्तसमवेतजाति-विषयकचाक्षुषत्वावच्छिन्नं प्रति चक्षुसंयुक्तसमवायः कारणम्। तस्य च संयोगपूर्वकत्वात् द्रव्यचाक्षुषत्वावच्छिन्नं प्रति चक्षुसंयोगस्य कारणत्वात्, जात्यादिप्रतीतेः प्राक् सामग्रीवशाज्जायमानं द्रव्यप्रत्यक्षं विना बाधकेन नापहर्तुं शक्यम्। यदि संयोगस्यान्याधीनस्थितिकत्वेन कादा-

चित्कत्वेऽपि नित्यस्य समवायस्य प्रागेव सिद्धत्वात् युगपज्जातिव्यक्त्योः प्रतीतिरविरुद्धा इत्युच्यते, तथापि जातेर्न प्रथमोपस्थितत्वम्। किञ्च, विशेषणज्ञानं जात्यादिविषयकमेवेति निश्चेतुं न शक्यम्। विशेषणविशेष्य-भावे कामचारात्। **घटे घटत्वमि**त्यादौ हि व्यक्तिरेव जातिविशेषणत्वेन प्रतीयते इति व्यक्तेः प्रथमोपस्थितिरङ्गीकरणीया, अर्थात् घटे घटत्वमिति बुद्धौ केवलव्यक्तेः विशेषणतया भानात्तज्ज्ञानमपि पूर्वभावीति जातिज्ञानस्यैव पूर्वभावित्वमिति मीमांसकमतमसमीचीनम्।

अस्तु तर्हि प्रत्यक्षस्थले सामग्रीवशाद् व्यक्तेरपि उपस्थितिर्भवति सत्यं, तथापि शाब्दबोधस्थले जातेरेव प्रागुपस्थितिरावश्यकी। अन्यथा प्रवृत्तिनिमित्तापरिज्ञानेन वाच्यत्वस्यैवानिश्चयात्। प्रवृत्तिनिमित्तधर्मस्य धर्मिणि सम्बन्धज्ञानस्यापि तत्रापेक्षितत्वात् तज्ज्ञानस्य च सम्बन्धिद्वयज्ञानपूर्वकत्वात् व्यक्तिप्रतीतिरपि आवश्यिकीति न वाच्यम्। तथापि जातेः प्रथमोपस्थितेरवारणात्।

अत्रोच्यते, प्रवृत्तिनिमित्तोपस्थितिः किं प्रात्यक्षिकी विवक्षिता उत शाब्दी। आद्ये तस्याः प्रागुक्तयुक्त्या आश्रयोपस्थितिमूलकत्वं दुर्वारम्। द्वितीये अर्थात् उपस्थितिः यदि शाब्दी भवति तर्हि किं शब्दान्तरेण उत प्रकृतशब्देन। नाद्यः, अनवस्थानात्। घटत्वादिपदानामपि प्रकृतिप्रत्यय-समुदायरूपतया **तस्य भावस्त्वतलौ** इति सूत्रेण भावार्थविहित**त्व**प्रत्ययान्ततया प्रकृत्यर्थज्ञानाधीनत्वात् भावशब्दप्रवृत्तिनिमित्तपरतया आत्माश्रयाच्च। किञ्च, शब्दात् प्रवृत्तिनिमित्तोपस्थितिः किं शक्त्या उत वृत्त्यन्तरेणन। नाद्यः प्रवृत्तिनिमित्तोपस्थितेः प्राक् शक्तेरज्ञानात्। अत एव न द्वितीयः शक्त्यभावे तन्मूलकवृत्त्यन्तरस्यापि असम्भवात्।

**अनन्यलभ्यो हि शब्दार्थः** इति नियमात् अनन्यलभ्या जातिः एव शक्यार्थः, व्यक्तिस्तु अन्यलभ्या। तस्मात् व्यक्तेर्न वाच्यत्वं इति मीमांसकवचनं न युक्तम्। अनुपपत्त्यप्रतिसन्धानेऽपि गवाद्यनुभवात् गौर्नित्यादित्यादौ व्यक्तौ नित्यत्वान्वयानुपपत्तिप्रतिसन्धानजन्यजातिप्रतीतेः

शक्तिग्रहजन्यत्वं, **गामानय** इत्यादौ अन्वयानुपपत्त्यप्रतिसन्धानजन्यगवादिव्यक्तिप्रतीतेः वृत्त्यन्तरमूलकत्वमिति कल्पनायाः उपहास्यत्वाच्च। गोत्वादिशब्देनापि विनापि अनुपपत्तिप्रतिसन्धानं गवादिप्रतीत्यापत्तेश्च। पदस्य जातिमात्रवाचकत्वे गोशब्दात् गोत्वशब्दाच्च समाने प्रतिपत्ती स्याताम्, उभयोरपि सामान्यमात्रवाचकत्वात्। **गौः शुक्लः** इतिवत् **गोत्वं शक्लम्** इति बुद्धिः स्यात्। अथ गोशब्दः आक्षिप्तव्यक्तिकां गोत्वजातिं वदति, गोत्वशब्दस्तु व्यक्तिशून्यजातिस्वरूपमात्रं वदति इत्यनयोर्भेदः इति चेन्न, अनाक्षिप्तव्यक्तिकायाः जातेः कुत्रापि अदर्शनात्। अथ गोशब्दश्रवणेन व्यक्तिसम्बद्धा जातिरवगम्यते। परन्तु गोत्वशब्दे श्रुते व्यक्तिसम्बन्धरहिता जातिः प्रतीयते इति चेत्। एवं तर्हि आश्रयवती जातिः शब्देनोच्यते चेत् जात्याश्रय उक्त एव भवति। जात्याश्रयस्य अनुक्तौ आश्रयवती जातिः कथमुक्ता स्यात्। तस्माद् आश्रयं विना आश्रयिमात्रविवक्षायां त्वतलादयः प्रयुज्यन्ते।

रामभद्रसार्वभौममते **आकृति**शब्दस्यार्थः जाति-व्यक्त्योः सम्बन्धः समवायः इति। तन्मते **आक्रियते अनेन** इति व्युत्पत्त्या क्तिन्प्रत्ययान्तः कृतिशब्दः जातिव्यक्त्योः सम्बन्धं सूचयति। अतः गोपदात् गोत्वजातिः गोव्यक्तिस्तथा उभयोः सम्बन्धः समवायः इति जात्यादित्रितये एकशक्तिलाभार्थं **व्यक्त्याकृतिजातयस्तु पदार्थः** इत्यत्र एकवचनमुपात्तम्।

मीमांसकैरुक्तं **व्यक्तिग्रहस्तु आक्षेपात्** इति। अत्र पृच्छा, कोऽयमाक्षेपः, न तावदनुमानम्, अनन्ताभिः व्यक्तिभिः सह सङ्गतिज्ञानं यथा असम्भवः तथा ताभिः सह अविनाभावरूपव्याप्तिग्रहस्यापि असम्भवः। अर्थापत्तिराक्षेपः इति वक्तुं न शक्यते। अर्थापत्तिस्थले उपपादकं विना किञ्चिद् अनुपपन्नं हि सत् स्वोपपादकतया आक्षिपति, अर्थात् रात्रिभोजनं विना अनुपपन्नं दिवा अभुञ्जानस्य पीनत्वं रात्रिभोजनमाक्षिपति। प्रकृते व्यक्तेराक्षेपः इत्युक्ते उपपादकत्वेन अभिमतया आक्षेप्यया व्यक्त्या विना कोऽर्थः

अनुपपन्न इति पृच्छामः। न च जातिरेवानुपपन्नेति वाच्यम्। व्यक्तिनाशव्यक्त्यनुत्पाददशायामपि व्यक्तिं विना जातेः सत्त्वात्।

**व्यक्त्याकृतिजातयस्तु पदार्थः** इति सूत्रान्तर्गतजातिशब्देन सामान्यधर्मः विवक्षितः। तेन मूकशब्दात् वाक्शक्त्यभावविशिष्टव्यक्तिः बोधविषया भवति। बधिरशब्दात् श्रवणशक्त्यभावविशिष्टव्यक्तिः वाच्या भवति। अत्र वाच्यतावच्छेदको भवति अभावपदार्थः।

इदमत्र अवधेयं जात्याकृतिव्यक्तयः सर्वत्र न पदार्थरूपेण उपस्थिताः भवन्ति। यथा सूर्यपदात् शक्त्या सूर्याकृतिविशिष्टा सूर्यव्यक्तिः बोधिता भवति, सूर्यत्वस्य एकव्यक्तिवृत्तित्वेन जातित्वाभावात्। अगत्या अत्र सूर्याकृतिरेव सूर्यपदस्य वाच्यतावच्छेदिका। आत्मन्प्रभृति-शब्दात् आत्मत्वविशिष्टस्य आत्मनः बोधो भवति, यतः आत्मन-अवयवसंयोगरूपाकृतिर्नास्ति। तस्मादत्र जातिविशिष्ट-व्यक्तौ शक्तिः।

रूपरसगन्धादयः शब्दाः गुणमात्रवाचिनः। यद्यपि नीलादिपदानां नीलरूपादौ तद्विशिष्टे च शक्तिः कोषेण व्युत्पादिता **गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति** इति , तथापि लाघवात् नीलादावेव शक्तिः, नीलादिविशिष्टे तु लक्षणा ।

न्यायदर्शने शाब्दबोधः स्वतन्त्रप्रमितिरूपेण स्वीकृतो भवति। शाब्दबोधस्तु सार्थकशब्देन उपपन्नो भवति। आप्तोपदेशसामर्थ्याच्छब्दार्थसम्प्रत्ययः इति न्यायसूत्रेण ज्ञायते यत्, प्रत्यक्षेण अनवगम्यमानानां स्वर्गः अप्सरसः प्रभृतीनाम् अर्थानां न शब्दमात्रात् ज्ञानं भवति। परन्तु शब्दोऽयं आप्तैरुक्तः इति शब्दगतस्य आप्तोक्तत्वस्य ज्ञानादेव समीचीनः प्रत्ययो भवति। शब्दश्रवणानन्तरम् अर्थप्रत्ययो जायते। अतः शब्दार्थयोः कश्चित् सम्बन्धः अङ्गीकरणीयः। अन्यथा येन केनापि शब्देन यस्य कस्यचिदपि अर्थस्य बोधः स्याद् इत्यापत्तिः। दृश्यते च शब्दविशेषात् अर्थविशेषस्य अवबोधः। अत्र पृच्छा शब्दार्थयोः सम्बन्धः कः?

शब्दार्थयोर्मध्ये कुण्डवदरयोरिव संयोगः, तन्तुपटयोरिव समवायो वा सम्बन्धः प्रत्यक्षेण न दृश्यते। अविनाभावः सम्बन्धः शब्दार्थयोर्मध्ये नास्ति। यतः धूमाग्न्योर्हि सम्बन्धः प्रतीयमानः एवं प्रतीयते धूमः अग्निं विना न भवतीति। शब्दार्थयोस्तु सम्बन्धः प्रतीयमानः एवं प्रतीयते अयमर्थो अस्माच्छब्दात् प्रतीयते इति। यद्भवतु, सम्बन्धव्याख्याना-वसरे गदाधरभट्टाचार्येण उक्तं सङ्केतो लक्षणा चार्थे पदवृत्तिः इति। तथा च अर्थनिरूपिता पदनिष्ठा या वृत्तिः सा सङ्केतो लक्षणा चेति। तत्र घटादिनिरूपिता घटादिपदनिष्ठा वृत्तिः सङ्केतरूपा, तीरादिनिरूपिता गङ्गादिपदनिष्ठा या वृत्तिः सा लक्षणारूपा। संकेतं लक्षणां चोद्दिश्य वृत्तिपदव्यवहार्यत्वमत्र विधीयते। आधुनिक-नित्यभेदेन संकेतो द्विविधः। अधुनिकसंकेतः परिभाषा, परिभाषया अर्थबोधकं पदं परिभाषिकम्। नित्यसंकेतः शक्तिः। इयं शक्तिः भगवदिच्छारूपा। शक्त्या अर्थबोधकं पदं वाचकम्, अर्थश्च वाच्यः। नव्यमते शक्तिर्न भगवदिच्छारूपा, परन्तु इच्छारूपा। इदमत्र अवगन्तव्यं यत्, वृत्तिज्ञानं शाब्दबोध-

जनकपदार्थोपस्थितिजनकतया कारणकारणत्वेन अन्यथासिद्ध-मिति न शाब्दबोधजनकम्। एवं पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः इत्यत्र केवलं पदज्ञानं न करणं परन्तु पदार्थधीविशिष्टपदज्ञानमेव करणं, यतः नव्यमते व्यापारवत् कारणं करणम्।

**अस्माच्छब्दादयमर्थो बोद्धव्यः** अथवा **इदं पदम् अमुमर्थं बोधयतु** इति ईश्वरेच्छारूपा शक्तिः। **अस्माच्छब्दादयमर्थो बोद्धव्यः** इति अर्थविशेष्यकेच्छास्थले एतदर्थविशेषक-एतच्छब्दजन्यबोधविषयत्वप्रकारकेच्छा एव शक्तिः, एवं पदविशेष्यकेच्छास्थले इदम्पदविशेष्यक-इदम्पदार्थविषयकबोधजनकत्वप्रकारकेच्छा शक्तिरूपा।

जिज्ञासा जायते, ईश्वरेचछा यदि शक्तिस्तर्हि सा इच्छा समवायसम्बन्धेन ईश्वरात्मनि एव वर्तते, नान्यत्र, न वा पदे। तेन कथं पदस्य शक्तिविशिष्टत्वम् अर्थात् शक्तत्वम्? अतः पदस्य शक्त्यभावात् पदात् अर्थबोधो न स्यात्। सत्यम्, ईश्वरेच्छा समवायेन ईश्वरात्मनि एव वर्तते। तथापि यदा

पदाद् अर्थबोधो भवति, तदा ईश्वरेच्छा न समवायसम्बन्धेन, परन्तु विषयता नाम विशेष्यतासम्बन्धेन पदे एव सत्त्वात् पदस्य शक्तत्वं सम्भवति। पुनरपि आकाङ्क्षा जायते, ईश्वरेच्छा एका एवं सर्वविषयिणी। विषयभेदेन कालभेदेन इच्छा भेदो नास्ति ईश्वरस्य। यदि एवं तर्हि विषयतासम्बन्धेन ईश्वरेच्छायाः सर्वत्र सत्त्वात् घटपदात् पदस्यापि बोधो भवतु, यतः एकैव इच्छा सर्वविषयिणी परन्तु घटपदात् घटस्यैव बोधो भवति, न पटादेः।

सत्यम्, विषयतासम्बन्धेन ईश्वरेच्छा सर्वविषये अस्ति। परन्तु यदा घटपदात् घटस्य बोधो भवति, तदा ईश्वरेच्छा न केवलं विषयतासम्बन्धेन, परन्तु विशेष-विशेष्यतारूपविषयतासम्बन्धेन। इदमत्र अवगन्तव्यं यत्, अर्थविशेष्यक-पदविशेष्यकभेदेन ईश्वरेच्छा द्विविधा। **अस्माच्छब्दादयमर्थो बोद्धव्यः** इति अर्थविशेष्यकेच्छास्थले अर्थात् **घटपदात् घटो बोद्धव्यः** इत्यत्र

**घटरूपार्थविषयकबोधजनकतात्वावच्छिन्नप्रकारतानिरूपितवि-शेष्यता**सम्बन्धेन ईश्वरेच्छा पदे, एवं **घटपदज्ञानजन्यबोधविषयतात्वावच्छिन्नप्रकारतानिरूपितविशे-ष्यता**सम्बन्धेन अर्थे सत्त्वात्, पदे पदार्थे च ईश्वरेच्छाया विद्यमानत्वात् पदस्य शक्तत्वम्, अर्थस्य शक्यत्वम् निर्बाधम्।

अथवा **घटपदं घटरूपमर्थं बोधयतु** इत्याकारिका पदविशेष्यकेच्छा अर्थात् घटरूपार्थबोधजनकतात्वावच्छिन्न-प्रकारतानिरूपितघटपदत्वावच्छिन्नविशेष्यताशालिनी इच्छा **विशेष्यता**सम्बन्धेन घटपदे, एवं **प्रकारतावच्छेदकताव-च्छेदकत्व**सम्बन्धेन अर्थे सत्त्वात्, एवं **घटपदात् घटरूपार्थो बोद्धव्यः** इत्याकारिका अर्थविशेष्यकेच्छा, अर्थात् घटपदजन्यबोधविषयतात्वावच्छिन्नप्रकारतानिरूपितघटत्वाव च्छिन्नविशेष्यताशालिनी इच्छा **विशेष्यता**सम्बन्धेन घटरूपार्थे, एवं **प्रकारतावच्छेदकतावच्छेदकत्व**सम्बन्धेन घटपदे सत्त्वात् पदे पदार्थे च ईश्वरेच्छायाः विद्यमानत्वात् पदस्य शक्तत्वम् अर्थस्य च शक्यत्वं निर्विवादम्। अतः

इच्छायाः आत्मगुणत्वेऽपि उक्तविशेष्यत्वादिसम्बन्धेन पदे पदार्थे च सत्त्वम् अव्याहतम्।

यद्धवतु, शब्दार्थयोर्मध्ये समय एव सम्बन्धः। अभिधानाभिधेयनियमनियोग एव समयः। अभिधाना-भिधेययोः नियमः गोशब्दस्य सास्नादिमानेवार्थः, घटशब्दस्य कम्बुग्रीवादिमानेवार्थः, अश्वशब्दस्य केसरादिमानेवेति व्यवस्था। तस्मिन् नियोगः बोद्धव्यः इति परमेश्वरस्य सर्गादौ इच्छाविशेषरूपः संकेतः।

नव्यमते ईश्वरेच्छा न शक्तिः, परन्तु इच्छैव। तेनाधुनिकसंकेतितेऽपि शक्तिरस्त्येव। ईश्वरेच्छायाः शक्तित्वेऽपि आधुनिके नाम्नि शक्तिरस्ति। एकादशदिनाधिकरणकपुत्रत्व-समानाधिकरणतत्तत्बालपिण्डत्वविशिष्टविषयकबोधजनकत्वव-त्पित्रभिलषितनामत्वसमानाधिकरणचैत्रत्वादिधर्मविशिष्टचै-त्रादिनामविषयककृतिमान् पिता भवतु इत्याकारिका ईश्वरेच्छा या आधुनिके चैत्रादिनाम्नि अस्ति।

नैयायिकानां मते वर्णा एव समुदिताः पदवाक्यभावमापन्नाः अर्थप्रत्यायकाः। भाष्यकारेणोक्तं **वाक्यस्थेषु खलु वर्णेषु उच्चरत्सु प्रतिवर्णं तावत् श्रवणं भवति। श्रुतं वर्णम् एकम् अनेकं वा पदभावेन प्रतिसन्धत्ते। प्रतिसन्धाय पदं व्यवस्यति। पदव्यवसायेन स्मृत्या पदार्थं प्रतिपद्यते। पदसमूहप्रतिसन्धानाच्च वाक्यं व्यवस्यति संबद्धान् च पदार्थान् गृहीत्वा वाक्यार्थं प्रतिपद्यते** इति।

यद्भवतु, संस्कारकरणकं हि स्मरणम्। तच्च सद्यः प्रलीने चिरप्रलीने वा विषये न विशिष्यते इत्येवं पूर्वेषां पदानां चिरतिरोहितानां व्यवहितोच्चारितानां च संस्कारात् स्मरणं भविष्यति। अन्तिमपदस्य चानुभूयमानत्वोपगमे ज्ञानयौगपद्यादिप्रमादप्रसङ्गात् अन्त्यपदस्यापि स्मर्यमाण-त्वमस्तु। स्मृत्यारुढान्येव सकलपदानि वाक्यार्थमवगमयन्ति। तद्यथा, वर्णक्रमेण तावत् प्रथमपदज्ञानम्, ततः संकेतस्मरणं संस्कारश्च युगपत् भवतः। यद्यपि ज्ञानयोर्हि यौगपद्यं शास्त्रे प्रतिषिद्धं तथापि संस्कारज्ञानयोः यौगपद्यं न

प्रतिषिद्धम्। ततः पदार्थज्ञानं, तेनापि संस्कारः। एवम्प्रकारेण पुनरपि वर्णक्रमेण द्वितीयपदज्ञानम्। ततः संकेतस्मरणं पूर्वसंस्कारसहितेन च तेन पटुतरसंस्कारः। पुनः वर्णक्रमेण तृतीयपदज्ञानं संकेतस्मरणं पूर्वसंस्कारापेक्षः पटुतरसंस्कारः इत्येवं पदज्ञानजनिते पीवरेसंस्कारे पदार्थज्ञानजनिते च तादृशसंस्कारे स्थिते अन्त्यपदार्थज्ञानानन्तरं पदसंस्कारात् सकलपदविषयकस्मृतिः पदार्थसंस्काराश्च सकलपदार्थ-विषयकस्मृतिरिति क्रमेण द्वे स्मृती भवतः। तत्र एकस्यां स्मृतौ उपारूढः पदसमूहः वाक्यम् इतरस्यां स्मृतौ उपारूढः पदार्थसमूहः वाक्यार्थः। इदमत्रावधेयं परस्परसंसृष्टपदार्थ-समुदाय एव वाक्यार्थः संसर्गस्तु स्वरूपतः न वाक्यार्थः अपदार्थत्वात्। न्यायनये संसर्गस्तु आकाङ्क्षाभास्यः। उक्तञ्च गदाधरभट्टाचार्येण **शाब्दबोधे चैकपदार्थे अपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते** इति अर्थात् पदार्थद्वयस्य यः संसर्गः स शाब्दबोधे आकाङ्क्षाबलेन भासते। शुद्धा एव पदार्थाः पदैरभिधीयन्ते। पदाभिहितास्ते परस्परमाकाङ्क्षा-सन्निधियोग्यत्वपर्यालोचनया संसर्गमवगमयन्ति।

अपरे नैयायिकाः वदन्ति यत्, वर्णानां पदानाञ्च उच्चरितप्रध्वंसिनां युगपत् अवस्थित्यभावेन वस्तुभूतबाह्य-संघातासम्भवेऽपि पूर्वपूर्वाणि यानि पदानि तावत् विषयाः याः समूहालम्बनात्मिका स्मृतिः तत् सह कृतम् अन्त्यमेव पदं नश्यदवस्थेन श्रावणप्रत्यक्षरूपेणानुभावेन विषयी क्रियमाणम् वाक्यमिति रीत्या स्मृत्यनुभवरूपाभ्यां बुद्धिभ्यां युगपत् उल्लेख्यात् यौगपद्योपपत्त्या बौद्धसंघातः सम्भवति। विभुविशेषगुणद्वयस्य युगपत् अवस्थितिः विरुद्धा तथापि उत्पद्यमानावस्थया स्मृत्या विनश्यदवस्थस्यानुभवस्य न विरोधः।

शाब्दबोधो नाम शब्दजन्यं ज्ञानम्। शब्दो नाम परस्परान्वितार्थप्रतिपादकपदसमूहात्मकं वाक्यम्। अनेकपदार्थसंसर्गावगाहि ज्ञानं शाब्दबोध इति। अप्रधानभूतानेकपदार्थविशिष्टः एकः प्रधानपदार्थः शाब्दबोधे भासते इति सर्वे वदन्ति। स एव मुख्यपदार्थः। इतरपदार्थाः साक्षात् परम्परया वा तद्विशेषणतया भासन्ते।

व्युत्पत्तिवादग्रन्थे गदाधरभट्टाचार्येणोक्तं **प्रत्ययाश्च विभक्तिकृत्तद्धितादिभेदेन नानाविधाः। विभक्तिश्च सुप्तिङ्भेदेन द्विविधा। सुब्विभक्तयः प्रथमाद्वितीयादयः सप्त। तत्र प्रथमार्थः प्रकृत्यर्थे विशेषणविधया अन्वयिनी संख्यैव। अत एव यत्र विशेष्यवाचकसमानविभक्तिकपदं निपातपदं वा नास्ति तत्र प्रथमान्तार्थस्य विशेष्यभासकसामग्र्यभावादसौ मुख्यविशेष्यतयैव भासते** इति प्रथमान्तार्थमुख्यविशेष्यकबोधः नैयायिकैः स्वीकृतः। यथा **देवदत्तः तण्डुलं पचति** इत्यत्र तण्डुलपदोत्तरद्वितीयायाः कर्मत्वमर्थः। तत्राधेयतासम्बन्धेन तण्डुलस्य अन्वयः। कर्मत्वस्य निरूपकतासम्बन्धेन धात्वर्थे पाके अन्वयः। आख्यातार्थः कृतिः। तत्र अनुकूलत्वसम्बन्धेन धात्वर्थपाकस्य अन्वयः। कृतेः आश्रयतासम्बन्धेन देवदत्ते अन्वयः। तेन **तण्डुलनिष्ठकर्मतानिरूपकपाकानुकूलकृतिमान् देवदत्तः** इति प्रथमान्तार्थमुख्यविशेष्यकबोधः।

**देवदत्तेन पच्यते तण्डुलः** इत्यत्र तृतीयार्थः कृतिः। तत्र देवदत्तस्य समवायेन अन्वयः। कृतेर्जन्यतासम्बन्धेन

धात्वर्थपाके अन्वयः। आख्यातस्य कर्मत्वमर्थः। तत्र निरूपितत्वसम्बन्धेन पाकस्य अन्वयः। कर्मत्वस्य आश्रयतासम्बन्धेन प्रथमान्तार्थे तण्डुले अन्वयः इति **देवदत्तसमवेतकृतिजन्यपाकनिरूपितकर्मतावान् तण्डुलः** इति शाब्दबोधः।

इदमत्रावगन्तव्यं यत् जयन्तभट्टेन फलमुख्यविशेष्यको बोधः स्वीकृतः। तदनुसारेण **देवदत्तः तण्डुलं पचति** इति वाक्यात् **देवदत्तसमवेतकृति-जन्यपाकजन्या तण्डुलनिष्ठा विक्लित्तिः** इति बोधः।

प्राचीनमते प्रथमक्षणे पदज्ञानं द्वितीयक्षणे स्थितिः तृतीयक्षणे पदार्थस्मरणं चतुर्थक्षणे पदार्थस्मरणस्थितिः पञ्चमक्षणे शाब्दबोधः। नव्यमते प्रथमक्षणे आकाङ्क्षाविशिष्टपदज्ञानम् अर्थात् तत्तत्पदानुभवजन्य-संस्कारजन्यसमूहालम्बनपदस्मरणम्। द्वितीयक्षणे अव्यव-धानत्वविशिष्टपदार्थोपस्थितिः अर्थात् तावत्पदार्थविषयक-समूहालम्बनं स्मरणम्। नव्यमते योग्यताज्ञानं न

शाब्दबोधकारणम्, अतः तृतीयक्षणे तात्पर्यज्ञानं तथा चतुर्थक्षणे शाब्दबोधः। तात्पर्यज्ञानस्य कारणता यदि अस्वीकृता भवति तर्हि तृतीयक्षणे एव शाब्दबोधो भवति।

जगदीशतर्कालङ्कारमते आकाङ्क्षादिज्ञानचतुष्टयस्य शाब्दबोधकारणत्वं नास्ति। तेन तन्मते आनुपूर्वीविशिष्टपदज्ञानत्वरूपेण पदज्ञानं शाब्दबोधकरणम्, आनुपूर्वीरूपायाः आकाङ्क्षायाः ज्ञानमन्यथासिद्धं कारणतावच्छेदकत्वात्। सान्निध्यविशिष्टपदार्थोपस्थितित्व-रूपेण पदार्थोपस्थितिः व्यापारः।

-----------------------

# वैदिकवाङ्मये शब्दार्थसम्बन्धसमीक्षा

इत्याख्यः प्रबन्धः ड.अन्नदाशङ्करपाहाडिमहोदयप्रस्तुतः

शब्दमयमिदं जगत्। न केवलं मनुष्यकण्ठोच्चारितः शब्द एव शब्दः, अपि तु विद्यते संसारेऽस्मिन् शब्दजातं बहुविधम्। बृहदारण्यकोपनिषदि (1.1.1) विद्युतो विद्योतनं वायोः प्रवहणं मेघानां वर्षणमित्यादिकमपि शब्दकोटौ सन्निवेशितम्।(1) आम्नातञ्च - 'यद्विजृम्भते तद्विद्योतते, यद्विधूनते तत् स्तनयति। यन्मेहति तद्वर्षति वागेवाऽस्य वाक्'। सा एषा वाक् वक्त्रा अभिव्यक्तस्य ज्ञानस्य माता मनस्तु पिता। तयोः मातृपितृरूपेण वाङ्मनस्संयोगेनैवोत्पद्यते नादात्मकः प्राणरूपः पुत्रः - पिता माता प्रजैत तव, मन एव पिता, वाङ्माता, प्राणः पुत्रः।(2) शब्दाभावे जगदिदं गाढान्धकारेण निमज्जितमभविष्यद् लोकव्यवहारादिकमपि अप्रचलित-मासीदित्याशङ्का प्रकाशिता आलङ्कारिकप्रवरेण दण्ड्याचार्येण काव्यादर्शे -

'इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्।

यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।।'(3)

शब्दज्योतिषा समुद्भासितं सत् जगदिदं प्रकाशते। मनुष्यसंसारे शब्दहीनं मुहूर्त्तमात्रमप्यकल्पनीयम्। लोकव्यवहारस्तु सर्वथा शब्देनैव सम्पद्यते इति के तावदस्वीकुर्वन्ति? मानवमनोभावप्रकाशः सर्वदा शब्दाधीन एव। जगति सर्वं ज्ञानं शब्दैरेव प्रकाशितं भवति। उक्तञ्च वाग्योगविदा भर्तृहरिणा-

'न सोऽस्ति प्रत्ययो लोके यं शब्दानुगमादृते।

अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।।'(4)

अतो वाचां व्यवहारोपयोगित्वं तु सिद्धमेव। इति कर्तव्यताज्ञानम् अर्थात् इदमेवं कर्तव्यमिति ज्ञानं वाग्व्यवहारमाश्रित्यैव सम्पद्यते - 'इति कर्तव्यता लोके सर्वा शब्दव्यपाश्रया' इति। तत् किञ्चन उपदेष्टृबुद्धिस्थं

प्रतिपर्त्तृबुद्धिस्थं वा ज्ञानं न भवति यच्छब्दानुबेधशून्यं भवति। अतो न ज्ञानस्य शब्दरहितत्वमस्ति।

शब्देनार्थः प्रकाशितो भवतीति विदितमेव सर्वेषाम्। किन्तु न सर्वेण शब्देन सर्व अर्थः प्रकाशितो भवति यद्वा यः कोऽपि शब्दो यं कमप्यर्थं न प्रकाशयति। शब्दार्थविषये अस्ति कश्चिद्व्यापारो नियतः। तत्रास्ति कश्चित् सम्बन्धविशेषो यमाश्रित्य विशिष्टः शब्दो विशेषमर्थं प्रकाशयति। शब्दार्थसम्बन्धमधिकृत्य प्रचलति तु महान् विचारो भारतवर्षे आ वैदिककालात् शब्दविद्यासु दर्शनशास्त्रेषु अलंकारशास्त्रेषु च। अश्रुतशब्दाद् अगृहीतसम्बन्धशब्दाच्च न कदापि भवत्यर्थवोध इत्यस्माज्ज्ञायते यच्छब्दार्थयोरस्ति कश्चन सम्बन्धविशेषः। शब्दार्थयोः सम्बन्धास्वीकरणादेकेन शब्देन सर्वेषामर्थानां प्रत्यायनमथवा सर्वैः शब्दैरेकार्थप्रत्यायनं भवतीत्यापत्तिस्तु दुर्वारा। शब्दविदां मतानुसारत उपायचतुष्टयेन शब्दार्थयोः सम्बन्धो ज्ञायतेऽस्माभिः, तद् यथा- वृद्धव्यवहारेण, लोकागमेन, विनियोगेन बाल्ये पित्रा मात्रा वा

'अयं गौ'-रित्युच्चारणात् संकेतग्रहणात् शिशोः तस्मिन् पशौ गोज्ञानं भवति। लोकेऽस्मिन् प्रचलति वृद्धव्यवहारः। शब्दशास्त्रं लोकमेवानुसरति सर्वथा, तान् च शब्दान् नियमयति। शब्दस्यार्थे विनियोगात् प्रयोगाद्वा सम्बन्धज्ञानं भवति। प्रयोगमृते न कोऽपि शब्दः अर्थं द्योतयितुं सम्बन्धज्ञानं वा जनयितुं समर्थो भवति। भणितं भर्तृहरिणा -

'विनियोगादृते शब्दो न अर्थस्य प्रकाशकः।

अर्थाभिधानसम्बन्धो युक्तिद्वारं प्रचक्षते।।'(5)

वक्तुः श्रोतुश्च भावनाऽपि शब्दार्थसम्बन्धज्ञाने हेतुत्वं भजते। स्फटिकं श्वेतमपि यथा रक्तनीलादीनां पदार्थानां संस्पर्शवशात् रक्तनीलादिवत् प्रतीयते, शब्दोऽपि वक्तृभावानुसारत अर्थज्ञानं जनयति। बोद्धा तत्र संकेतद्वारेण शब्दार्थयोर्वाच्यवाचकसम्बन्धं स्थापयति। उक्तञ्च वाक्यपदीये-

'स्फटिकादि यथा द्रव्यं भिन्नरूपैरुपाश्रयैः।

स्वशक्तियोगात् सम्बन्धं ताद्रूप्येणोपगच्छति।।'(6)

शब्दशास्त्रविदः शब्दार्थयोस्तादात्म्यसम्बन्धमङ्गी-कुर्वन्ति। उक्तञ्च भगवता पतञ्जलिना महाभाष्ये यच्छब्दार्थयोरभेदत्वस्मरणमेव संकेतो भवति। तेषां खलु शब्दविदां मतानुसारेण शब्दानामर्थरूपेण विवर्तनेमव तादात्म्यम्। तत्त्वादप्रच्युतपदार्थस्य मिथ्याप्रतीतिरेव विवर्त्तः। उक्तञ्च सदानन्दयोगीन्द्रेण वेदान्तसारे - 'अतत्त्वतोऽन्यथा प्रथा विवर्त्त इत्युदीरितः'; यथा - शुक्तौ रजतज्ञानम्। न खलु शब्दार्थयोर्वास्तवतादात्म्यं तैरङ्गीकृतं, शब्दार्थयोस्तु काल्पनिकाभेदप्रतीतिवशादेव तत्तादात्म्यं स्वीकृतम्। कथितञ्च वैयाकरणोत्तमेन नागेशेन - 'तादात्म्यञ्च तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम्' इति।(7)

आचार्येण भर्तृहरिणा शब्दार्थयोः कार्यकारणभावात्मकं योग्यतालक्षणमिति सम्बन्धद्वयं स्वीकृतम्। शब्दश्रवणानन्तरमर्थो ज्ञायते। अतः शब्दस्य पूर्वभावित्वादर्थस्य च परभावित्वात्तयोः कार्यकारणभावात्मकः सम्बन्धः सिध्यति। यथाह भर्त्तृहरिः -

'शब्दः कारणमर्थस्य स हि तेनोपजन्यते।

तथा च बुद्धिविषयादर्थाच्छब्दः प्रतीयते।।'(8)

अनादिकालाच्चक्षुरादीनामिन्द्रियाणां रूपादिविषय-ग्रहणसामर्थ्यवच्छब्दविशेषास्तावदर्थविशेषबोधका भवन्ति। अतोऽस्ति योग्यतालक्षणसम्बन्धः शब्दार्थयोः। कथितं वाक्यपदीये -

'इन्द्रियाणां स्वविषयेषु अनदिर्योग्यता यथा।

अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा।।'(9)

पदशास्त्रे शब्दार्थयोरयं सम्बन्धः स्वीकृतः। वृद्धव्यवहारादिसंकेतग्रहणद्वारेण तत्र शब्दतोऽर्थस्य प्रतिपत्तिर्जायते। तत्र शब्दविशेषादर्थविशेषस्य प्रतीतिर्भवति; न खलु यस्मात् कस्मादपि शब्दाद् यस्य कस्याप्यर्थस्य प्रतीतिः।

वाक्यशास्त्रे अर्थात् मीमांसाशास्त्रे शब्दार्थयोः सम्बन्धमधिकृत्य परिलक्ष्यते विचारो वैशद्येन। शब्दश्रवणानन्तरमर्थज्ञानस्य सर्वानुभवसिद्धत्वाच्छब्दार्थयोः

सम्बन्धविचारो मीमांसाशास्त्रे विशेषेण कृतः। मीमांसासूत्रकारस्य भगवतो जैमिनेर्मतानुसारतः शब्दो वर्णात्मको जातिः आकृतिर्वा अर्थात्मकः। एतयोर्नित्यत्वात् शब्दार्थयोः सम्बन्धः औत्पत्तिकः स्वाभाविको नित्यो वा। उक्तञ्च जैमिनिसूत्रे - 'औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः।'(10) शब्दार्थयोर्मध्ये न संयोगः, समवायः, कार्यकारणभावो नाप्याश्रयाश्रयिभावः सम्बन्धः सम्भवेत्। संयोगः पदार्थद्वयनिष्ठः सम्बन्धः। संयुक्तं पदार्थद्वयमेकदेश एव तिष्ठति। यथा- कपिसंयोगी वृक्षः। संयोगस्यैकदेशत्वात् शब्दार्थयोः संयोगसम्बन्धे स्वीकृते सति क्षुरशब्दोच्चारणाद् यथा मुखक्षतोत्पत्तिः स्यात्तथा मोदकशब्दोच्चारणान्मुखं मोदकपूर्णं जायेत। तदुक्तं शावरभाष्ये (1.1.5) - 'क्षुरमोदकशब्दोच्चारणे मुखस्य पाठनपूरणे स्याताम्' इति। अतो भिन्नदेशवर्त्तित्वाद् बिन्ध्यहिमालयौ यथा परस्परसम्बन्धहीनौ भवतस्तथैव नैकस्थानवर्तित्वात् (शब्दस्य वक्तरि अर्थस्य च श्रोतरि स्थितत्वात्) शब्दार्थावपि परस्परं सम्बन्धहीनौ भवतः। नापि शब्दार्थयोः सम्बन्धः समवायो भवेत्। अयुतसिद्धपदार्थयोः

सम्बन्धस्तावत् समवायः। ययोर्द्वयोरेकमपराश्रितमवतिष्ठते तावयुतसिद्धौ, यथा द्रव्येषु गुणाः। दण्ड-पुरुषवत् शब्दार्थयोर्युतसिद्धत्वात् तयोः सम्बन्धः न समवायः। शब्दार्थौ नायुतसिद्धौ शब्दानां वक्तृमुखावस्थानाद् घटादीनां तु भूतलवर्तित्वात्। न तयोः कार्यकारणसम्बन्धोऽपि सम्भवति। वीजाङ्कुरवत् कार्यकारणयोः कारणं पूर्वभावि कार्यं तु परभावीति प्रसिद्धमेव। स्वीकृते तयोः कार्यकारणभावसम्बन्धे शब्दः कारणमर्थश्च कार्यं भवेत। तेन कार्यात्मकस्यार्थस्यानित्यापत्तिर्भवति। मीमांसानये तु ज्ञात्यात्मकस्यार्थस्य न कार्यत्वमनित्यत्वं वा सिध्यति, तस्य नित्यत्वमेव प्रसिद्धम्। उक्तञ्च शास्त्रदीपिकायाम्- 'न च कार्यकारणभावः द्वयोरपि नित्यत्वात्।'(11) शब्दार्थयोर्नाप्याश्रयाश्रयिभावो घटभूतलादिवत् सम्भवति तयोर्भिन्नाश्रयत्वात् शब्दस्याश्रय आकाशः अर्थस्याश्रयो भूतलम्। उक्तञ्च शास्त्रदीपिकाया युक्तिस्नेहप्रपूरणीटीकायाम्- 'नाप्याश्रयाश्रयिभाव आकाशपृथिव्यादिभिन्नाश्रयसद्भावा-दिति।' एतेषां सम्बन्धानामभावादपि शब्दार्थयोर्मध्ये कमपि

सम्बन्धविशेषं मीमांसकाः स्वीकुर्वन्ति। एकस्य सम्बन्धिनो ज्ञानं सम्बन्ध्यन्तरस्मारकत्वात् शब्देनार्थबोधो भवति। अतस्तेषां मतानुसारतः शब्दार्थयोर्वाच्यवाचकसम्बन्धः स्वीकर्तव्यः। शब्दार्थयोर्वाच्यवाचकसम्बन्धानङ्गीकाराल्लोक-वाधनं समुपजायते। अयमाशयः - शब्दार्थयोर्मध्ये वाच्यवाचकभावो नास्तीत्यस्य ज्ञापनमपि वाच्यवाचकसम्बन्धस्वीकारसापेक्षः। तदुक्तं कुमारिलभट्टपादैः-

'वाच्यवाचकसम्बन्धनिषेधे लोकवाधनम्।

विरोधश्च स्ववाक्येन न हि सम्बन्धवर्जितैः।।'[12]

शब्दार्थयोर्वाच्यवाचकसम्बन्धमाश्रित्य यदि वयं शब्दार्थयोर्मध्ये वाच्यवाचकभावो नास्तीति ज्ञापयितुं यतामहे तर्हि तत्र 'आजीवनमहं मौनी' इतिवत् स्ववचनविरोधो दुर्निवार एव। वस्तुतस्तु सम्बन्धशून्यपदैः परप्रत्यायनमसम्भवमेव। अतो वाचकेन शब्देन वा वाच्यस्य अर्थस्य वा बोधः सम्भवेदिति हेतोस्तयोरीदृशः सम्बन्धः स्वीकर्तव्यः। शब्दश्रवणानन्तरमर्थप्रतीतिर्जायते शब्दा-

श्रवणान्नार्थबोध इत्यन्वयव्यतिरेकाभ्यां शब्दार्थयोर्वाच्य-वाचकसम्बन्धः स्थिरीक्रियते। यद्यप्यर्थप्रकाशे सम्बन्धज्ञानमपेक्षितं भवति तथापि तत्र शब्दानां कापि नैसर्गिकी शक्तिरस्तीति स्वीकर्तव्यम्।

मीमांसानये शब्दार्थयोरयंसम्बन्धो नित्यो, न कृतकः, तादृशस्य सम्बन्धस्यैतावत्कालपर्यन्तं कर्तुरदर्शनात्। विशेषेण हि वैदिकपदानां पदार्थानाञ्च सम्बन्धकर्तुरसद्भावो वर्तते। 'अमुकेन वेदः कृतः' इति वदितुं न कोऽपि शक्नोति। सति तु वेदकर्त्तरि तन्नामस्मरणमवश्यमेवोचितं स्यात्। नापि अर्थापत्त्या वैदिकपदपदार्थयोः सम्बन्धकर्त्ता कोऽपि सिध्यति, शब्दार्थसम्बन्धज्ञानस्यानादित्वात् सम्बन्धकर्तुरभावाच्च वेदस्यापौरुषेयत्वं नित्यत्वञ्च निर्विवादमेव।'

प्रमाणशास्त्रे तर्कशास्त्रे वा प्रमितिचतुष्टयं स्वीकृतमस्ति-प्रत्यक्षानुमित्युपमितिशाब्दश्चेति। तत्र शाब्दप्रमाणे शाब्दबोध अर्थवता शब्देनोत्पद्यते। आदौ शब्दा उच्चारिता भवन्ति, ततः श्रुताः शब्दाः स्वेषामर्थानां स्मृत्युत्पादनद्वारेण श्रोतुरर्थबोधं

जनयन्ति। पदात् पदार्थोपस्थितिः 'एकसम्बन्धिज्ञान-मपरसम्बन्धिस्मारकम्' इति स्मृतिनियमानुसारतः सम्पद्यते। पदार्थयोः सम्बन्धसद्भावे द्वयोरेकस्य ज्ञानमन्यस्य स्मारकं भवति। शब्देन सहासम्बद्धस्यार्थस्य स्मरणं कदापि न भवति। शब्देन यदृच्छालब्धेऽर्थे स्मृते येन केनापि शब्देन यस्य कस्याप्यर्थस्य स्मरणाच्छाब्दवोधः सञ्जायेत। अतः सिद्धमेतद् यत् सम्बन्धविशिष्टाच्छब्दादेवार्थबोधे भवेत्। शब्दार्थयोरेष शाब्दबोधसहायकः सम्बन्धः खलु वृत्तिरित्यभिधयाभिधीयते। सैषा वृत्तिः अभिधा (सङ्केतः) लक्षणा चेति द्विधा। उक्तञ्च नैयायिकवरेण गदाधरेण - 'सङ्केतो लक्षणा चार्थे पदवृत्तिः।'(13) यद्यापि नैयायिका वृत्तिद्वयमुररीकुर्वन्ति तथापि आचार्येषु वृत्तसंख्याविषयिणी विप्रतिपत्तिः परिलक्ष्यते। वैशेषिका वैयाकरणाश्च अभिधा लक्षणा चेति वृत्तिद्वयमङ्गीकुर्वान्ति। अभिधावृत्तमातृकाग्रन्थप्रणेता मुकुलभट्टः व्यक्तिविवेककारो महिमभट्टश्च अभिधेति वृत्तिमेकां स्वीकारोति। वैदान्तिकेषु केचन अभिधां लक्षणाञ्चातिरिच्य गौणी इत स्वतन्त्रां वृत्तिमङ्गीकुर्वन्त। मीमांसकानां

मतानुसारतो वृत्तित्रयमस्ति अभिधा-लक्षणा-गौणी चेति। आलङ्कारिकप्रवरेण मन्मटाचार्येण विश्वनाथ कविराजेन च अभिधा-लक्षणा-व्यञ्जना-तातपर्येति चतस्रो वृत्तय अङ्गीकृताः।

न्यायशास्त्रे सङ्केताख्या वृत्तिः स्वीकृता। सा सङ्केताख्या वृत्ति अभिधा शक्तिरिति नाम्नापि अभिधीयते। सर्वेषां शब्दानां कोऽपि प्रसिद्धो मुख्यार्थोऽस्तीति मन्यन्ते विवुधाः येन व्यापारेण यया शक्त्या वा शब्देन लोकप्रसिद्धो मुख्यार्थो द्योत्यते स व्यापारः संकेत-अभिधा चेति संज्ञया व्यपदिश्यते। उक्तञ्च गदाधरभट्टाचार्येण - 'इदं पदमिममर्थं बोधयतु' इति 'अस्माच्छब्दादयमर्थो बोद्धव्य' इति वेच्छा सङ्केतरूपा वृत्तिः। ईश्वरसङ्केतः शक्तिः तया चार्थबोधकं पदं वाचकं यथा गोत्वाविशिष्टबोधकं गवादिपदं, तद्बोध्योऽर्थो गवादिर्वाच्यः स एव मुख्यार्थ इत्युच्यते।'(14) पदं वाचक अर्थस्तु वाच्यः। त्रीणि तावद्वाचकपदानि भवन्ति-यौगिक-रूढ-योगरुढ इत्यादीनि। तत्र प्रकृतिप्रत्ययनिष्पन्नः शब्दो यौगिकः, यथा- पाचकः (पच्+ण्वुल्), पाठकः (पठ्+ण्वुल्) इति।

लोकप्रसिद्धार्थद्योतकः शब्दः रूढ़ः, यथा- गौः, मण्डपः इति। प्रकृतिप्रत्यययाद्यवयवशक्त्याः समुदायशक्त्याश्च संमिश्रणाद् यदा पदं स्वार्थं प्रकाशयति तदा तस्य योगरूढ़शब्देन व्यपदेशो भवति, ततोदाहरणं यथा-पङ्कजम्। अत्र पङ्के जायते यत् तदिति यौगिकोऽर्यो यथा सङ्गच्छते तथा समुदायेन केवलं पद्मेऽपि तस्य शक्तिः स्वीक्रियते। केषाञ्चन मतानुसारतो यौगिकरूढ़ो रूढ़यौगिको वेति चतुर्थः कोऽपि शब्दोऽस्ति - यत्र क्वचिद् यौगिकस्यार्थस्य क्वचिद् रूढार्थस्य वा बोधो भवति। तरुगुमादिवोधक उद्भिद्शब्दो यौगिको मृद्भेदेन तस्योध्र्वोत्थानात्। पुनर्यागविशेषवाचक उद्भिद्शब्दो रूढ़ः कोवलं यागविशेषवोधने तस्य प्रसिद्धित्वात्। शब्दविद आलङ्कारिकाश्च मन्यन्ते, सङ्केत अभिधा वा जाति-गुण-द्रव्य-क्रियेत्येतेषु गृह्यते- 'सङ्केतो गृह्यते जातौ गुणद्रव्यक्रियासु च।'(15)

मुख्यार्थेन सह युक्त अपि तु न मुख्यार्थ इत्यर्थो यया वृत्त्या ज्ञायते सा खलु वृत्तिः लक्षणा-भक्ति-उपचार इत्यादिभिः नामभिरभिधीयते। उक्तञ्च विश्वनाथेन -

'मुख्यार्थवाधे तद्युक्त ययान्योऽर्थः प्रतीयते।

रूढ़ेः प्रयोजनाद्वासौ लक्षणा शक्तिरर्पिता।।'(16)

रूढ़िमूला लक्षणा यथा - कलिङ्गाः साहसिकः कलिङ्ग कलिङ्गदेशवासी। प्रयोजनमूला लक्षणा यथा - गङ्गाय़ां घोषः। शैत्यपावनत्वादिकमस्याः लक्षणायाः प्रयोजनम्।

आलङ्कारिकेषु केचन तात्पर्याख्यां काञ्चन वृत्तिमङ्गीकुर्वन्ति। वाक्यस्थानां पदानां ये खलु अर्थाः सन्ति तेषा मर्थानामन्वयवोधिका या शक्तिर्वृत्तिर्वा सा तात्पर्यवृत्तिरिति नाम्ना परिचीयते। साहित्यदर्पनटीकायामुक्तं रामचरणतर्कवागीशमहोदयेन - 'अभिधाया एकैकपदार्थ-बोधनविरामाद् वाक्यार्थारूपस्य पदार्थान्वयस्य बोधिका तात्पर्यं नाम वृत्तिः। तत्रेदाहरणं यथा - गामानय। अत्र 'गाम्'

इत्यनेन कर्मत्वम एकत्वसंख्या इत्यादयः, 'आनय' इत्यनेन लोडर्थक अनुज्ञाभावः मध्यमपुरुष एकत्वसंख्या इत्यादय अर्था द्योत्यन्ते। एतेषामन्वयशक्त्या लोडर्थकर्त्रा गोत्वावच्छिन्नगोव्यक्तेरानयनकर्म प्रकाशितं भवति।

केवलमालङ्कारिकैर्व्यञ्जनावृत्तिः स्वीक्रियते। अभिधाद्या वृत्तयः स्वस्वव्यापारं सम्पाद्य यदा उपक्षीणा भवन्ति तदा सहृदया यया वृत्त्या अभिधा-लक्षणा-तात्पर्यसातिरिक्तमर्थमास्वादयन्ति या खलु व्यञ्जनेति अभिधीयते। कथितञ्च विश्वनाथेन साहित्यदर्पणे -

'विरतास्वाभिधाद्यासु ययार्थो वोध्यतेऽपरः।

सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च।।'(17)

'गङ्गायां घोषः' इत्यत्र जलमयाद्यर्थं वोधयित्वा अभिधा विरमते, तटाद्यर्थं वोधयित्वा लक्षणा उपक्षीयते; ततो व्यञ्जनया शैत्यपावनत्वाद्यर्थो वोध्यते। काव्ये खलु

व्यञ्जनावृत्तिलब्धस्य व्यङ्गार्थस्य प्रचुरः प्रयोगः परिदृश्यते। यथास्मिन्नुदाहरणे -

'कालो मधुः कुपित त्रष च पुष्पधन्वा

धीरा वहन्ति रतिखेदहराः समीराः।

केलीवनीयमपि वञ्जुलकुञ्जमञ्जु-

दूरे पतिः कथय किं करणीयमद्य।।'

अत्र वसन्तकाले दूरपतिकाया रतिपीढ़िताय़ाः कस्यापि कान्तायाः सखिजनाय प्रच्छन्नकामुकप्रेषणरूपो व्यङ्ग्यार्थो ध्वनितः। सैषा व्यञ्जना ध्वनिरित्यपरनाम्नाभिधीयते आलङ्कारिकोत्तमै आनन्दवर्धनैः। स एव ध्वनिः काव्यस्यात्मा इति मन्यन्ते ध्वनिवादिनः।

नित्यसत्यप्रतिपादकत्वात् प्रत्यक्षादिज्ञानातिरिक्तातीन्द्रियज्ञानप्रकाशकत्वादपि वेदः शब्दमयो ग्रन्थविशेषः। शब्दैरर्थाः प्रकाशिता भवन्ति। तत्र शब्दार्थयोः सम्बन्धः कोऽपि अस्त्येव। वेदे प्रयुक्तेषु शब्देषु प्रायशो मुख्यार्थो न मुख्यः।

लक्ष्यार्थोऽपि अनेकत्र दुर्लक्ष्यः। वेदमन्त्राणां द्रष्टारः खलु दिव्यज्ञानयुक्ता खाषयः। ते खाषयो दिव्यदृष्टिवलात् मननाच्छ येषां शब्दानां दर्शनं लब्धं तेषां प्रयोगो मन्त्रेषु सन्निवेशितः। साधारणतया वेदमन्त्राणां प्रकृतार्थबोधो दुष्करे मन्त्रशरीरे विद्यमानानां तादृशानां शब्दानां गूढार्थप्रकृतित्वात्। र्थदृशाः शब्दा वेदे 'निण्या वचांमि' इत्याभिधया खाषिभिः समाम्नाताः-

'एता विश्वा विदुषेतुर्भयं वेधो नीथान्यग्ने निण्या वचांसि।

निवचना कवये काव्यान्याशंसिषं मतिभर्विप्र उक्थैः।।'(18)

सायमाचार्येण - 'निण्या वचांसि' इत्यस्य गूढानि वाक्यानि इत्यर्थः कृतः। एषा वाक् 'सन्ध्याभाषा' इत्याभिधया अर्वाचीनैरभिधीयते। मन्त्रेऽस्मिन् अग्निं समुद्दिश्य वदति वामदेवः - हे विधात! त्वं कर्म ज्ञातोऽपि त्वं तु परमो द्रष्टा। प्राज्ञा वयं तमुद्दिश्य फलप्रापकानि गूढानि अतिशयवक्तव्ययुक्तानि स्वप्रथितस्तोत्रशस्त्रानि समुच्चारयामः। गूढार्थोपेतानि ऋषिवाक्यानि प्रायशो

व्यङ्ग्यार्थप्रतिपादकानीति वेदे समुपलभ्यन्ते। ईषदधिकदशसहस्रसंख्यकैर्मन्त्रैर्निबद्धायामृक्संहितायां केवलं शतसहस्रसंख्यकास्तदधिका वा शब्दा विद्यन्ते, का कथा सामादिसंहितानां ब्रायाणारण्यकोपनिषद् ग्रन्थानाञ्च। तेषां केवलं कतिपयशब्देषु शब्दार्थसम्बन्धविचारोऽस्मिन् निबन्धे कर्तुः व्यवसिता वयम्।

वेदव्याख्या प्राधान्येन द्विविधा - प्राच्या प्रतीच्यदेशीया च। प्रतीच्यदेशीया व्याख्या प्राधान्येन प्रकृतिमूलका, भाषातत्त्वसम्मता क्वचिन् नृविद्याश्रिता च। प्राच्यदेशीया व्याख्या प्राधान्येन त्रिविधा - अधियज्ञात्मका - अधिदैवात्मका - अध्यात्मका च। एतयोरन्तरा प्रचलित श्रीअरविन्दप्रमुखानासङ्केमूला, रूपकमूला प्रतीकमूला वा व्याख्या। व्याख्याभेदात् शब्दानामर्थभेदो भवति। अर्थभेदात् शब्दार्थयोः सम्बन्धभेदोऽपि भवति। सायणीया व्याख्या अधियज्ञपरा। यास्कीया व्याख्या अधिदैवपरा क्वचिदध्यात्मपरा च। वेङ्कटस्वामि-स्कन्धस्वामि-सायणाचार्यादिभिः वेद-

मन्त्राणां योऽर्थः कृतः स तु प्राधान्येन यौगिकः क्वचिल्लक्ष्यः। शब्दानां वहिरावरणरूपेण स वर्तते। प्रायश एतेषामर्थानामन्तरालशायी कोऽप्यर्थोऽस्ति। किञ्च तेषामपरा अर्था अपि सम्भवन्ति।

ऋक्संहितायाः प्रथमे सूक्ते ऋषिणा वैश्वामित्रेण मधुच्छन्दसा अग्निदेवतायाः स्तुतिः कृता। अग्निशब्दस्य बहुधा व्युत्पत्तिर्यास्केन पूर्वाचार्यानां पदवीमनुसृत्य स्वकीयेन निर्वचनेन सह प्रदर्शिता। यास्केनादौ शब्दानां स्वरसंस्कारसम्मतोऽर्थः अर्थात् यौगिकोऽर्थः प्रतिपादितस्ततो लक्ष्यार्थादीनामनुसन्धानं कृतम्। अग्नि अग्रणीर्भवति, यज्ञेषु अग्रं प्रणीयते, प्रह्वीभवन् स स्वकीयं शरीरं काष्ठदाहे हविष्पाके च प्रेरयति, काष्ठादिकं रुक्षयति, दहति, अत्ति द्रव्यजातं, यजमानदत्तं हविः प्रापयति देवेषुइत्यादयस्तावदग्निशब्दस्य यौगिका अर्थाः। अग्निः शक्त्याधारः। या शक्तिः ज्ञान ज्योतिषा उद्भासिता, कर्मवलात्मका तस्याः शक्त्या आधार अग्निः। अध्यात्मदृष्ट्या सोऽग्निः दिव्याचिच्छक्तिस्वरूपः। सङ्कल्पेन

तेजसा वीर्येण च मानुषं वोधयुद्बोधयत्ययमग्निः। रूपकदृष्ट्या प्रतीकदृष्ट्या वा सोऽग्निः दिव्यशक्त्या यजमानमात्मोन्नतिकामं साधकमग्रे नयति, मरलोकेन सहामरलोकस्य संयोगं साधयति. उक्तञ्च श्रीअरविन्दमहाभागेन - 'The pure and sublIme medIator between earth and heaven.'(19)

सोऽयमग्निर्देवताभ्यो हविर्वहति। किंवा अस्य हविवहनकर्मणः तात्पर्यम्? उच्यतेसाधकचित्तस्थितं देवभावमावाहयन् स खलु देवभावप्राप्त्यर्थं तमूर्ध्वं नयति सततम्। इदमेव अग्नेः हिववहनकर्म। इन्धनेषु निगूढतया प्रच्छन्नोऽस्त्यग्निः। अरणिमन्थनात्तस्योद्भवो दाहकरूपेणाविर्भावो भवति। अरणिमन्थनाद् यथा अग्निर्ज्वलति तथैव देहाधारस्थितस्यान्तर्वोधस्य दैवचिच्छक्तेर्मन्थनेन आत्मशक्तिः साधकेषु यजमानेषु समुद्बोधिता भवति। आत्मवलेन हि यतमानसाः समुष्याः सर् कर्मजातं सम्पादयन्ति, लङ्घयन्ते च विपत्तिपर्वतादिकम्। ऋषिणा विश्वामित्रेण मन्थनार्थं नराः समुद्बोधिताः - 'मन्थता नरः कविमद्वयन्तं प्रचेतसममृतं

सुप्रतीकम्।'[20] - हे अध्वर्यवः, कविं द्वैधशून्यं प्रकृष्टज्ञानवन्तसमरं शोभनैर्ज्वालाभिः समेतमग्निं मन्थनेन निष्पादयत। अत्र 'नराः' अत्यस्य कर्मणां नेतार अध्वर्यादय इत्यर्थः सायणसम्मतः। वेदे नृशब्दो न केवलं मनुष्यमपि तु देवतां वोधयितं प्रयुक्तः। तस्यार्थः - क्रियावान् समर्थः पुरुषः, शक्तिमान् देवश्च। भागवतपुराणेऽपि नृशब्दो मनुष्यान् देवांश्च द्योतयितुं प्रयुक्तः - 'तपुमन्त्रयोगसिद्धैर्नरेतरैः' (4.6.9)। श्रीअरविन्दमहाभागोऽपि एवं मन्यते - 'Nm ın Veda ıs applıcable both to gods and men and does not mean sımply a man, ıt means orıgınally, ı thınk, strong or actıve and then a male and ıs applıed to the male gods, actıve dıvıne souls or powers.'[21] मनुष्यमतिरिच्य देवतार्थद्योतनाय दैवीचिच्छक्तिवोधनाय पौरुषार्थज्ञापनाय च यतोऽयं शब्द वेदे प्रयुक्तस्तस्माल्लक्ष्यार्थे प्रकृत्तिरस्य परिलक्ष्यते। विश्वेऽश्मिन्

सर्वेषु प्राणिषु तेजोरूपेणावस्थानादयमग्निघ 'जातवेदाः' इति नाम्ना व्यपदिश्यते। उक्तञ्च निरुक्ते यास्केन - 'जातानि वेद, जातानि वा एनं विदुः, जाते जाते विद्यते जातवित्त, जातवेदाः' इति।(22) जातवेदशब्दस्यायमर्थो यौगिकः। आत्मविद्याय़ाः सर्वविद्याया जनकत्वादयं जातवेदाः इत्यत्र तु व्यङ्ग्यार्थे अस्य प्रवृत्तिः।

अयमग्निर्गृहपतिः, मनुष्याणां परमात्मीयः - 'वर्धमानं स्वे दमे' (ऋ.सं. 1.1.8)। दमे गृहे सत्यस्य सङ्कल्पस्य चिद्वीर्यस्य मूलकेन्द्रस्थले इत्यर्थः। स खलु कविक्रतुः - अप्रितहतप्रज्ञावान् कर्मवान् वा। कविस्तु मन्त्रद्रष्टा ऋषिः - कवयः'सत्यश्रुतः'। स खलु 'सत्यश्चित्रश्रवस्तमः' (ऋ.सं. 1.1.5)। अस्य प्रतीकार्थः श्रीअरविन्दमहाभागेनोक्तः - 'who received in their illumined minds rather than mentally constructed a great universal, eternal and impersonal truth was they embodied in

mantras, revealed verses of power, not of an ordinary but of a divine inspiration and source. The name given to these sages was Kavi, which afterwards came to mean any poet, but at the time had the sense of a seer of Truth, the Veda itself described them as Kavayah Satyasrutah seers who are hearers of the Truth.'[23] यथाह यास्कः 'कविः क्रान्तदर्शनो भवति कवतेर्वा।'[24] उक्तञ्च स्कन्दस्वामिना - 'क्रामतेः कवतेर्वा गतिकर्मण इति रूपम्।' अतः कवि ऋषि इति समार्थवदधकः शब्दः। दर्शनाद् ऋषिः। मन्त्राणां द्रष्टारः खलु ते। उक्तञ्च वेदविदुषा अनिर्वाण महोदयेन - 'ऋषि तिनि याँर हृदय हते भाव वा वाणीर धारा वये चले, यिनि द्युलोकेर दिके वये चलेछेन।'[25] कवित्वशक्त्याः कविः साधकानामन्तलोकयुत वा द्युलोकं बहुवर्णैः रञ्जयति - 'कविः कवित्वा दिवि रूपमासजदप्रभूती।'[26] सर्वे, तेजसां

वीर्यणामाधारत्वादयमग्निः वीरः - 'यशसं वीरवत्तमम्।'(27) यशःशब्दस्य सायणसम्मत अर्थः कीर्ति अन्नं वा। यास्कमनुसारतो यशःशब्दः सम्पदर्थे ऐश्वर्यार्थे वीर्यार्थे मेधार्थे च प्रयुज्यते। यः खलु हृदयसम्पदादिभिर्वलवान् भूत्वा यजमानेषु साधकेषु चित्तैश्वर्यादिकं समुद्बोधयति स एव यशस्वी वीरश्च। अयन्तु अस्य व्यङ्ग्यार्थः प्रतीकार्थेऽपि। स खलु वैश्वानरो विश्वेषां सर्वेषां नराणां मित्रत्वात्। अरणिद्वयमन्थनेन अग्निरुत्पद्यते। अरणिस्तु होमकाष्ठम्। तच्चारणिद्वयं स्वर्गो मर्त्यश्च। तयोः सङ्कर्षणेन अग्निः प्रज्वलति। अत अग्निर्द्यावापृथिव्योस्तनयः। अरणिर्यथा अग्नेः योनिपीठो मनुष्यदेहस्तावत् सत्यस्य योनिपीठः - 'अयं ते योनि ऋत्वियो।'(28) अग्निर्ज्योतिषः तेजसश्च नाभिः। अतः स तनूनपात्। तनोः देहादरणेरस्य जातत्वदयं तनूनपात्। साधकानां देहारणिमन्थनात् सत्याग्निः प्रज्ञाग्निर्वा ज्वलति। अत्रारणिशब्दः प्रतीकार्थे प्रयुक्तः। आवैदिककालात् एतावत् कालपर्यन्तं संस्कृतकाव्यादिषु प्रादेशिकसिहत्ये च अग्निस्तुतिः प्रचलति। वङ्गदेशीयेन कविसार्वभौमेन रवीन्द्रनाथेन

जीवनस्य पूर्णताविधानार्थमग्नेः सकाशाद्दहनदानं याचितम् - 'आगुनेर परशमनि छोँयाओ प्राणे। ए जीवन पूर्ण कर दहनदाने।'(29) रवीन्द्रोत्तरकालभूतेन वङ्गदेशीयेन कविना विरचिते काव्येऽपि अनुपमा अग्निस्तुतिः परिलक्ष्यते -

'विश्वनरेर वन्धु ये तुमि, ताइ नाम तव वैश्वानर

तिम अर्मत्य, मर्त्येर साथे वास कर तवु निरन्तर।'

* * *

ऋषिदेर ऋषि, तुमि ये असुर, पुरोधा ये तुमि अशेष मेधा

तुमि हुताशन, अपादशीर्ष। - प्रणामि तोमारे हे जातवेदा।

* * *

होता सँपे तोमा इन्धन नव, ग्रहण करो गो एइ समिध् -

मर्त्येर ज्ञाति, अमृतवन्धु! प्रणमि तोमारे विश्वविद्।

* * *

आदिते आछिले अदितिर साथे आकाशेर नील पद्मवने,

घर्षणे कार गगने गगने, उजलिया जागो कि निःश्वने!

आनो तोमार ज्योतिर्हास्य, घोर तमिस्रा तुमिइ हर,

निविड़-आँधार नशार ओपेर दृष्टि तोमार प्रेरण कर।

हेमधुजित्व! सप्त जिह्वा प्रसारिया दाओ आजि ए प्राते,

मिशे याक तव पिङ्गल जटा ओइ वालारूण-रश्मि साथे।

ओगो त्रिजन्मा! त्रिशिख! त्रितनु! ओगो गृह-भानु रात्रि-रवि!

परमात्मीय! - प्रसीद हे सखा! जुहू भरि एइ दिलाम हवि।'(30)

वङ्गदेशोद्भवेन कविना कालिदासरायमहोदयेन यतीन्द्रनाथसेनगुप्तमहोदयेन च विरचिते स्वकीयकाब्ये अग्निस्तुतिः कृता।

यास्केन इन्द्रशब्दस्य वहुधा निर्वचनं प्रदर्शितम् निरुक्ते - 'इन्द्र इराम् अन्नं पुष्टिं वा दृणातीति वा। इरां ददातित वा। इरां दधातित वा। इरां दारयत इति वा। इरां धारयत इति वा।

इन्दवे द्रवतीति वा। इन्दौ रमत इति वा। इन्धे भूतानीति वा। इदं करणादित्याग्रायमः। तद्यदेनं समैन्धंस्तदिन्द्रस्येन्द्रत्वम्। इत विज्ञायते। इदं दर्शनादित्यौपमन्यवः। इन्धतेवैश्वर्यकर्मणः। इन्द्रशत्रूणां दारयिता वा। द्रावयिता वा। आदरयिता वा यज्वनाम्।'(31) एतेषु अनुसन्धेया इन्द्रशब्दस्य यौगिकार्थो लक्ष्यार्थाश्च। अध्यात्मदृष्ट्या इन्द्रः शुद्धमनस अधिष्ठात्री देवता। स इन्द्रो मरणधर्माण अस्मान् द्युलोकं नयति। दिव्य ज्योतिषा वलेन ज्ञानेन च मर्त्यममर्त्यीकरोति, अस्माकं हृत्तमः नाशयति, सर्वमस्मदीयखण्डत्वमपाकृत्य अखन्डी करोति। साधकानां चिच्छक्तिश्चोद्दीपयति। सर्वेषां प्राणिनां मङ्गलविधानात् शत्रूणां दस्यूनाञ्च दन्डदानातं स एव देवोत्तमः। देवानां मनुष्येषु अन्तर्निहितानां दिव्यभावानां रक्षणादसौ देवराजः।

इन्द्रेण प्रेषिता सरमा पणिभिरपहृता दोवानां गा उद्धर्त्तुं तोषां गूढस्थानं गता। तैः सह मित्रत्वं कृत्वा गोगुप्तिस्थानसवगता। ततो मरुद्भिः सह इन्द्रस्थान् असुरान् पराजित्य गवामुद्धारं कृतवान्। एषा कथा ऋग्वेदस्य

दशममण्डले 108 सूक्ते विवृता अस्ति। या खलु गच्छन्ती ईक्षते (सृ.मा) ईक्षमाणा वा गच्छित (मा.सृ) सा सरमा। यद्यपि सरमाशब्दस्यायं खलु यौगिक अर्थस्तथापि अध्यात्मदृष्ट्या तु अयमर्थ आपतति - या यजमानस्य साधक्स्य तमोमयमवमानसमधिगम्य (subconcious) सत्यसरणि मालोकपथश्चानुसन्धत्ते सा सरमा। तत्र पणिगणः तमसः प्रतीकत्वेन स्थितः। तेषामसुराणामवरोधकारिणां मोहान्धकारमयं दुर्गं भित्त्वा सरमा खलु सत्यप्रभया ज्ञानालोकेन च प्रकाशयति देवान् मनुष्यान् साधकान् च। श्रीअरविन्दमहाभागेन स्वभाष्ये सरमास्वरूपं स्पष्टीकृतम् - 'Sarama, the discovering intuition, who penetrates into the cave of the subconscient where the niggard lords of Sense - action have hidden the radiant herds of the Sun and gives information to India.'[33] म्याक्समूलरमहोदयेन

अस्याख्यानस्य प्रतीकात्मका व्याख्या कृता। उषसा प्रात अलोकोद्धार एव सरमया धोनूरूद्धारकर्मण उपमयावर्णित इति मन्यते स महाभागः। अनेनाख्यानेन सह ग्रीसदेशीयमहाकविना होमारेण विरचितस्य इलियाड् इति महाकाव्यान्तर्गतस्य ट्रययुद्धोपाख्यानस्य सादृश्यमाविक्कुर्वता तेन कथितम् - 'The siege of Troy is but a repetition of the daily siege of the East, by the solar powers that every evening are robbed of their brightest treasures in the West.'(34)

इन्द्रवृत्रयोराख्यानं बहुषु सूक्तेषु विवृतमस्ति वेदे। वृत्रशब्दस्य रूढोऽर्थ असुरः। तमसुरमिन्द्रो जघान। अस्य यौगिक अर्थोऽपि सम्भवति। वृणोति यः स वृत्रः, आवरणकारी। अभिधावृत्त्या योगजातो वृत्रशब्द आवरणकारिणं मेघं वोधयति। निरुक्तकारस्य मतानुसारतो वृत्रशब्देन सर्पोऽपि द्योत्यते। यथाह यास्कः - 'तत् को वृत्रः। मेघ इत नैरुक्ताः।

त्वाष्ट्रोऽसुर इत्यैतिहासिकाः। अपां च ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते। तत्रोपमार्थेन युद्धवर्णा भवन्ति। अहिषस्तु खलु मन्द्रवर्णा ब्राह्मणवादाश्च। विवृद्ध्या शरीरस्य स्रोतांसि निवारयाञ्चकार। तस्मिन् हेत प्रसस्यन्दिर आपः।'(35) वृत्रो मेघ इति वदन्ति निरुक्तकाराः अर्थात् निर्वचनवादिनः। पुराविदां मतानुसारतो वृत्रः खलु त्वष्टतनय असुरः। वाष्पविद्युतो र्मिश्रणान् मेघोद्भबः। मेघाद् वर्षणकर्म। विषयेऽस्मिन् इन्द्रवृत्रयोरलङ्कृता युद्धवर्णना परिलक्ष्यते संहितासु ब्राह्मणेषु च स वृत्रः सर्परूपेण वर्णितः। स्वकायंविस्तार्य असौ वृत्रो नदीप्रवाहान् रूरोध। इन्द्रेण हते तस्मिन् अवरुद्धा जलधारा प्रचलिता। प्राप्यते विवरणमस्य वर्ण्यमाणे मन्त्रेऽस्मिन् -

'दासपत्नीरहिगोपा अतिष्ठन्निरुद्धा आपः पणिनेव गावः।

अपां विलमापिहीतं यदामीद्धृत्रं जघन्वाँ अप दद्धवार।।'(36)

पणिभिर्गावो यथार्हसि रक्षिता वृत्रपत्न्यस्तथैवाहिरक्षिताः सत्यः निरुद्धा जाताः।

जलवहनद्धारं रुद्धमासीत्, वृत्रं हत्वा इन्द्रस्तद्वारमपावृतं चकार - इत्यस्य मन्त्रस्यार्थः। नायंवृत्रः शरीरी असुर 'अपादहस्तो' इति मन्त्रे प्रतिपादितत्वात्।[37] ऋषय उपमाप्रियाः। तैः दृष्टेषु मन्त्रेषु उपमाद्यलङ्काराणां प्रचुरः प्रयोगः परिलक्ष्यते। इदमपि मुक्तं तत्प्रमाणमावहति। यास्केन त्रिभ्यो धातुभ्यो वृत्रशब्दस्योत्पत्तिरङ्गीकृता - 'यदवृणात्तदुवृत्रस्य वृत्रत्वम् इति विज्ञायते। यदवर्तत तदु वृत्रस्य वृत्रत्वम् इति विद्यते यदवर्धत तदु वृत्रस्य कृत्रत्वम् इति विज्ञायते।'[38] यौगिकमर्थमतिरिच्य अत्र लक्ष्यार्थोऽपि सम्भवति। साधारणतया आवरणार्थको वृत्रशब्दः साधकानां ज्ञानं चिच्छक्तिमप्यावृणोति। यथोक्तं पाणिक्करमहोदयेन - 'In the Rgveda vrtra is usually interpreted as a demon representing drought, but he also has sometimes been regarded as the personification of darkness.'[39]

वेदे द्युस्थानभूतेषु देवेषु अश्विनौ मुख्यत्वं भजेते। व्याप्त्यर्थकादश्धातोर्निष्पन्नोऽयं शब्दः। यास्ककृतव्याख्यायामस्य यौगिकेऽर्थे लक्ष्यार्थे च प्रवृत्तिर्लक्ष्यते - 'आभ्यां सर्वं व्याप्तत्वाद् अश्विनौ इति संज्ञा। तयोरेकः सर्वं जगद्रसेन अश्नुते, अपरन्तु ज्योतिषा। यतस्तयो अश्व अस्ति अतस्तौ अश्विनौ इति मन्यते और्णवाभः। वाहनार्थद्योतकोऽपि अश्वशब्दो बेदे वलस्य प्रतीकत्वेन प्रयुक्तः। आरोपार्थमूलकं भवति प्पतीकत्वम्। आरोपस्तु कस्मिंश्चिद्धर्मिणि अन्यधर्मिणो व्यवहारसारोपो भवति। अतस्तत्र समासोक्त्या अवसरः। तादृशोऽर्थो व्यञ्जनावृत्तिलब्धो भवति प्रायशः। बेदे अश्वशब्द आध्यात्मिकशक्तेः प्राणशक्तेः तपःशक्ते ओजसवस्तुजसे वीर्यस्य वेगस्य च प्रतीकभूतः। यथाह श्रीअरविन्दमहाभागः - 'The vedic horse is a symbol of power, spiritual strength force of tapasya.'(41) अश्वमेधो नाम कश्चिद् वैदिकयज्ञोऽस्ति यत्राग्नौ अश्वदेहांशो वलिरूपेण प्रदीयते। स एव अस्याभिधेयार्थः अध्यात्मदृष्ट्या भोगवासनाप्रवृत्ति-

कामनादिभिः सह दिव्यसत्तास्वरूप अग्नौ प्राणार्पणमेव अश्वमेधशब्दस्य तात्पर्यार्थः। अयमपि प्रतीकार्थे व्यञ्जनावृत्त्या लभ्यते। निष्कर्षार्थस्तु श्रीअरविन्दमहाभागेन स्पष्टीकृतः - 'The Horse sacrifice is the offering of the Life-power with all its impulses, desires, enjoyments to the divine existence.'[42]

निरुक्ते अश्विनौ इति देवतयोर्नानाविधोऽर्थ उक्तः।[43] नैरुक्तानां मतानुसारत अश्विनौ द्यावापृथिव्यौ, अहोरात्रौ सूर्याचन्द्रमसौ वा। पुराविदः कथयन्ति, अश्विनौ पुण्यकर्मकृतौ राजानौ भवतः। तयोः कालो मध्यरात्रात् परवर्तीसमयः। स कालः सूर्योदयस्य प्रतिवन्धकः। तत्रान्धकारभाग अन्तरीक्षम्, ज्योतिर्भागस्तु सूर्यः। एते अर्था परतीकत्वेन प्र्युक्ताः। मुख्यार्थो लक्ष्यार्थो वा नात्र प्रसरति। अध्यात्मदृष्ट्या एते अश्विदेवते उपासकानां यजमानानां जराजाभ्यादिकम्पनीय तेषु पुष्टिरायुः श्रीवीर्यादिकं सञ्चारयतः। अतस्तुयो रिभषकस्वरूपं स्फुटीभवति। एतावाश्विनौ ज्ञानकर्मनो अमृतस्य चाधिष्ठात्र्यौ

भवतः। सत्यस्वरूपौ शत्रुनाशकौ रोगनाशकावप्येतौ भवतः। नेतारौ तौ साधकान् क्रमेण पवित्रीकृत्य भूम्नः सकाशं नयतः। एतावश्विनौ वृकमुखाद्वर्तिकापक्षिणं ररक्षतुः। समाम्नातञ्च खाक्संहितायाम् - अर्जोऽवीदाश्विना वर्तिका वामाग्नो यत् सीममुञ्चतं वृकस्य।'(44) यास्केनास्य मन्त्रस्य रूपकार्थे व्याख्या कृता - 'आह्वयदुषा अश्विनावादित्येनाभिग्रस्ता। तामश्विनौ प्रमुमुचतुः। इत्याख्यानम्।'(45) अतादित्यशब्दो वृकंबोधयति। तत्राख्यानमस्ति। सूर्येन ऊषा धृता। उषमा आहूतौ अश्विनौ तां सूर्यादमुञ्चताम्। या आवर्तते पुनः पुनः सा वर्तिका उषा। यो ज्योतिषा पृथिवीमावृणोति स आदित्यो वृकः सूर्यः। अश्विनौ नैशान्धकाराज् ज्योतिषं प्रकाशयति।

वेदे स्त्रीदेवतासु ऊषा अन्यतमा। निशावसानक्षणं सूर्योदयात् प्रगाभूतक्षणश्चान्तरा आविर्भवति ऊषाकालः। ऊषाकालः प्राकृतिक घटनामात्रमपि ऋषिदृष्ट्या देवीरूपेण परिणतः। ऊषा खलु मध्यमस्थानभूता अन्तरिक्षस्थानभूता वा देवता। इच्छार्थकाद्वश्धातोः यद्वा दीप्त्यर्थकाद् वस्

धातोर्निष्पद्यते ऊषा शब्दः इति मन्यते यास्कः।(46) या काङ्खते या च दीप्यते सा ऊषा। अयं तावद् ऊषाशब्दस्य यौगिकोऽर्थः। एषा ऊषा द्युलोकस्य दुहितृरूपेण ऋषिणा बहुधा कीर्त्तिता। 'दिवा दुहिता' 'दुहितर्दिव' इत्यादीनि विशेषणानि प्रायशो वेदे तामुद्दिश्य प्रयुक्तानि। प्रकाशिता तु ऋषीणां महती कविकल्पना ऊषासूक्तेषु। 'दुहितर्दिव' इत्यत्र ऊषस मानवीकरणं स्पष्टं परिलक्ष्यते। कथयति ऋषिः सत्यश्रवा - सा सुवेशा रथणी इव स्वां तनुं प्रकाशयन्ती स्नाता सती नो नयनपथं पान्थायते -

'एषा शुभ्रा न तन्वो विदानोर्ध्वेव स्नाती दृशये नो अस्तात्।

अप द्वोषो वाधमाना तमांस्युषा दिवो दुहिता ज्योतिषागात्।।'

सर्वमावरकमज्ञानादिकं जाभ्यादिकञ्च दूरीकृत्य स्वसंविदा स्वकीयेन महता प्रज्ञानेन सह चोषस आविर्भाव अनेन ध्वन्यते। सत्यमिदं यद् ऊषासूक्तेषु ऋषीणां किवभावः समुच्छलिताम्भकुम्भवद् व्यञ्जनावृत्त्या परिस्फुटितः। स्वयं

ज्योतिष्मती ऊषा अस्मान् ज्योतिस्पथं ज्ञानालोकेन दीप्तं मार्गं प्रति नयति। ऊषसः आलोकेषु वरुणस्य व्याप्तिः मित्रस्य माधुर्यं सौमनस्यञ्च निवसति। सा ऋतपा ऋतजा सुखमयी सुमङ्गली च। श्रीअरविन्दमहाभागेन अस्या वैशिष्ट्यानि सम्यक् समुल्लिखितानि - 'The dıvıne Dawn, daughter of heaven, as the brınger of the Truth, the blıss, the heavens of lıght, creator of the Lıght, gıver of vısıon maker, follower, leader of the paths of Truth, remove of the darkness, the eternal and ever youthful goddess of our godward journey.'(48) ऋषिदृष्ट्या ऊषसि निसर्गस्य नारीत्वस्य देवीत्वस्य च रम्योऽपि विचित्रः समाहारो जातः। उच्यते वेदविदुषा श्रीअनिर्वाणमहाभागेन - 'नारीत्वेर समस्त माधुरीते मन्डित करे आर कोनओ दोवताकेइ ऋषिरा हृदेयर एत केछ टेने आनेन नि। अथच ऊषार पटभूमिकाय निसर्गेर शोभाकेओ

एक मुहूर्त्तेर जन्य ताँरा भोलेन नि। प्रकृति, नारी आर देवी - महाशक्तिर एइ तिनटि विभाबेर एक आश्चर्य सङ्गम घटेछे बैदिक ऊषार रूपायणे।'(49)

वेदे द्युस्थानभूतेषु देबेषु सूर्यो मुख्यतमः। मन्यते च कात्यायनः - 'एक एव महानात्मा वेदे स्तूयते स सूर्य इति व्याचक्षते।' स्थावरजङ्गमात्मकस्यास्य प्रपञ्चस्य आत्मा सूर्य-इति मन्यते ऋषिः - 'आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च।'(50) शौनकोऽपि अतीतादिकालत्रयस्य जङ्गमस्थावरस्यचोद्भवविलयरूपेन सूर्यं जानाति -

'भवद्भूतस्य भव्यस्य जङ्गमस्थावरस्य च।

अस्यैके सूर्यमेवैकं प्रभवं प्रलयंविदुः।।'(51)

चलनार्थकात् सृधातोः यद्वा उद्दीपनार्थकाद् उर्जनार्थकाद्वा सूधातोः यद्वा अभ्युदयसाधनार्थकात् स्विर्-धातो र्निष्पन्नोऽयं सूर्यशब्दः - इति मन्यते यास्कः। मरणात् मीर आदित्यः। मीर इत्यस्यार्थः सञ्चालनकारी। सूर्यशब्दस्य एते खलु यौगिका अर्थाः। ऋषिभिस्तु वेदे

सवित्रादित्यादिसूर्यवाचकाः शब्दाः क्वचिल्लक्ष्यार्थे क्वचिद्व्यङ्ग्यार्थे रूपकार्थे प्रतीकार्थे च प्रयुक्ताः। सूर्यशब्दस्य अभिधावृत्तिसम्मतां व्याख्यां विधाय यास्कैः प्रतीकात्मका व्याख्यापि कृता, यथा - 'विपत्वप्रज्ञ आदित्यः।'(52) सूर्यस्य क्रियाद्वय मस्ति - ज्योतिर्मयी परिदृष्टिः ज्योतिर्मयी सृष्टिश्च। उच्यते श्रीअरविन्दमहाभागेन - 'Luminous vision and luminous creation are the two functions of Surya.... He is the light of Truth rising on the human consciousness in the wake of the divine Dawn.'(53) सूर्यः परमात्मा। परमात्मनः सूर्यस्य सत्यस्वरूपं हिरन्मयेन पात्रेणावृतमस्ति, तत्प्रसादादेव साधकः तमवगन्तुं शक्नोति - 'हिरन्मयेन पात्रेण सत्यस्यापिहितं मुखम्।'(54) एतादृशोऽर्थो व्यञ्जनावृत्तिलब्ध इति नात्र संशयः। ऊषा यथा दिबो दुहिता सूर्यस्तथा 'दिवस्पुत्र' इति ऋषिभिः कथितः - 'दिवस्पुत्राय सूर्याय शंसत।'(55) सविता-पूषा-मित्रप्रमुखा देवाः

सूर्यस्येव रूपविशेषा भवन्ति। सर्वेषां प्रसवितृत्वात् स सविता। बूतानामन्तः करणस्थितं गूढं सोरतेज एव पूषा। एतेषु अभिधेयार्थमतिरिच्य व्यङ्ग्यार्थः प्रतीकार्थश्च ध्वनितः।

वेदे सरस्वती नदीरूपेण देवीरूपेण च स्तुयते। यथाह यास्कः - 'तत्र सरस्वतीत्येतस्य नदीवद्देवतावच्च निगम भवन्ति।'(56) शौनकेनापि तदेव कथितम् - 'सरस्वतीति द्विविधम् ऋक्षु सर्वासु सा स्मृता। नदीवद्देवतावच्च -' इति। (57) सरस्वतीनदी वैदिककाले प्रसिद्धा आसीत्। सा नदी वाग्देवीरूपेण स्तुता। अतस्तस्यां देवत्वारोपो जातः। तदारोपात् प्रसरति समासोक्तिः। तस्माद् गुणीभूतव्यङ्गस्यावसरः। सा सरस्वती अस्माकं धिययुद्बोधयति। चोदयत्यस्मान् सत्यवर्त्मने। सा सरस्वती यथा वागादिष्ठात्री देवी तथैव ऋतम्भरा प्रज्ञा, ब्रह्ममयी, ईश्वर्यशालिनी, यज्ञकर्मणोश्चोदयित्री, देवानां ज्योतिः स्वरूपा - इति मन्यते ऋषिर्गृत्समदः। नदीषु सा श्रेष्ठा, देवीषु सा श्रेष्ठा मातृष्वपि सा श्रेष्ठा - 'अम्बितमे नदीतमे देवितमे सरस्वति।'(58)

जलप्रवाहवती सा प्राणप्रवाहवती चित्प्रवाहवती च। उक्तञ्च श्रीमता अनिर्बाणेन - 'अधिभूतदृष्टिते या जलेर धारा अध्यात्मदृष्टिते ताइ प्राणेर धारा एबं अधिदैवतदृष्टते विश्वजनीन चित्शक्तिर प्रवाह।'(59) अतः सरस्वतीशब्दे यौगिकमर्थमतिरिच्य रूपकार्थः प्रतीकार्थोऽपि प्रसरति।

वेदे गोशब्दो नानाविधेष्वर्थेषु प्रचुरतया प्रयुक्तः। गच्छतीति गौ इति यद्यपि गोशब्दस्य यौगिक अर्थस्तथापि न सर्वेषु गमनकारिषु गोशब्दः प्रयुज्यते शयानस्य गोर्गमनाभावाद् गमनकारिषु चान्येषु गोत्वस्याप्रयुज्य-मानत्वात्। योगवशात् अर्थातप्रकृतिप्रत्ययसंयोगात् साधारणतया गोशब्दः सास्नालङ्गुलादियन्तं पशुं वोधयति। उक्तञ्च यास्केन – 'अथापि पशुनामेऽभवत्येतस्मादेव'।69 यास्केन नानाविधेष्वर्थेषु गोशब्दप्रयोगः प्रदर्शितः दूरगामित्वादस्याञ्च भूतानां गमनाद् गोशब्दः पृथिवीं द्योतयति। यथाहयास्कः –' यद् दूरंगता भवति। यच्चास्यां भूतानि गच्छन्ति'70। गाधातो उप्रत्ययादापि शब्दोऽयं

निष्पद्यते। गोशब्दो लक्ष्यार्थेञ्जातं दुग्धं द्योतयति – 'गोभिः श्रीणित मत्सरम्'[71]। गोभिर्दुग्धैर्मत्सरं सोमंमिश्रीकरोतु इत्यर्थः। गोशब्देन चर्म-श्लेष्मास्नायुनिर्मितजादयोऽप्यर्था द्योतयन्ते लक्ष्यार्थे; यथा – 'गोभिः सन्नद्धा पतति प्रसूता'[72]। अत्र गोशब्दस्य लक्ष्यार्थे प्रवृत्तिः, स च ज्या इत्यार्थं प्रकाशयति। गोशब्देन आदित्योऽपि बोध्यते; तद् यथा- 'उताद परुषे गवि'[73]। चन्द्रमसो ज्योतिःसम्पादकाः सूर्यरश्मय अपि गाव इत्युच्यन्ते। सोऽयमर्थो व्यञ्जनावृत्तिलब्धः। आम्नातञ्च-

'अत्राह गोरमन्वत नाम त्वष्टुरपीचम्।

इत्था चन्दमसो गृहे'[74]।

त्वष्टुः गोः सूर्यतेजः इत्यर्थः। मन्त्रस्यास्यभाष्ये वदति सायणः- 'उदकमये स्वच्छे चन्द्रविश्वे सूर्यकिरणाः प्रतिफलन्ति तत्र प्रतिफलिताः किरणाः सूर्ये यादृशीं संज्ञां लभन्ते तादृशीं

चन्द्रेऽपि वर्तमाना अलभन्त इत्यर्थः’। प्रतीयते यत् सूर्यरश्मयः चन्द्रे प्रतिफलिताः सन्तः चन्द्रमसो ज्योतिषमुत्पादयन्तीति विषयो यास्कसमये विदुषां विदित एव। यास्केन कथितम्- ‘सर्वेऽपि रश्मयो गाव उच्यन्ते’[75]। यथा अस्मिन् मन्त्रे- ‘ता वां वास्तून्यस्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः’[76]। अत्र गावो रश्मिप्रतिरूपाः। एतस्माज् ज्ञानज्योतिरपि गोशब्देन द्योत्यते। यो ज्ञानदीप्त्या दिव्यज्योतिभिश्चाविष्टः स ‘गोतम’ इत्युक्तो वेदे। अत्र गोशब्दो व्यङ्ग्यार्थं रूपकार्थञ्च प्रकाशयति एतेषु ऋषेः कवित्वमपि प्रकाशितम्।

वृषभशब्दो लौकिकसंस्कृते पश्वर्थे प्रयुज्यते। वेदे तु शब्दोऽयं पश्वतिरिक्तेष्वर्थेषु प्रयुक्तः प्रायशः। यास्केनोक्तम्- ‘वृषभः प्रजां वर्षयीति वा। अतिवृहतिरेत इति वा। तद्वर्षणकर्मा वर्षणाद्वृषभः’[77]। प्रजा अपत्यान् वा यो वृष्टिकर्मणा स्नापयति, वीजं वीर्यं वा य अतिशयं वर्धते स वृषभः। वर्षणकर्मणो वृषभ

इति। तद् यथा- ‘न्यक्रन्दयन्नपयन्त एनममेऽयन् वृषभं मध्य आजेः’[78]। वृषभम् वर्षकं सेक्तारमित्यर्थः। वृषभशब्दो लक्षार्थेऽपि प्रयुक्तो वेदे। रूपकार्थे वृषभशब्दस्य प्रयोगो यथा- ‘चत्वारि शृङ्गा त्रयो अस्य पादा-’[79] इत्यादि मन्त्रे। वृषभः फलानां वर्षिता इत्यार्थः। वेदे इन्द्राग्निवाय्वादयो देवा अपि वीर्यवर्षणकर्मणा ‘वृषभ’ इत्यनेन सम्बोधिताः। शाब्दिकानां मतानुसारेण ब्रह्मद्योतको भवति।

साधारणतया लोके नियमोऽयं प्रचलति यत् शब्दश्रवणात् परस तस्य शब्दस्य योऽर्थ अस्माकं मनसि समदेति स एव तस्यार्थः। यथाह भर्तृहरिः -

‘यस्मिंस्तूच्चरिते शब्दे यदा योऽर्थः प्रतीयते।

तमाहुरर्थं तस्यैव नान्यदर्थस्य लक्षणम्।।’[80]

किन्तु न सर्वत्र प्रचलति रीतिवियम्। दृश्यते यद्वेदे बहवः शब्दा अभिधेयार्थं परित्यज्य लक्ष्यार्थं व्यङ्ग्यार्थं रूपकार्थञ्च प्रायशो

द्योतयन्ति। तद्धितान्तो रौद्रशब्दाज्जातः। अस्य मुख्यार्थस्तावद् रुद्रजातः रुद्रसम्बन्धयुक्तो वा। परन्तु मन्त्रे यदा शब्दोऽयं 'शत्रूणां भयङ्कर' इत्यार्थं द्योतयितुं प्रयुक्तस्तदा व्यङ्ग्यार्थे अस्य प्रवृत्तिः सुस्पष्टा- 'इनो राजन्नरतिः समिद्धो रौद्रो दक्षाय सुषुमा अदर्शि'। [81]

प्रसवशब्दस्य प्रकृतिप्रत्ययजातोऽर्थः जन्म, प्रकृष्टप्रेरणम्। वेदे तु प्रसवशब्दः क्वचिद् अनुज्ञेति लक्ष्यार्थे प्रयुक्तः, यथा – 'इन्द्रेषिते प्रसवं भिक्षमाणे'। [82] सृज्धातोर्निष्पन्नत्वात् सर्गशब्दः सृष्टिवाचकः, वेदे गमनार्थं बोधयितुं स शब्दो लक्ष्यार्थे प्रयुक्तः। तद् यथा - 'न वर्तवे प्रसवः सर्गतक्तः'।[83] जिह्वाशब्द इन्द्रियविशेषं बोधयति। वेदे क्वचिद् जिह्वाशब्दो वाचं बोधयति; तत्र लक्ष्यार्थे अस्य प्रवृत्तिः - 'यत्तो देवाश्चकृम जिह्वया गुरु मनसो वा प्रयुती'।[84] ऋक्संहिताया अस्यवामीयसूक्तगते 'द्वा सुपर्णा सयुजा'-इत्यादिमन्त्रे'[85] द्वौ

पक्षिणौ जीवात्मनः परमात्मनश्च रूपकत्वेन प्रयुक्तौ । जीवात्मा कर्मफलं भुङ्क्ते परमात्मा च केवलं पश्यति विगतस्पृहः सुखदुःखादिद्वन्द्वविमुक्तः सन्।

इदं तु इदानीं वक्तुं शक्यते यत् साधारणतया प्रभुसम्मितशब्दप्रधाने वेदेऽपि क्वचित् क्वचित् कान्तासम्मितशब्दसुभगः सहृदयहृदयाह्लादो वचनविन्यासः परिलक्ष्यते।

तथ्यसूत्राणि -


1. बृहदारण्यकोपनिषद् (1.1.1) – दुर्गाचरणसांख्यवेदान्ततीर्थसम्पादिता , कलिकातायां 1975तमे वर्षे
2. तदेव – 1.5.7
3. काव्यादर्शः (1.4) - कुमुदरञ्जनरायसम्पादितः, कलिकातायां, 1971तमे वर्षे
4. The Vakyapadiya of Bhartrihari (1.123) – K.A.Subramanya Iyer, Delhi, 1983
5. The Vakyapadiya of Bhartrihari (2.400)
6. Ibid (3.340)

7. लघुमञ्जुषा – रामप्रसादत्रिपाठिसम्पादिता, वाराणस्यां, 1990तमे वर्षे
8. The Vakyapadiya – 3.332
9. Ibid (3.329)
10. पूर्वमीमांसादर्शन – सुखमयभट्टाचार्य सम्पादित, प.व.राज्य पुस्तक पर्षद्, कलिकाता 1983
11. शास्त्रदीपिका (1.1.5) – लक्षणशास्त्रिद्राविडसम्पादिता, वाराणस्यां, 1992तमे वर्षे
12. मीमांसाश्लोकवार्तिकम् (कुमारिलभट्टरचितम् ) - दुर्गाधरझासम्पादितम् , द्वारभाङ्गायां , 1989तमे वर्षे
13. शक्तिवादः (गदाधरभट्टाचार्यरचितः) वाराणस्यां 1986तमे वर्षे प्रकाशितः शब्दार्थसम्बन्धसमीक्षा – ड. गङ्गाधर कर, कलकाता, 2003
14. शक्तिवादः (गदाधरभट्टाचार्यरचितः)
15. साहित्यदर्पणः (2.8) – विमलाकान्तमुखोपाध्याय सम्पादित, कलिकाता, 1386 वङ्गाब्द
16. तदेव- २.९
17. तदेव-२.२४

18.ऋग्वेदसंहिता-(४.३.१६)-रामगोविन्दत्रिवेदी अनूदित, चौखम्बा विद्याभवन, पुनर्मुद्रण, २००७
19. On the Veda(Pg. 446)- Sri Aurovindo, Kolkata, 1956
20. ऋग्वेदसंहिता- ३.२९.५
21. On the Veda(Pg. 92)- Sri Aurovindo, Kolkata, 1956
22. The Nighantu and the Nirukta (7.21.)- Lakshman Sarup, Delhi, 1967.
23. Hymns to the Mystic Fire (pg,1), Sri Aurobindo, Kolkata, 1952.
24. The Nighantu and the Nirukta 12.13.
25. वेदमीमांसा, २य खण्ड(पृ.३३०), श्री अनिर्वाण, कलिकाता, १९५५
26. ऋग्वेदसंहिता – १०.१२४.७
27. तदेव – १.१.३
28. तदेव – ३.२९.१०
29. रवीन्द्ररचनावली, ४र्थ खण्ड. फ्रु. ३८७ प. व. सरकार, कलिकाता, १९८७
30. मोहितलाल मजुमदारेर श्रेष्ठकविता, (पृ.६०), कलिकाता, २००८
31. Nirukta-10.8.

32. ऋ.सं.- ७.३२.२२
33. On the Veda-Pg,367
34. Science of Language, Vol.II. Pg. 550, F. Maxmuller, Londan, 1882.
35. Nirukta-2.16
36. ऋ.सं.-१.३२.११
37. तदेव- १.३२.७
38. Niruktam-2.17
39. The Vedic Experience (Pg.200) Raimundo Panikkar, Londan, 1947.
40. Niruktam-12.11
41. Hymns to the Nystic fire, Pg, XVI
42. Ibid, Pg. 311
43. Niruktam- 12.1
44. ऋ.सं.-१.११७.१६
45. Niruktam-5.21
46. Ibid.-12.5
47. ऋ.सं.-५.८०.५
48. On the Veda, Pg.615
49. वेदमीमांसा, २य खण्ड, पृ. ४६०
50. ऋ.सं.- १.११५.१
51. The Brhaddevata, Part I.(1.61)- A.A.Macdonnel, Reprint, Delhi, 1994

52. Nirukta- 3.12
53. On the Veda- P. 529-30
54. The Brhaddevata- Part-2, P. 135-136
55. ऋ.सं.- २.४१.१६
56. वेदसंहिता, ३य खण्ड, पृ. ४९०
57. Niruktam- 11.2
58. Ibid.- 11.2
59. ऋ.सं.- ४.५८.१
60. On the Veda- P. 420
61. Ibid.- 1.20
62. ऋ.सं.-४.५८.१
63. On the Veda- P. 420
64. ऋ.सं.- 10.85.1-2
65. On the Veda- P. 420
66. Ibid.- 1.20
67. ऋ.सं.- 10.71.5
68. Hymns to the Myetic Fire, P. XIII
69. Nirultam- 2.5
70. Ibid.- 2.5
71. ऋ.सं.- 9.46.4
72. तदेव- ६.७५.११
73. तदेव- ६.७५.११
74. तदेव- ६.५६.३

75. Niruktam- 2.6
76. ऋ.सं.- १.१५४.६
77. Niruktam- 9.22
78. ऋ.सं.- 10.102.5
79. तदेव- ६.५८.३
80. The Vakyapadiya- 2.329
81. ऋ.सं.- १०.३.१
82. तदेव- ३.३३.४
83. तदेव- ३.३३.४
84. तदेव- १०.३७.१२
85. तदेव- १.१६४.२०


------------------

# शब्दशास्त्रीयः शब्दार्थसम्बन्धः

इत्याख्यः प्रबन्धः अध्यापक-अयनभट्टाचार्यप्रस्तुतः

सदाशिवसमारम्भां शङ्कराचार्यमध्यमाम्।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम्।।
वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे।
यं लब्ध्वा कृतकृत्याः स्युस्तं नमामि गजाननम्।।
वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।।
निरञ्जनं नित्यमनन्तरूपं भक्तानुकम्पा धृतविग्रहं वै।
ईशावतारं परमेशमीड्यं तं रामकृष्णं शिरसा नमामि।।
यथाग्नेर्दाहिकाशक्ती रामकृष्णे स्थिता हि या।
सर्वविद्यास्वरूपां तां सारदां प्रणमाम्यहम्।।
नमः श्रीयतिराजाय विवेकानन्दसूरये।
सच्चित्सुखस्वरूपाय स्वामिने तापहारिणे।।

अत्र अद्य विषयो वर्तते - शास्त्रेषु शब्दार्थसम्बन्धः। शास्त्रेषु शब्दार्थसम्बन्ध इति तु व्यापकविषयः। व्याप्यश्च शाब्दिकदिशा शब्दार्थसम्बन्धः। तत्र शब्दशास्त्रे शब्दार्थसम्बन्धः कः इत्येवास्ति मुख्यो विषयः। तथापि शास्त्ररीत्या कः शब्दः कश्चार्थ एतद्-विषये तु चोदनीयमेव वर्तते किमपि। एतत् स्पष्टं यद् यदि शब्दार्थौ न स्तः तर्हि जगदिदमन्धकारमयं स्यात्। जगदिदमन्धतमसा समाच्छन्नं भवेत्। एतत्तु दण्डिनापि काव्यादर्शे निगदितम्। भर्तृहरिणापि – "न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।" एवमादिभिः बह्वोभिः वाग्भिः शब्दार्थयोर्माहात्म्यं प्रकरीकृतमेव विद्वद्भिः। तत्रास्यां सभायां विशेषेण वैयाकरणरीत्या शब्दार्थयोः कः सम्बन्ध इति वक्तव्यः।

शब्दश्चार्थश्च शब्दार्थौ इति द्वन्द्वसमासः। शब्दार्थयोः सम्बन्धः शब्दार्थसम्बन्ध इति तु तत्पुरुषसमासः। तत्पुरुषसमासस्योत्तरपदप्रधानत्वात् शब्दार्थयोः सम्बन्ध एव मुख्यः प्रतिपाद्यो विषय इति भाति। तत्र शब्दार्थयोः गुणीभूतत्वात्। शब्दार्थयोः स्वरूपप्रकटनं नात्र मुख्यम्, किन्तु

शब्दार्थयोः यः सम्बन्धः, स सम्बन्धः कः, स सम्बन्धः किंस्वरूप इत्येव विशेषेण गद्यः। तथापि शब्दार्थयोरयं यः सम्बन्धः स च सम्बन्धिनं विना स्वस्वरूपं स्फुटतया प्रकटीकर्तुं न शक्नुयात्। सम्बन्धस्तु सम्बन्धिनिष्ठ एव भवति। अत एव तस्य सम्बन्धिनिरूपणाधीननिरूपणत्वात् शब्दार्थयोः स्वरूपमपि अत्र वक्तव्यम्। ततश्च शब्दार्थसम्बन्ध क इति विषयः।

अत्र वैयाकरणदिशा शब्दार्थसम्बन्ध आलोचनीयो वर्तते। वैयाकरणाः केवलं पाणिनीया एव न, अपाणिनीया अपि सन्ति। किन्तु अत्र शब्दार्थतत्त्वविषये पाणिनीयानामेवाभ्यर्हितत्वं दृश्यते इति मुख्यतः पाणिनीया रीतिरेवास्माभिरनुसृता भविष्यति। तत्रापि च पतञ्जलेर्महाभाष्ये, भर्तृहरेः वाक्यपदीये, वैयाकरणभूषणसारे, नागेशस्य लघुमञ्जूषायाम् – सर्वत्र शब्दार्थसम्बन्धः क एतद्विषये बहु किमपि चर्चितम्। तत्र पुनः ये तावत् प्रतिपक्षीयाः, नैयायिकामीमांसादयः, तेषां का का विप्रतिपत्तिः, तासां विप्रतिपत्तीनां कस्तावत् समाधिः एतत्

सर्वं तत्तद्ग्रन्थेषु एव वर्तते। तेषां एतादृशस्य चर्चासत्रस्य यन्मुख्यम् उद्देश्यं तद्धि प्रस्तुतविषये स्वतन्त्रसमीक्षणं, यत् टीकाग्रन्थादिषु न स्पष्टम्। विषयेऽस्मिन् यस्तावद् वक्ता, तस्य विशिष्टं किमपि पर्यवेक्षणमस्ति न वा तदेव चर्चासत्रे वक्तव्यम्, अन्यथा कस्मिन् ग्रन्थे किं किम् उक्तम् अस्ति तस्य संकलनपूर्वकं केवलं व्याख्यानमिह आपातरमणीयम् अपि सुधीभिः समर्थितं न स्याद् इति कृत्वात्र मम यन्मुख्यं मुख्यं पर्यवेक्षणमस्ति तत्तदेव केवलमहम् अत्र सूचयामि।

तत्र प्रथमं कस्तावत् शब्दशब्दस्यार्थः? शब्दशब्दस्य वाच्यः अर्थो वैयाकरणदिशा को भवेत् इत्यालोच्यम्। तथाहि शब्दविषये वैयाकरणानां किं मतम्? शब्दो नित्यो वानित्यो वा? किं शब्दस्वरूपम्? तत्तु मन्ये मया यद् यद् दृष्टं पुस्तकं प्रायो बहुत्र तत्रैतद्विषये स्पष्टतया किमपि लिखितं नास्ति। तत्र यद् यत् किमपि लिखितं मम दृक्पथमायाति, तत्तु ये लिखन्ति तेषां कृते स्पष्टम्, किन्तु पाठकानां कृते सर्वत्र स्पष्टं न भवति।

तदेव मम रीत्याहमेतत् कथयितुमिच्छामि। अत्र मम नूतनं यद् भविष्यति तद्धि वैयाकरणरीत्या एव तत्र यद् यद् व्याख्यानम्, तत्र यास्पष्टता वर्तते तत्र मम यत् पर्यवेक्षणं तदेवाहं कथयामि।

अद्वैतवेदान्तदर्शने प्रतिपादितमस्ति एकमेव ब्रह्मतत्त्वमस्तीति, जगदिदं तस्मिन्नध्यस्तम्। पाणिनीया वैयाकरणास्तु कथयन्ति यद् व्याकरणशास्त्रे यत्प्रायोगिकमस्ति, तदन्तराले अस्ति दर्शनम्। यथाद्वैतवेदान्तिनः कथयन्ति यत् कूटस्थं ब्रह्म, तस्मिन्नेव जगदिदम् अध्यस्तम्। ते कथयन्ति-

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**

**विवर्तते अर्थभावेन प्रक्रिया जगतो यतः।। इति।**

तदेतत् शब्दतत्त्वं जगत्प्रपञ्चस्य निमित्तकारणमपि उपादानकारणमपि। तत्र मदीयानुभूतिर्हि कूटस्थं यद् ब्रह्मतत्त्वं तस्य तु वाचकत्वं नास्ति। तस्य वाचकत्वं यदि आगच्छति तर्हि कौटस्थ्यमपेयात्। तत्र सर्वप्रच्युतिः भवेत्। एकमेव निर्विकारं यद् ब्रह्मतत्त्वं वर्तते तत् कथं वाचकं भवितुमर्हति। अतस्तस्य

शब्दतत्त्वस्य वाचकत्वं नास्ति। तद्धि एकम् निर्विकारम्। तच्च शब्दतत्त्वं शब्दशब्देनापि बोध्यते।

किन्तु यदाहं स्फोट इति कथयामि, स्फुटति अर्थः अस्मादिति स्फोटशब्दस्य बहुविधो विग्रहः प्रदर्शितः, तदा तु स्फोटत्वं नामार्थप्रकाशकत्वम्। अर्थप्रकाशकत्वं यदि मया तस्मिन् कूटस्थे शब्दब्रह्मणि आरोप्यते तर्हि स वाचकः शब्द इति उच्यते। यदा वाचक इत्यर्थे शब्दशब्दस्य प्रयोगस्तदा शब्दशब्दवाच्यं यद् ब्रह्मतत्त्वं, तन्निरूपाधिकं न वर्तते। वाचकत्वस्य आरोपेण सोपाधिकत्वं तत्र दृश्यते। अत एव शब्दशब्दस्य एकः अर्थः कूटस्थं ब्रह्मतत्त्वम्, अपरः अर्थः तु वाचकः शब्दः। स वाचकः शब्दो यः स्फोट इत्युच्यते तस्य प्रयोगः कदाचित् अर्थे अपि भवति। स्फुट्यत इति स्फोट इति विग्रहे अर्थार्थे स्फोटशब्दस्य प्रयोगः दृश्यते। क्वचिच्च एवं पदोच्चारणेन व्यङ्गः यः स्फोटः सः अपि स्फोटः। क्वचिच्च यः अनित्यो ध्वन्यात्मकः शब्दः सः अपि स्फोट इत्युच्यते। यद्वा भवतु, तत्र कूटस्थं ब्रह्मतत्त्वं शब्दः, यदा वाचकत्वं तत्रारोप्यते

सः अपि शब्दः। अपि च, ध्वन्यात्मकः शब्दः अपि शब्दः। किन्तु ध्वन्यात्मको यः अयं शब्दः स तु वस्तुतः, कूटस्थं यत् शब्दतत्त्वं तस्मिन् यथा जगत्प्रपञ्चः अध्यस्तः, घटपटादिकं यथा तत्रैवाध्यस्तं कूटस्थे, तथा सोऽपि अध्यस्तः। अत एव मम विचारानुसारं ध्वनिस्तु विवर्तितो भवति, यथा घटपटादिकं ब्रह्मविवर्तं तथैव शब्दतत्त्वस्य विवर्तरूपो भवति ध्वनिः। परन्तु स ध्वनिरपि शब्द इति शब्दशब्दस्यैते बहवः अर्था भवन्ति। तेषु अस्यां चर्चासभायां निर्धारितविषयानुसारं शब्दतत्त्वरूपः प्रथमः अर्थः कूटस्थशब्दतत्त्वमिति अत्र नागच्छति। सामान्यतः शब्दार्थ इत्युक्ते वाचकशब्द एव भाति। स च वाचकः शब्दः यथा स्फोटात्मा तथैव ध्वन्यात्मापि भवति। तथाहि पातञ्जलमहाभाष्ये विषये अस्मिन् बहु चर्चितम्। तथाहि पतञ्जलिना – **“येनोच्चारितेन सास्नालाङ्गुलककुदखुर विषाणिनां सम्प्रत्ययो भवति स शब्दः”** इति यदुक्तं तत्र येनोच्चारितेनेत्यस्य कैयटेन व्याख्यानं कृतमेवं प्रकाशितेन इति। तथाहि येनोच्चारितेन नाम येन प्रकाशितेन, अभिव्यक्तेन इति।

ध्वनयः न शब्दाः, उच्चरितप्रध्वंसित्वात वर्णानां ध्वनीनाञ्च। परमस्मिन् विषये न मम स्वरसः।अपि च, पतञ्जलिना अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते इति यदुक्तं तद्द्वारा ये सन्ति ध्वनयः तेषामपि शब्दत्वं तत्र प्रतिपादितम्।

अयं यः स्फोटः तत्र नित्यानित्यव्यवस्था या वर्तते, सिद्धे शब्दार्थसम्बन्धे इति वार्त्तिकस्य व्याख्याने पतञ्जलिना सिद्धशब्दस्य नित्य इत्यर्थः स्वीकृतः। सिद्धे शब्दार्थसम्बन्धे इत्यत्र त्रितयस्य नाम शब्दस्य अर्थस्य शब्दार्थयोः सम्बन्धस्य च नित्यत्वं प्रतिपादितं पतञ्जलिना। तर्हि नादाभिव्यङ्ग्यः यः स्फोटः शब्द इत्युच्यते स तु नित्यः। किन्तु ध्वन्यात्मको यः शब्दः स तु अनित्यः, किन्तु व्यवहारनित्यता तत्रास्ति एव। शब्दानां यथानादिकालतो व्यवहारो दृश्यते तादृशरीत्या व्यवहारनित्यता वर्तते। अथवा जातिरूपतां स्वीकृत्यापि नित्यता तत्र प्रतिपादिता पतञ्जलिना।

तत्र शब्दशास्त्रे स्फोटः अष्टविध उररीकृतः। तेषु अष्टविधेषु वर्णस्फोटः, पदस्फोटः, वाक्यस्फोटः,

वर्णजातिस्फोटः, पदजातिस्फोटः, वाक्यजातिस्फोटः, अखण्डपदस्फोटः, अखण्डवाक्यस्फोट इति स्फोटेषु अखण्डवाक्यस्फोट एव पारमार्थिक, इतरे शब्दस्फोटा न पारमार्थिका, अन्ये मिथ्याभूतास्ते, किन्तु स्वीक्रियन्ते ते स्फोटत्वेन अस्माकं साधारणानां बोधसौकर्याय। परं तत्रैव मम पर्यवेक्षणमस्ति किमपि एवं यद् अखण्डवाक्यस्फोटस्य पारमार्थिकत्वं कथम्? वस्तुतस्तु पारमार्थिकत्वं तत्र नास्त्येव। अखण्डवाक्यस्फोटः नाम कूटस्थं शब्दतत्त्वं हि कदापि वाचकं भवितुं नार्हति। वाचकत्वं यदुच्यते, तद्धि औपाधिकमेव। तत्र अखण्डवाक्यावच्छिन्नः यः स्फोटः स यदैवावच्छिन्नो भवति तदैव पारमार्थिकत्वं जहाति। मूलं यद् शब्दतत्त्वं तद्दृशा तु तन्नित्यम्। किन्तु उपाधिर्यो वर्तते अखण्डवाक्यस्फोटत्वं, तद्धि न पारमार्थिकम् उपाधिसत्त्वात्। वस्तुतो विचारे केवलं शब्दतत्त्वमेवाखण्डं तिष्ठति। तर्हि केन हेतुना तस्य पारमार्थिकत्वमिति प्रश्ने सर्वैः ध्यानं देयम्।

मम विचारानुसारमेवमेवात्र व्याख्यानं यद् – एतस्याखण्डवाक्यस्फोटस्य पारमार्थिकत्वं न पारमार्थिकदृष्ट्या, किन्तु आपेक्षिकतया। वर्णपदाद्यपेक्षया तस्य पारमार्थिकत्वम्। कथमिति चेत्, अखण्डवाक्यस्फोटः न कस्यापि अन्तर्गतो भवति। यथा वर्णस्फोटः पदस्फोटव्याप्यः, पदस्फोटश्च वाक्यस्फोटव्याप्यः। एवमन्ये अपि। किन्तु अखण्डवाक्यस्फोटः न व्याप्यः, केवलं व्यापक एवेति तद्दृष्ट्या तस्य पारमार्थिकत्वमिति मम विचारः। किन्तु एवं कृते सत्यपि तत्र समस्या हि अखण्डपदस्फोटः न कथं पारमार्थिकः। ननु अखण्डवाक्यस्फोटस्य पारमार्थिकत्वं कया दृष्ट्या। अत्र वैयाकरणा वदन्ति एकस्मिन् अखण्डवाक्ये पदेन वर्णा वा विद्यन्ते इति कारिकानुसारं प्रतिपाद्यते यद् अखण्डवाक्ये वर्णपदादिविभाग एव नास्ति। अस्माभिः कल्प्यते सौविध्यार्थम्। किन्तु यदैव कोऽपि शब्द उच्चार्यते, तदैव किं वाक्यान्तर्गततया उच्चार्यते। यथा यदा प्रातिपदिकार्थे घटपदमिति केवलमुच्चार्यते तदा तु वाक्यत्वं नास्ति। तदा घटपदेन यः स्फोटः अभिव्यक्तो भवति तेन एव घटपदार्थः

प्रकाश्यते। तर्हि अयं यः घटपदस्फोटः स हि न वाक्यान्तर्गतः। अतः वाक्यमनपेक्ष्यैव सः अर्थं प्रकाशयति इति तस्य कथं न पारमार्थिकत्वम्। पतञ्जलिनापि स्फोटस्य यदुदाहरणमुपन्यस्तं तन्नोदाहृतं वाक्यदृशा, यथा अथ गौरित्यत्र कः शब्दः इति अत्र गौरिति पदमवलम्ब्यैव, न तु वाक्यमवलम्ब्यात्र विचारः कृतः। अत एव पदस्फोटस्य अपारमार्थिकत्वं यदीहितं भवति तर्हि कथं न तत्र वाक्यस्फोटस्योदाहरणं पतञ्जलिना प्रदत्तम्। अत एव अखण्डपदस्फोटः न कथं पारमार्थिक इत्येतद् भवद्भिरपि चिन्तनीयम्। किञ्च, केवलं पदं यदस्ति तत्र किं भवति इत्यपि चिन्तनीयम्। तत्र ममोत्तरमस्ति - आदौ पार्श्वतः अन्यदुदाहरणं ददामि, यथा जातिः। जातिः परापराभेदेन द्विविधा। परा जातिः सत्ता, अपरसामान्यं तु अन्यत्सर्वम्। किन्तु मध्ये परापरं यदस्ति सामान्यं, तस्य विभागमनेके न कुर्वन्ति, अपरमध्ये एव तस्य स्थापना कुर्वन्ति। यदा केवलमेकं पदमुच्चार्यते, तदा तस्य पारमार्थिकत्वम्। किन्तु वाक्यदृष्ट्या तु अपारमार्थिकमेव। वस्तुतस्तु पारमार्थिकत्वमपारमार्थिकत्वम् चेति द्वयं तस्य स्वरूपे अस्ति। किन्तु शुद्धपारमार्थिकत्वं नास्ति।

शुद्धपारमार्थिकत्वं केवलं तु अखण्डवाक्यस्फोटस्यैव वर्तते। अहं मन्ये एतदेव हृदि निधाय अखण्डवाक्यस्फोटः एव पारमार्थिक इत्युक्तः।

अपरः कश्चिद् विचारस्तत्र, वैयाकरणानां नये अखण्डवाक्यस्फोटः अखण्डमर्थं प्रकाशयति। सः अर्थः कथमागच्छति, शक्तिद्वारा एव। अखण्डवाक्यमखण्डमर्थं शक्त्या एव प्रकाशयति। तर्हि तु पारमार्थिकदृष्ट्या वैयाकरणनये अपि वाक्यार्थः शक्य एव। यथा शाब्दबोधे शब्दप्रमाणेन यः अर्थः लभ्यते, वैयाकरणानां नये पारमार्थिकदृशा एवं न भवति।

तर्हि अन्विताभिधानमभिहितान्वय इत्येतद्द्वयं यदस्ति तत्तु पारमार्थिकदृष्ट्या नैवायाति। कथम्, अन्विताभिधानं यदा उच्यते तदा अन्विताभिधानमपि तत्र वाक्यात् पदस्य भेदं स्वीकृत्यैवोच्यते। वाक्याद् यदि अन्विताभिधानं वा भवतु, अभिहितान्वयो वा भवतु, पदस्य वाक्यात् भेदो यदि न स्वीक्रियते तर्हि अन्विताभिधानमपि नोपस्थापयितुं शक्यते,

नापि चाभिहितान्वयमपि उपस्थापयितुं शक्यते। अन्विताभिधानमते तावत् किमुच्यते, पदस्य पृथक् सत्तास्ति, परन्तु पदस्यार्थः पदार्थः अन्वितः सन् एव प्रथमतः अस्माकमग्रतः प्रकटितो भवति। किन्तु पदार्थः कोऽपि वाक्यार्थात् पृथक् इति तु स्वीक्रियते एव। अभिहितान्वयवादे तु प्रत्येकपदस्यार्थः आदावेवाभिहितो भवति। तत्रापि वाक्यार्थात् पदार्थस्य पार्थक्यमवलम्ब्यैव एवं क्रियते। किन्तु वैयाकरणरीत्या पारमार्थिकदृशायाम् अखण्डवाक्यस्याखण्डार्थ एकः अस्ति। तत्र वर्णपदादिविभागः पारमार्थिक एव नास्ति। तर्हि तत्रान्विताभिधानमभिहितान्वय इति एतद्द्वयमपि न स्यात् पारमार्थिकदृष्ट्या। किन्तु अपारमार्थिकदृष्ट्या लौकिकव्यवहारदृष्ट्या तु यस्मात् पदवर्णस्फोटादिकं स्वीक्रियते तदा तु साधारणबुद्धिसौकर्यार्थं पदार्थः अपि वाक्यार्थात् पृथक्तया वैयाकरणैः स्वीक्रियते व्यवहारदशायाम्। तदा तु तत्रान्विताभिधानमभिहितान्वय इति एतद्द्वयं भवति। किन्तु मम विचारानुसारं तच्च पदं, वर्णो वा इत्येतत्सर्वं हि अपारमार्थिकम्। अतो न केवलं

तत्रान्विताभिधानमभिहितान्वयो वा इति वक्तव्यं, यस्मात् एतन्न सम्मतमस्ति पारमार्थिकदृष्ट्या। तस्मात् कल्पितान्विताभिधानं तथा कल्पिताभिहितान्वय इत्येवं किमपि वक्तव्यमित्यहं चिन्तयामि वैयाकरणदिशा।

तत आगच्छामि अर्थविषये। कस्तावदर्थः। तत्रादौ वक्तव्यं, सः अर्थः हि द्विविधः। वस्ततस्तु शब्दतत्त्वमेकमेव। तस्यार्थत्वमथवा वाचकत्वं यदि उच्यते तर्हि कौटस्थ्यस्य हानिः। अत आरोपवशादेवार्थत्वमिति वक्तुं शक्यते। अन्यथा तु किमपि वक्तुं न शक्यते। अत एवार्थ इति उच्चार्य्यमाणे द्विविधः अर्थः ग्राह्यः। तत्र तदेव एकं ब्रह्मतत्त्वं संसारे प्रपञ्चे अध्यस्तं वर्तते। स तु अर्थः। अर्थः कार्यः इति वक्तुं शक्यते। सः अपि एकः अर्थः। किन्तु अपरः अर्थः हि शब्दस्य यः वाच्यः सः। तत्रैव शब्दतत्त्वरूपे ब्रह्मणि अखण्डे यदिदं जगदध्यस्तं सः अपि अर्थः। अत्र अर्थशब्दस्य शब्दार्थ इति अर्थः न ग्राह्यः। किन्तु स एवार्थः यदा शब्दतत्त्वे वाचकत्वमारोप्य तद्विषयता यदि उररीक्रियते

तर्हि स एव वस्त्वर्थः, तद्विषयताभिधेयार्थः क्षण्डायते। अत एव वस्त्वर्थः अभिधेयार्थ इति अर्थद्वयमस्ति।

तत्रैकः प्रश्नः भवति यद् अर्थः कः, शब्दः कः, तत्र सामान्यरीत्या उच्यते, यस्मिन् उच्चारिते इति ध्वनिदृष्ट्या, यस्मिन् प्रकाशिते इति स्फोटदृष्ट्या कस्याप्यर्थस्य प्रतीतिः, स शब्दः। तत्र शब्दशब्दस्य लक्षणे अर्थज्ञानमपेक्षितम्। ननु कः अर्थः, कस्मिन्नपि शब्दे उच्चारिते यः प्रतीतो भवति सः अर्थः। तदापि अर्थज्ञाने शब्दज्ञानमपेक्षितं भवति। वस्तुतस्तु अहं वाच्यार्थविषये एतत् कथयामि। न तु वस्त्वर्थविषये। वाच्यार्थभूतो यः अर्थः तस्य लक्षणे शब्दस्य ज्ञानमपेक्षितम्। शब्दस्य ज्ञाने चार्थस्य ज्ञानमिति अन्योन्याश्रयः।

तत्र पुनरपि अपरः दोषः अपि भवितुमर्हति। तत्र वाक्यपदीये - यस्मिंस्तूच्चरिते शब्दे यदा योऽर्थः प्रतीयते । तमाहुरर्थं तस्यैव नान्यदर्थस्य लक्षणम्।। इति यस्मिन् शब्दे उच्चरिते यः अर्थः प्रतीयते स एव तस्य शब्दस्यार्थ इति। तर्हि

अर्थस्य ज्ञाने पुनः अर्थस्य ज्ञानमेवापेक्षितमिति आत्माश्रयः अपि वक्तुं शक्यते। इतः कथं निष्कृतिः इति प्रश्नः।

तत्र ममैतदुत्तरं मदीयपर्यवेक्षणानुसारं यदत्रार्थस्य नैतदस्ति लक्षणम्। एतत्तु स्वरूपप्रकाशनम्। स्वरूपं तु लक्षणाद् भिन्नम्। एतदत्रार्थस्य स्वरूपम्। तर्हि कः अर्थः, यो व्यवहारिकदृष्ट्या पारमार्थिकदृष्ट्या वास्ति स एवार्थ इति। स एवार्थः यः अस्ति वर्तते इति। तत्रैतदुच्यते व्यवहारिकदृष्ट्या येन केनापि उपायेन बुद्ध्यारूढः सन्, अथवा वस्तुगत्या वा यः अस्ति स एवार्थः। तेनार्थस्य लक्षणं शब्दलक्षणाक्रान्तं न भवति। तस्यार्थस्य वाचक एव शब्दः। एवं कृते सति सामञ्जस्यं भवितुमर्हति। एतेनान्योन्याश्रयदोष आत्माश्रयदोषो वा न भवति। वस्तुतस्तु तदेव तात्पर्यं चिन्तयाम्यहम्। कथम्, उच्यते - यस्मिंस्तूच्चरिते शब्दे यदा योर्थः प्रतीयते इति। यदा यः अर्थः प्रतीयते शब्दे उच्चारिते, अयमर्थः यः अस्ति स हि वस्त्वर्थः। यो वस्त्वर्थो येन शब्देनोच्यते स वस्त्वर्थ एव, 'तमाहुर्थम्' इति अभिधेयार्थः। अत एव येन शब्देन यो वस्त्वर्थः अभिधीयते स

एव वस्त्वर्थः अभिधेयः। किन्तु पुनरप्यत्र एकः प्रश्न आगच्छति यन्नागेशभट्टः शक्तिनिरूपणावसरे शक्तेः लक्षणं यत् कृतवान् तल्लक्षणं वैयाकरणसम्मतं, परं न तत् नैयायिकैः स्वीक्रियते। नापि कौण्डभट्टेन वैयाकरणभूषणसारे नैयायिकी शक्तिरुररीकृता। नापि च लघुमञ्जूषाकृतापि। परं नागेशेन महाभाष्यवचनं पाथेयीकृत्यागादि - यत् वस्तुतस्तु शब्दार्थयोः यः सम्बन्धविशेषः शक्तिः न स ईश्वरेच्छाविशेषः, अपि तु तद्भिन्न एव सम्बन्धविशेषः। स च सम्बन्ध इतरेतराध्यासमूलकः तादात्म्यसम्बन्धः। ननु इतरेतराध्यासः कः, इत्येवात्र प्रश्नः।

तत्रोच्यते सामान्यतः ध्वन्यात्मको घटपटादिरूपः यः शब्दः तथा यश्चार्थः नाम घटपटादिपदार्थः इत्येतद्द्वयं वस्तुतो भिन्नम्। किन्तु इतरेतराध्यासमूलको नाम यः शब्दः स एवार्थः, यः अर्थः स एव शब्दः इति। एवमेकः अध्यासस्तत्र वर्तते। इतरेतरात्मकः सः अध्यासः। तत्र पुनः प्रश्नः अध्यासः कः इति।

वस्तुतस्तु अध्यासे यः अभेदः भासते स न पारमार्थिकः। वस्तुगत्या भिन्न एवाभेदस्तत्रारोप्यते।

तत्रापि एकः प्रश्नः नैययिकैः स्वीकृतः यत् शब्दार्थयोः यदि अभेदस्तर्हि मधुशब्दोच्चारणेनैव मधुपदार्थास्वादः उच्चारयित्रा न कथं प्राप्यते, तस्यैवोत्तरं प्रददता नागेशेन एकमुत्तरं प्रदत्तं तत्र यत् – न, वस्तुतस्तु शब्दार्थयोर्भेद एव। अभेदस्तु तत्रारोपितः। अतः वस्तुगत्या शब्दार्थौ परस्परं भिन्नौ। मधुशब्दो भिन्नः, मधुपदार्थः अपि भिन्नः। अत एव मधुशब्दोच्चारणेन न मधुन आस्वादः प्राप्तुं शक्यते इति। तत्परमेवोक्तं यत् अत्र यः शब्दार्थः न स वस्त्वर्थः। तन्नाम वास्तविकं मधु मिष्टं तरलं न मधुपदार्थः, अपि तु अत्र बौद्धः अर्थः कश्चित् ग्राह्यः। अतस्तत्र मधुन आस्वादो न लभ्यते। परं तु यदेतदुक्तं नागेशेन तत्र मया बहु किमपि विचार्योच्यते नेदं युक्तिसम्मतम्। किञ्च, आधुनिकेषु अपि पुस्तकेषु बहुषु बहु किमपि एवं नागेशसमर्थनाय लिखितम्। तदपि न युक्तिसारम्। मन्ये नागेशः अपि तत्सर्वं दृष्ट्वा हसेत्। तत्सर्वमेव पर्यालोच्य

मयैतद्विचिन्तितं यद् अस्मिन् विषये किमपि चिन्तनीयमस्ति। सर्वैरेव एतत् वेदितव्यम्। यद्वा भवतु, अत्रभवन्तः अत्र पश्यन्तु, नागेशेन बौद्धार्थः स्वीकृतः। परन्तु अन्यत्र भूषणसारकारादिभिरन्यैः न स्वीक्रियते बौद्धार्थः, नैव। तत्राहं चिन्तयामि नागेशेन कथमेवं बौद्धार्थः उररीकृतः नैयायिकसकाशात् समागतं लोष्ट्रं प्रतिहन्तुम्। तत्र जयन्तभट्टस्य न्यायमञ्जर्यामेकं वचनमस्ति, केचन बौद्धा वदन्ति यत् प्रमाणं ज्ञानरूपम्। तत्खण्डनाय मीमांसकैर्यदुक्तं तद्धि ज्ञानं हि क्रियास्वरूपम्। तत्र पुनः मीमांसकानुपहसता जयन्तेनोक्तम् – **'केभ्यः विभ्रतः इमे श्रोत्रियाः, अपि च, मधु पश्यसि दुर्बुद्धे प्रपातं नैव पश्यसि'** इति। तत्राहमपि चिन्तयामि अपरः कश्चन मार्गस्तत्र दर्शयितुं शक्यते। तथाहि अत्र बौद्धार्थस्वीकारस्य नास्ति कापि परयोजनीयता। यतो हि नैयायिकैः उच्यते यः शब्दः सः अर्थः, यः अर्थः स शब्द इति यः अध्यासः स तु ध्वन्यात्मकं शब्दमेवावलम्ब्य। ध्वन्यात्मकः शब्द एव मुखेनोच्चार्य्यते। अत एव ध्वन्यात्मकशब्देन सहार्थस्य तादात्म्यमेव शक्तिरिति यदि स्वीक्रियते तर्हि यः प्रश्नः

नैयायिकैः कृतः स उत्तरयितुं दुःशक इति भवितुमर्हति। किन्तु यद्येवमुच्यते, वस्तुतस्तु वैयाकरणैः न ध्वन्यात्मकः, अपि तु ध्वनिव्यङ्ग्यः स्फोटात्मक एव शब्दत्वेन स्वीक्रियते। तेन स्फोटात्मकेन सहार्थस्याभेद इत्येवं यदि चिन्त्यते तर्हि शब्दोच्चारणसमनन्तरमेव मधुन आस्वादः प्राप्तुं शक्यते इति न वक्तुं शक्यते। कथं, यः स्फोटः न स मुखेनोच्चारयितुं शक्यते। अतो नैयायिकानां तादृशगर्हणवह्निः एतादृशयुक्तिजलेनैवोपशमनीयः। वस्तुतस्तु बहुपूर्वत एव वैयाकरणैः ध्वन्यात्मकशब्दो न शब्दः, किन्तु स्फोटात्मकः व्यङ्ग्य एव शब्द इति उररीकृतः। तेन नादाभिव्यङ्ग्येन सहैवार्थस्याभेदाध्यासः इति स्वीक्रियते चेत् तन्न दोषाय। अपि च, ध्वन्यात्मकशब्दे एकस्मिन् एव काले ध्वनिसङ्घातो न भवितुमर्हति। तथापि मधुशब्दस्योच्चारणकाले न तत्र मकारस्थितिः। म् अ ध् उ इत्येतच्चतुष्टयसङ्घातस्य यदि युगपदुच्चारणं सम्भवेत् तदैव केवलं मधुनो मुखेनास्वादलाभः। तत्तु भवितुं नार्हति। अयमपि पन्था उन्मुक्त एवासीत् नागेशस्य पुरतः। परं कथं तत्र नागेशेन पन्थानमतीत्य कापथमाश्रितं तत्तु

चिन्तनीयमस्ति। वस्तुतस्तु मम विचारानुसारं वस्त्वर्थो यदि शब्दद्वारा वाच्यो भवति तर्हि स एवाभिधेयो भवति। स च वस्त्वर्थो बहुविधः। स च वस्त्वर्थो यथा घटपटादिकमिति अबौद्धो भवितुमर्हति, तथैव बौद्धः अपि भवितुमर्हति। शब्दार्थयोः बौद्धत्वस्य प्रतिपादनेन बौद्धभिन्नार्थो भवितुं नार्हति इति तु न। वस्तुतस्तु अर्थः द्विविधः। तथाहि तद् यथा घटपटादिवत् बाह्यं वस्तु भवति तथैवान्तरं वस्तु ज्ञानमपि वाच्यं भवति। अत एव नागेशेन यत् युक्तिजालमुपस्थाप्यते, बौद्धार्थो यदि स्वीक्रियते शशशृङ्गो नास्ति इति प्रतीतिः कथं स्यात्, तत्र उच्यते भवतु तत्र तत्र बौद्धार्थः स्वीक्रियताम्। किन्तु सर्वे एवार्थाः बौद्धा इति कथं भवेत्, क्वचित् क्वचित् बाह्यतः वस्त्वर्थमबौद्धार्थमवलम्ब्यापि व्यवहारः भवति। अतः मम विचारानुसारं शब्दार्थः केवलं बौद्धार्थ इति न युक्तियुक्तम्। किन्तु एतन्नागेशमतं समर्थयितुं केचन भर्तृहरेः वचनमुपस्थापितवन्तः। तत्र हरेर्यद् वचनमुपस्तापितं तत्र स्पष्टत उक्तमस्ति - ज्ञानं प्रयोक्तुर्बाह्यार्थः स्वरूपञ्च प्रतीयते इति। पश्यतां तत्र नागेशेनापि स्वयं कथ्यते बाह्यार्थो नामार्थः

अपि प्रतीयते स्वीक्रियते इति। तर्हि केवलं बौद्धार्थ एवार्थ इति स्वीकारस्तु अनुचितः। तत्र केनापि व्याख्यात्रा एवं व्याख्यातं यदर्थो बौद्ध एव। कथम्, हेलाराजेन वाक्यपदीयस्य व्याख्याने उक्तं – इहैव हि व्याकरणे न वस्त्वर्थः अर्थः, अपि तु शब्दार्थः इति। परं शब्दार्थ इत्यनेन वस्त्वर्थ एव गम्यते। न तु बौद्धः अर्थः। अस्य तात्पर्यं व्याकरणे यदा वाचकः शब्द उच्यते तदा तु वस्त्वर्थत्वेन न, किन्तु शब्दार्थत्वेन अर्थ एवमेव। अत्रापि वस्त्वर्थः न तात्पर्यमित्यस्यार्थः वस्त्वर्थो न वस्त्वर्थतावच्छिन्नतया, वस्त्वर्थत्वेनावच्छिन्नः सन् वस्त्वर्थो नार्थः, किन्तु अभिधेयत्वेन इत्येव। तत्र कुत्रापि बौद्धार्थ इति लिखितं नास्ति, किन्तु एतदवलम्ब्य बहुत्र भ्रान्तव्याख्यानप्रचेष्टा विहिता।

यद्वा भवतु, अर्थविषये अधिकं नोदित्वा सम्बन्धविषये किञ्चित् कथयामि। ननु सम्बन्धः कः, विशिष्टबुद्धौ विशेष्यं विशेषणञ्च वर्जयित्वा यः अन्यः पदार्थः धीविषयो भवति स एव सम्बन्धः। ननु सम्बन्धः स एव यो

विशेष्यविशेषणभावनियामकः। तर्हि शब्दार्थयोर्मध्ये यः सम्बन्धः सः अपिविशेष्यविशेषणभावनियामकः। तत्र पदं हि अर्थवत्। एतद्धि द्विविधं भवति। तथाहि पदपदार्थयोर्मध्ये यः सम्बन्धः स क्वचित् पदं विशेष्यं करोति पदार्थञ्च विशेषणीकरोति, तथैव क्वचित् पदार्थं विशेष्यीकृत्य पदं विशेषणीकरोति। अत एव पदवान् अर्थः। तत्रार्थे पदं विशेषणम्। क्वचिच्चार्थवत् पदमेवमपि भवति। तथाहि शक्तिवादग्रन्थे गदाधरभट्टेन - अस्मात् शब्दात् अयमर्थो बोद्धव्यः, अथवा एतत्पदमिममर्थं बोधयतु इति द्विविधा या इच्छा स्वीकृता तस्यामिच्छायाम् अर्थस्तथा पदमेतद्द्वयमेव विषयो भवति। तत्र वाक्यद्वये भिन्नं भिन्नं विशेष्यद्वयमस्ति। पदपदार्थयोर्यः सम्बन्धस्तत्र पदं वाचकम्, अर्थश्च वाच्यो भवति। अतः पदं वाच्यतासम्बन्धेनार्थे, अर्थश्च वाचकतासम्बन्धेन पदे वर्तते। सोऽयं पदपदार्थसम्बन्धो नित्यः। ननु स किंदृष्ट्या नित्यः? यदि सम्बन्धिद्वयं नित्यं भवति तदा तु सम्बन्धोऽपि नित्य एव भवति। मया तु पूर्वमेवोक्तं शब्दतत्त्वं

द्विविधं बाह्यप्रपञ्चदिशा वाचकप्रपञ्चदिशा। तत्र कूटस्थं यद् ब्रह्मतत्त्वं तदेव शब्दतत्त्वमस्ति। तद्धि निमित्तकारणमुपादानकारणं वा भवतु बाह्यप्रपञ्चो भवति कार्यः। तत्र एतद्द्वयोर्मध्ये कार्यकारणभावो भवितुमर्हति। एतद्दृष्ट्या स सम्बन्धो नित्यो भवितुमर्हति। अपि चानादिकालतः एवं व्यवहारः प्रचलतीति व्यावहारिकदृष्ट्या तस्य नित्यत्वं प्रतिपादयितुं शक्यते। किन्तु वाच्यवाचकभावः सम्बन्धो यदि आगच्छति तत्रापि स सम्बन्धो नित्यः। कथं? तत्र नादाभिव्यङ्ग्यः यः स्फोटः स यदि शब्दो भवति, तद्द्वारा योऽर्थः घटपटादिरूपः प्रतीयते सोऽनित्योऽर्थः। किन्तु व्यवहारस्तु अनादिकालतः प्रचलतीति व्यावहारिकदिशा नित्यत्वं वक्तुं शक्यते।

सामान्यदृष्ट्या अनित्यमपि वक्तुं शक्यते। तत्र पदपदार्थयोः यः सम्बन्धो नित्य इति कथ्यते तत्राहं कथयामि, वाचको यः शब्दः वाच्यश्च योऽर्थः तयोर्यः नित्यः सम्बन्ध उच्यते स सम्बन्धः किंविधस्तत्र तु योग्यतारूपः सम्बन्ध

एकोऽस्ति। स योग्यतारूपः सम्बन्धः किं करोति अस्माच्छब्दात् अयमर्थो बोद्धव्य इति एकशब्दादेकोऽर्थो यः बोद्धव्यः स हि कथं बोद्ध्यते? उच्यते - अनादियोग्यतारूपसम्बन्धवशात्। तत्र तु इन्द्रियाणां सविषयेषु अनादिर्योग्यता यथा। अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा इति एतत्सर्वं तु व्याख्यातं वाक्यपदीये भूषणसारे। तत्र तु या शक्तिः, पदपदार्थयोर्मध्ये सम्बन्धः स सम्बन्धः शक्तिरूपसम्बन्धः इति भूषणसारकृता स्वीकृतः। लक्षणा तु शक्तिमध्येऽन्तर्गच्छति। नागेशेनापि लक्षणायाः पृथक्त्वं न स्वीकृतम्। परं तेन व्यञ्जना स्वीक्रियते। व्यञ्जना पुनस्तत्र संस्काररूपा।

यद्वा भवतु सोऽयं यः योग्यतासम्बन्धः तस्य व्याख्यानं वाक्यपदीये एवं प्राप्यते—

**शब्दः कारणमर्थस्य सहितेनोपयुज्यते।**
**तथा च बुद्धिविषयादर्थात् शब्दः प्रतीयते।।**

एतेनोच्यते शब्दः अर्थस्य कारणं, अर्थः शब्दस्य कारणम्। एवं कार्यकारणभावोऽस्ति। किन्तु एतद्विषयेऽपि

दुर्व्याख्या मम दृक्पथमायाति। कथम्?केचन कथयति, शब्दः कारणमर्थस्य इत्यत्र अर्थः ज्ञानरूपः। एकस्मिन् शब्दे उच्चारिते योऽर्थः प्रतीयते, तत्र ज्ञानमेवार्थः। शब्दे उच्चारिते तज्ज्ञानं जायते। अत एवार्थः ज्ञानरूपः।

अत्र भर्तृहरिपादस्य एवं तात्पर्यम् - शब्दस्य शब्दद्वारा स ज्ञानरूपोऽर्थः उत्पन्नः। अपि चार्थः क्वचित् क्वचित् शब्दस्य कारणं भवति। कथम् ? बौद्धरूपेऽर्थे आविर्भूते एव तत्परं प्रकाशार्थं शब्द आगच्छति। अत एव शब्दस्य कारणमर्थ इति। अपि च, एवं ते कथयन्ति — यस्मिंस्तूच्चारिते शब्दे यदा योऽर्थः प्रतीयते इति वचनमेव ते अवलम्बन्ते। किन्तु अत्रार्थस्य ज्ञानरूपता नास्ति। यस्मिन् शब्दे उच्चारिते योऽर्थः प्रतीयते, इत्यत्र या प्रतीतिर्भवति सोऽर्थ इति तु नास्ति। अतः प्रतीतिः भिन्ना, अर्थो भिन्न इति तु स्फुटमेव। अत एव कथं शब्दार्थयोः जन्यजनकभावं ते उपपादयन्ति? मम विचारानुसारमस्य एतद् व्याख्यानं भवितुमर्हति एवम्— वस्तुतस्तु शब्दार्थयोर्मध्ये जन्यजनकभावो नास्ति व्यवहारदशायाम्। कूटस्थं ब्रह्म यदस्ति

तत्तु उपादानकारणं निमित्तकारणमिति बोधयितुमुक्तं शब्दः कारणमर्थस्येति। किन्तु वाच्यवाचकरूपौ शब्दार्थौ यदि स्वीक्रियेते तदा तु न भवितुमर्हति। वस्तुतस्तु मन्मते शब्दः कारणमर्थस्य सहितेनोपजन्यते इति अत्र शब्दः अर्थस्य कारणं, बुद्धिविषयादर्थात् शब्दः प्रतीयते इत्यत्र तु शब्दो जन्यते इति न लिखितम्। एवं सहितेनोपयुज्यते इत्यत्रापि उपजन्यते इत्यस्यापि प्रतीयते इत्यर्थः स्वीकार्यः। वस्तुतस्तु शब्दप्रतीतिः पूर्वभाविनी परभाविनी चार्थप्रतीतिः। शब्दप्रतीतिः कारणम्, अर्थप्रतीतिश्च कार्यम्। अत एव शब्दार्थयोर्मध्ये कार्यकारनभावो न , तयोः प्रतीत्योर्मध्ये कार्यकारणभावं व्याख्यातुं शक्यते। अथवा एवमपि वक्तुं शक्यते शब्दे तु वाचकत्वमस्ति अर्ते तु वाच्यत्वमस्ति। अत एव सामान्यतः योऽर्थः यदा कस्यापि शब्दस्योच्चारणं न करोमि तदा तु स शब्दः शब्द एव वर्तते। यदा वाच्यवाचकभावमारोपयामि तदा वाचकत्वावच्छिन्नः शब्दः, वाच्यत्वावच्छिन्नाश्चार्थ इत्येतादृशोऽर्थ उपपद्यते। वाच्यत्वद्वारा अनवच्छिन्नः सः अर्थोऽस्ति। यदा तु शब्दद्वारा अभिधेयो भवति तदा वाच्यत्वावच्छिन्नो भवति। अत एव

वाच्यत्वावच्छिन्नत्वं नूतनं जायते। एवम् उत्पाद्योत्पादकभावः कल्पयितुं शक्यते इति मे विचारः। तत्परञ्चास्ति तादात्म्यसम्बन्धः। तादात्म्यसम्बन्धविषये उक्तं यत्- पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः, वाच्यवाचकभावापरपर्यायातद्भाहकञ्चेतरेतराध्यासमूलकं तादात्म्यमिति जगदीशेनोक्तम्। क्वचिच्चार्थप्रतीतिः पूर्वं भवति, शब्दप्रतीतिः परं भवति। तदा अर्थप्रतीतिः कारणं, शब्दप्रतीतिः कार्यम् इति। वस्तुतस्तु नागेशेनोच्यते- शब्दः पृथक् अर्थः पृथक्। शब्दार्थयोर्मध्ये कथमपि अभेदो नास्ति। किन्तु तथापि अभेदः आरोप्यते। अत आरोपितः अभेदः अस्ति। किन्तु शब्दार्थयोर्मध्ये वस्तुतस्तु अभेदोऽपि वर्तते। तथाहि माधवाचार्यस्य सर्वदर्शनसंग्रहे पाणिनीयदर्शनप्रबन्धे भर्तृकारिकामुदाहृत्योक्तं माधवेन –

**वाच्या सा सर्वशब्दानां शब्दाच्च न पृथक् ततः।**
**अपृथक्त्वेऽपि सम्बन्धः तयोर्जीवात्मनोरेव।।**

तत्रोक्तम् – **“तत्तदुपाधिपरिकल्पितभेदबहुलतया व्यवहारस्याविद्यामात्रकल्पितत्वेन प्रतिनियताकारोप जीयमानरूपभेदं ब्रह्मतत्त्वं सर्वशब्दविषयः। अभेदे च पारमार्थिके संवृत्तिवशाद् व्यवहारदशायां स्वप्नावस्थावदुच्चावचः तत्प्रपञ्चोऽपि वर्तते”** इति। तर्हि तेनोक्तम् भर्तृकारिकामवलम्ब्य यद्वस्तुतः शब्दार्थयोर्मध्येऽभेदः एव वर्तते। तत्र भेदस्तु आरोपितो भवति। अविद्यापरिकल्पितः भवति भेदः। एवं महाभाष्यानुसारं नागेशेनापि उच्यते – द्वयोर्मध्येऽयं यो विरोधः। ननु केन सत्यमुच्यते? इति विरोधः उपस्थापितः अधुना तत्र एवं समाधिः, वस्तुतस्तु अयं य शब्दार्थयोर्मध्येऽभेद उच्यते। तत्राध्यारोपापवादौ एतद्वयमस्ति। तत्र अध्यारोपविषये उच्यते रज्ज्वौ सर्पस्यापोपः क्रियते। रज्जुः पृथक्। सर्पोऽपि भिन्नः। तथापि आरोपः। एवं ब्रह्म पृथक्। ब्रह्मणि अध्यस्तं जगदपि पृथक्। तत्राध्यस्ततया जगत्तु ब्रह्मणः पृथगस्ति। किन्तु तयोरभेदस्तु आरोप्यते एव। अपवादश्च एवम् – यत् जीवो ब्रह्म एव। वस्तुतस्तु अयं यः संसारः स तु ब्रह्मणि

अध्यस्तः, विवर्तितः स प्रपञ्चः, किन्तु मूलं तु अखण्डं ब्रह्मतत्त्वम् एवास्ति। इहापि माधवेन हरिकारिकामवलम्ब्य सर्वदर्शनसंग्रहे शब्दार्थयोर्य अभेदः प्रदर्शितः, स अपवादन्यायेन। अपवादन्यायेन तेनोक्तं यद् वस्तुतस्तु तद् एकमेव ब्रह्मतत्वमस्ति, अर्थत्वं तु आरोपितं तत्र। एतद्दृष्ट्याभेदः। किन्तु यदा वाग्व्यवहारो भवति – शब्दोऽयं , अर्थः अयम् , तत्र तु भेदः। नागेशेन शक्तिपर्यालोचनकाले शब्दार्थयोर्वस्तुनः भेदः अस्ति इति उक्तमध्यारोपन्यायेन। भेदः अस्ति किन्तु अभेद इति यदुक्तं तत्तु अध्यारोपन्यायेन एव। अध्यारोपन्यायेन तत्र परस्परभिन्नयोः योऽभेदः आरोप्यते तन्मूलकव्यवहारस्तत्र शक्तिद्वारा भवति। अत एव वस्तुनोर्द्वयोर्मध्ये कोऽपि विरोधो नास्ति इति समाधानं चिन्तयितुं शक्यते। एवमन्येऽपि बहुतरप्रश्नाः अत्र तु सन्ति। किन्तु संक्षेपेण वक्तव्यमिति कृत्वा अत्रैव वाचं मेऽवसायामि।

----------------

## साहित्यशास्त्रे शब्दार्थसम्बन्धः

इत्याख्यः प्रबन्धः ड.सेख-साविर-आलिमहोदयप्रस्तुतः

शास्तेः करणे ष्ट्रना निष्पन्नः शास्त्रशब्द उपदेशसाधनवाचकः। ननु किंविषयक उपदेशः? पुरुषार्थसाध्यसाधनभावविषयकः। काव्यप्रकाशहैमवतीटीकायामाटीकितम् –

**"प्रवृत्तिर्वानिवृत्तिर्वा नित्येन कृतकेन वा।**

**पुंसां येनोपदिश्यते तच्छास्त्रमित्यभिधीयते॥"**

(प्रथमे उल्लासे )

न्यायमञ्जर्याञ्चोदितम् –

"**विद्यास्थानत्वं नाम चतुर्दशानां शास्त्राणां पुरुषार्थज्ञानोपायत्वमेवोच्यते**" (प्रथमे आह्निके प्रमाणप्रकरणे) इति।

साहित्यस्य कथं तथात्त्वं समस्तीति चेन्न समाख्यावलादेव तथाप्रतीते:। तथाहि “हितेन सह वर्तमानं सहितं तस्य भाव: साहित्यमि”ति व्युत्पत्त्यैव हितसाधनत्वस्य साहित्ये अवगतत्वात्। न च कथंकारं तादृशहितसाधनत्वं साहित्यस्य युज्येत, येन तस्यापि शास्त्रत्वं सुबोधं स्यादिति शङ्क्यम्, ‘रामादिवत् प्रवर्तितव्यं न च रावणादिवदित्यु’पदेशकर्तृत्वेन साहित्यस्य शास्त्रत्वस्य दुर्वारत्वात्।

ननु “साहित्ये” इति सप्तम्यर्थ: क:? न च अधिकरणत्वाधेयत्वाद्यर्थिका सप्तमी, वस्तुत: शब्दार्थयो: सम्बन्धस्य शब्दार्थनिष्ठत्वेन साहित्यनिष्ठत्वाभावात्, प्रकृते साहित्यपदेन अलंकारशास्त्रस्य ग्रहणाच्चेति चेन्न। प्रतिपादकत्वस्य प्रतिपाद्यत्वस्य वा तदर्थत्वात्। यद्वा “**शब्दार्थौ सहितौ काव्यमि**”ति भामहादिवचोऽनुसारात् शब्दार्थयोर्ग्रहणे कथञ्चिदाधाराधेयत्वान्यतरोऽपि सप्तम्यर्थत्वेन सुग्रह इति ग्राह्यम्।

ननु शब्दश्च अर्थश्च शब्दार्थौ; तयो: सम्बन्ध: शब्दार्थसम्बन्ध इति व्युत्पत्तिरेवाभिप्रेता शब्दार्थयोरन्यत्र सिद्धत्वात् तत्र तात्पर्याभावात् सम्बन्धस्यैव प्रतिपिपादयिषितत्वात्।

ननु कथं शब्दार्थसम्बन्ध: स्वीकरणीय इति चेत्? उच्चारिते हि एकस्मिन् शब्दविशेषे गवादौ एक एवार्थ: निखिलेषु पदार्थेषु धीविषयो भवतीति तत्तपदस्य तत्तदर्थे सम्बन्धोऽवश्यमङ्गीकरणीय:। तथाच हरिवचनम् –

**“न सोऽस्ति प्रत्ययो लोके य: शब्दानुगमादृते।**

**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते॥”**

(ब्रह्मकाण्डे /१२३) इति।

अत्र च द्विविधा विप्रतिपत्ति: सम्बन्धस्वरूपविषयिणी सम्बन्धविभागविषयिणी चेति तत्समाधयायेव प्रकृतबन्धस्यान्वर्थ्यमस्तीति बोध्यम्। ततश्च असन्दिग्ध-त्वादप्रयोजनत्वाच्चायं बन्धो नाबन्ध्य इति वाग्बन्ध्यैव।

**<u>वृत्तिस्वरूपम्</u>-** असति सामान्यज्ञाने तद्विशेषज्ञानं न सम्भवतीति वृत्तिसामान्यलक्षणं प्रतिपादनीयम्। शाब्दबोधहेतुभूतपदार्थोपस्थित्यनुकूल: पदपदार्थयो: सम्बन्धो वृत्तिरिति तत्त्वचिन्तामणौ शब्दखण्डे गङ्गेशोपाध्यायै-रुपापादि। शाब्दबोधप्रयोजकस्तत्तदर्थनिरूपित: शब्दधर्मो वृत्तिरिति लघुमञ्जूषायां नागेशैर्निरगादि। शाब्दबोधहेतुभूतपदार्थोपस्थित्यनुकूलत्वे सति शब्दव्यापारत्वं वृत्तित्वमिति वृत्तिलक्षणमाख्यातुं शक्यम्। सा च शब्दधर्मो वा शब्दार्थसम्बन्धो वा शब्दशक्तिविशेषो वेतीत्येतदन्यत्। किन्तु सर्वेषामेव शब्दव्यापारत्वेनानुगम: कर्तुं शक्य:। न च-

**"पश्य निश्चलनिष्पन्दा विसीनीपत्रे राजते वलाका।**

**निर्मलमरकतभाजनपरिस्थिता शङ्खशुक्तिरिव॥"**

इत्यादौ निष्पन्दत्वेनाश्वस्तम्, तेन च जनरहितत्वमिति संकेतस्थानमेतदिति कयाचित् कश्चित् प्रत्युच्यते, अथवा मिथ्या

वदसि न त्वम्, अत्रागतोऽभूरिति व्यज्यत इत्येतदुदाहरणकवलितात् “सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमीष्यते” इति मम्मटवचनाच्च अर्थव्यापारे व्यञ्जनावृत्तिभूते शब्दव्यापारत्वस्य वृत्तिलक्षणस्य भवदभिमतस्याभावादव्याप्तिरिति वाच्यम्। तत्रापि पारोक्ष्येण शब्दव्यापारत्वस्य सुकल्पत्वात्। अन्यथा अभिधामात्रमेव शब्दव्यापार: स्यात्, न तु लक्षणादिरपि, मुख्यार्थसम्बन्धस्य गङ्गाजलप्रवाहादिसामीप्यादेस्तटे प्रतीयमानत्वान्न तु गङ्गापदस्य तटे कथमपि तथा सम्बन्धस्य सम्भवात्। वस्तुतस्तु असति शब्दे तादृशोऽर्थोऽपि नेदीयान् दवीयान् वापि कथमपि नोपस्थीयत इति परम्परया तत्रापि शब्दव्यापारत्वमक्षतमिति वाच्यम्।

**<u>अभिधा</u>-** शब्दश्रवणमात्रमेव योऽर्थोऽव्यवधानेन प्रतीतिविषयो भवति, स एव मुख्यार्थ:। तादृशार्थप्रतिपादक: शब्दोऽपि मुख्य एव। तादृशार्थप्रतिपादनानुकूलव्यापार: शब्दनिष्ठोऽभिधा

शक्तिर्वोच्यते। तदुक्तं काव्यप्रकाशसङ्केते- “**साक्षात् संकेतितो मुखमिव हस्ताद्यवयवेभ्योऽर्थान्तरेभ्य: प्रथमं प्रतीयमानत्वात्**” इति। तदुक्तमभिधावृत्तिमातृकायाम् –

**“शब्दव्यापारतो यस्य प्रतीतिस्तस्य मुख्यतो।**

**अर्थावसेयस्य पुनर्लक्ष्यमाणत्वमिष्यते॥” इति।**

काव्यप्रकाशे मूले च प्राकाशि- “**साक्षात्संकेतितं योऽर्थमभिधत्ते स वाचक: स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते।**” (२/७-८) इति। साहित्यदर्पणग्रन्थे च विगुम्फितम् – “**तत्र संकेतितार्थबोधनादग्रिमाऽभिधा**”(२/४) इति। वृत्तिवार्तिकेऽप्यय्यदीक्षितैश्चाप्याहृतम् –“ **शक्त्या प्रतिपादकत्वमभिधा**” इति। अत्रापि शक्तिश्च साक्षात्प्रतिपादनव्यापाररूपा इति ध्येयम्। ततश्च सर्वमाहत्य एवमभिधालक्षणं कर्तुं शक्यते यत्, **अर्थान्तराद्वारीकरणेन अर्थप्रतिपत्त्यनुकूल: शब्दव्यापारो वृत्तिरिति।** अर्थान्तराद्वारीकरणं च वृत्त्यन्तराद्वारीकरणादेव भवति। तदुक्तं काव्यप्रकाशहैमवतीटीकायामाटीकितम् – “**शब्दस्य मुख्यो वृत्त्यन्तरानपेक्षी प्राथमिको व्यापार:।**

**शब्दजन्यत्वे सति शब्दजन्यार्थज्ञानजनक: शब्दार्थसम्बन्ध: शब्दधर्मविशेषो वा वृत्तिरिति यावत्**" इति। काव्यप्रकाशसाहित्यचूडामणिटीकायामाटीकितम्- "**अव्यवधानेन = निरन्तरार्थतया**" इति। काव्यप्रकाशबालबोधिनीटीकायामपि तथैव चाहृतम् – "**मुख्यो बाधाद्यनुपजीवको वृत्त्यन्तरानुपजीवको वा व्यापारो वृत्ति: सोऽभिधा इत्युच्यत इत्यर्थ:**" इति।

**<u>लक्षणास्वरूपम्</u>-** लक्षणालक्षणं निरूपितं काव्यप्रकाशे(२/८) –

"**मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्।**

**अन्योऽर्थो लक्ष्यते यत्सा लक्षणाऽरोपिता क्रिया॥**"

तथाहि "**गङ्गायां घोष**" इत्यादौ मुख्यार्थस्य भगीरथरथखातावच्छिन्नजलप्रवाहस्य बाधे घोषाद्यधि-करणत्वाद्यसम्भवरूपे बाधे सति मुख्यार्थस्य तद्रूपेण वक्तृतात्पर्यविषयत्वस्य अभावे सति तद्योगे वाच्यार्थसम्बद्धे

सति रूढित: प्रयोजनाभिप्रायराहित्येन अनादिप्रयोजन-परम्परात: अथवा प्रयोजनात् प्रयोजनमभिप्रेत्य यत् लक्ष्ये गङ्गातटादिप्रतिपादिनी या वृत्ति:, सा लक्षणा।

**लक्षणाबीजम्** – अन्वयानुपपत्तिर्लक्षणाबीजमिति प्रसिद्धम्। तच्चानुपपन्नमेव, "**गङ्गायां घोष:**" इत्यत्र तादृशान्वयोपपत्तिनिमित्तं घोषपदस्यापि मत्स्यादौ लक्षणापत्ते:, कुत्र पदे लक्षणा इत्यस्य नियमस्याभावापत्तेश्च। किन्तु तात्पर्यानुपपत्तेरेव लक्षणाबीजत्वाङ्गीकारे न च प्रागुक्तदोषद्वयावकाश इति लाघवात् तात्पर्यानुपपत्तिरेव लक्षणाबीजमिति बोध्यम्। तथाच रसगङ्गाधरेऽपि उक्तम् – "तस्याश्चार्थोपस्थापकत्वे मुख्यार्थतावच्छेदके तात्पर्यविषया-न्वयिताया अभावो न तन्त्रम्। शक्यतावच्छेदकरूपेण मुख्यार्थप्रतियोगिकताया अभावो रूढिप्रयोजनयोरन्यतरच्च तन्त्रम् मुख्यार्थान्वयानुपपत्ते: तन्त्रत्वे तु "काकेभ्यो दधि रक्ष्यताम्" इत्यत्र लक्षणोत्थानं न स्यात्" इति। परमलघुमञ्जूषायां चापि समर्थितम् –

**“अन्वयानुपपत्तिप्रतिसन्धानञ्च लक्षणाबीजम्। वस्तुतस्तु तात्पर्यानुपपत्तिसन्धानमेव तद्बीजम्, अन्यथा ‘गङ्गायां घोष’ इत्यादौ घोषादिपदे मकरादिलक्षणापत्तिस्तावताऽप्यन्वया-नुपपत्तिपरिहारात् ‘गङ्गायां पापी गच्छति’ इत्यादौ गङ्गापदस्य नरके लक्षणापत्तेश्च। अस्माकन्तु भूतपूर्वपापावच्छिन्नलक्षकत्वे तात्पर्यान्न दोष**” इति।

**<u>व्यञ्जना</u>** – प्राय: प्राचीनालंकारग्रन्थेषु व्यञ्जनादुरालोकैवासीत्, तथैव ध्वन्यालोकग्रन्थत: प्रतीते: परवर्तिनिकाले तु सैव काव्यात्मत्वेन प्रतिष्ठां लेभे। ननु कथं व्यञ्जनाऽङ्गीकर्तव्या? तत्र शाब्दी आर्थी चेति द्विविधा व्यञ्जना। शाब्दी अपि अभिधामूला लक्षणमूला चेति द्विविधा। तथाहि नानार्थकपदस्थले अर्थनिरूपकै: संयोगादिभिरर्थविशेषे निरूपिते अर्थान्तरं प्रति विशेषस्मृतेरभावात् तदर्थोपस्थितिर्नाभिधया किन्तु व्यञ्जनया। नियामकैर्नियमनात् तस्या न चात्र लक्षणया तथेति वाच्यम्, मुख्यार्थबाधादीनां लक्षणाबीजानां तत्राभावात्। तदुक्तं काव्यप्रकाशे –

**“अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते।**

**एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साऽभिधाश्रया।।**”(२/१४)।

तथाहि **“भ्रद्रात्मनो: दुरधिरोहतनोर्विशालवंशोन्नते: कृतशिलीमुखसंग्रहस्य यस्यानुपप्लुतगते: परवारणस्य दानाम्बुसेकसुभग: सततं करोऽभूत्॥”** इति कफ्फिणाभ्युदये(१/१३) राजविषयकस्तुति: प्रथमत: प्रतीतापि हस्तिविषयकस्तुतिर्द्वितीयार्थो नानार्थकशब्दसंसर्गाद्य: प्रतीयते स व्यञ्जनाबलादिति बोध्यम्। यदि च तार्किकसमयानुसारमन्यार्थं प्रत्यपि तात्पर्यं तद्ग्राहकं वा प्रकरणादिकं कल्प्यम्। ततश्च तादृशार्थबोध उपपद्यत इत्युच्यते तदपि न सम्यक्, ततो लाघवाद् व्यञ्जनैवाङ्गीकरणीया। तदुक्तं साहित्यसारे ददनोपाध्यायै: –

**“यत्तु नानार्थके शब्दे शून्ये प्रकरणादिना।**

**अर्थान्तरेऽभिधैवेति तात्पर्यग्रहमात्रत:॥**

**तत्रान्यार्थे तु तात्पर्यग्राहकान्तरकल्पनात्।**

**तात्पर्यस्य ग्रह: कल्प्यस्तत: सैवास्तु लाघवात्॥**

**घटं गुणं च सम्पाद्य वाप्या: पेयं जलं तत:।**

**निर्वेधं निकटस्थायां गङ्गायां को न वित्पिबेत्"**

(पूर्वार्धे/२/११५-११७) इति।

लक्षणास्थलीयप्रयोजनस्य चोपपत्तिर्व्यञ्जनयैव। सा च लक्षणामूलव्यञ्जना "गङ्गायां घोष" इत्यत्र गङ्गाशब्दस्य भगीरथरथखातावच्छिन्नजलप्रवाहविशेषस्य प्रतीतिरभिध-याऽस्तु, गङ्गातटस्य प्रतीतिरस्तु लक्षणया, शीतत्वपावनत्वाद्याधिक्यरूपस्य प्रयोजनस्य च प्रतीतिर्व्यञ्जनयैवेति काव्यप्रकाशे प्राकाशि - "**प्रयोजनं हि व्यञनव्यापारगम्यमेव**" इति। ननु "**सोऽयमिषोरिव दीर्घदीर्घतरोऽभिधाव्यापार**" इति सिद्धान्तात् अभिधयैव तदर्थप्रतीतिरस्तु कृतं व्यञ्जनया? गङ्गाशब्दस्य

शीतत्वपावनत्वाद्याधिक्ये अखण्डपाखण्डपण्डितपुंसां केषामपि संकेतग्रहादर्शनात्। तथात्वे च 'तट: प्राथमिक: पदार्थ' इत्यभ्युपेयताम्। तदपि गङ्गाशब्दशब्दितत्वेन नैषां सम्मतम्।

यदि च तुष्यतुदुर्जनन्यायेन तटादिर्गङ्गादिपदवाच्य एवेत्यङ्गीक्रियते, तथापि प्रवाहतटयोर्मुख्यलक्ष्ययो: सामीप्यादिसंसर्ग इव एतत्पक्षेऽपि तटशीतत्वाद्याधिक्ययो: कश्चनैषितव्य: सम्बन्ध:। न च शीतत्वपावनत्वाद्याधिक्यं तटसम्बद्धमपि तु गङ्गाजलप्रवाहसम्बद्धमेवेति मुख्यार्थयोगोऽपि एतत्पक्षे दुष्प्राप:। किञ्च मुख्यार्थबाधरूपं लक्षणाबीजमप्यत्र दुर्लभम्, गङ्गाशब्दशब्दितं भवदभिमतं तटमेवादाय घोषाधिकरणत्वोपपत्ति: सुखेन सम्भवतीति मुख्यार्थबाधाभावात् कथमत्र लक्षणा?

शीतत्वपावनत्वाद्याधिक्यप्रतिपादनप्रयोजनकतया 'गङ्गायां घोष:' इत्यत्र लाक्षणिक: प्रयोग: समेषामभिलषित:।

न च किञ्चित्प्रयोजनमन्यदेषितव्यमपि सुलभं, यत्प्रतिपादननिमित्तक एष लाक्षणिक: प्रयोग: स्यात्। तदुक्तं काव्यप्रकाशे –

**“लक्ष्यं न मुख्यं नाप्यत्र बाधो योग: फलेन नो।**

**न प्रयोजनमेतस्मिन् न च शब्द: स्खलद्गति:॥”** (२/१५)

यदि च शीतत्वपावनत्ववति ‘गङ्गातटे घोष’ इति वाचकशब्दमुपेक्ष्य ‘गङ्गायां घोष’ इति तदर्थप्रतिपादनाय वक्रेण प्रयोग:। एवं कौटिल्येन प्रयोगे प्रयोजनन्तु शीतत्वपावनत्वाद्याधिक्यप्रतिपादनमेव। तच्च व्यञ्जना-लभ्यमिति साहित्यिकमतम्। तदपि लक्षणया लभ्यत इत्युच्येत, यदि तदा साऽपि प्रयोजनान्तरमूलिकेति प्रदर्शनीयम्। तत् प्रयोजनं तु व्यञ्जनयाऽस्तु। तदपि यदि लक्षणया, तदा तत्रापि प्रयोजनान्तरप्रदर्शनपरकतया व्यञ्जनाऽङ्गीकरणीयेत्येवं प्रयोजनव्यञ्जनालक्षणास्वीकारपरम्परा नान्तमियादिति

अनवस्थाऽपद्येत। न चेयं हानिकरीति न दूषणायेति वाच्यम्। तथात्वे प्रकृतार्थप्रतीतिरेव न स्यादिति प्रकृतार्थप्रतिपत्त्यभावस्यैव हानिभूतत्वात् दूषणत्वनान्तरीयकत्वात्। तदुक्तं काव्यप्रकाशवृत्तौ – "**एवमपि प्रयोजनं चेल्लक्ष्यते तत् प्रयोजनान्तरेणेति तदपि प्रयोजनान्तरेणेति प्रकृताप्रतीतिकृदनवस्था भवेत्**" इति।

ननु यदि "गङ्गायां घोष" इत्यत्र तटमात्रं न लक्ष्यं किन्तु शीतत्वपावनत्वाद्याधिक्यविशिष्टतटमेव लक्ष्यम्, न तु तटादे: पृथग्भूतं शीतत्वपावनत्वाद्याधिक्यमात्रं लक्ष्यमिति निष्प्रयोजना लक्षणेति नानवस्थेति चेन्न। ज्ञानस्य विषयफलयोर्भेदात्। तथाहि पावनत्वादिविशिष्टतटज्ञानमेव लक्षणाज्ञानम्। तच्च पावनत्वादिविषयकं ज्ञानम्। यदि लक्षणाज्ञानविषय: पावनत्वादिकं, तदा तदेव पावनत्वाद्याधिक्यं कथंकारं लक्षणाज्ञानफलं स्यादिति तस्या निष्फलत्वापत्ति:। तदुक्तं मम्मटकारिकायाम्-

**"प्रयोजनेन सहितं लक्षणीयं न युज्यते।**

**ज्ञानस्य विषयो ह्यन्य: फलमन्यदुदाहृतम्॥"**

(२/१७) इति।

**अर्थशक्तिमूलाया** व्यञ्जनायास्तु कथमपि नान्यथासिद्धि:। तथाहि-

**"पश्य निश्चलनिष्पन्दा विसीनीपत्रे राजते वलाका।**

**निर्मलमरकतभाजनपरिस्थिता शङ्खशुक्तिरिव॥"**

इत्यत्र वलाकाया निष्पन्दत्वेन विश्वस्तत्वम्, तेनास्य देशस्य विजनत्वम्, अत: संकेतस्थानमेतदिति व्यङ्ग्योऽर्थ:, न चाभिधया, मुख्यार्थबाधादीनामयोगात् न वापि लक्षणया प्रतीयत इति वाच्यादीनामप्यर्थानां व्यञ्जकत्वसम्भवादत्र व्यङ्ग्यार्थव्यञ्जकत्वस्थले अर्थशक्तिमूला तु व्यञ्जना गत्यन्तराभावादङ्गीकरणीयैव। अपि च क्वचिद् वाच्यार्थे विधौ प्रतिषेधरूपो यथा –

**"भ्रम धार्मिक विस्रब्ध: स शुनकोऽद्य मारितस्तेन ।**

**गोदावरीनदीकूललतागहनवासिना दृप्तसिंहेन।।"** इति।

"भ्रम" इत्यनेन साक्षात् भ्रमणस्य अभिधानेऽपि भ्रमणनिषेध एव व्यङ्ग्यत्वेन प्रतीयते। तद्बलादेव च चमत्कारित्वम्।

क्वचिद्वाच्ये प्रतिषेधरूपे विधिरूप: यथा- **"श्वश्रूरत्र शेतेऽथवा निमज्जत्यत्राहं दिवसकं प्रलोकय। मा पथिक रात्र्यन्ध! शय्यायामावयो: शयिष्ठा:॥** इत्यत्र मेति साक्षात् शयननिषेधो वाच्य:, रात्र्यन्धेति समुचितसमयसम्भाव्यमानविकाराकुलितत्वं ध्वनितम्, प्रतिपन्नमात्रायां च रात्रावन्धीभूतो मदीयायां शय्यायां मा श्लेषं गच्छ। अपि तु निभृतनिभृतमेवात्ताभिधाननिकटकण्टकनिद्रान्वेषणपूर्वकमितीयदत्र ध्वन्यते।

क्वचिद्वाच्ये प्रतिषेधरूपे ऽनुभूयरूप: यथा-

**"व्रज ममैकस्या भवन्तु नि:श्वासरोदितव्यानि।**

**मा तवापि तया विना दाक्षिण्यहतस्य जनिषत॥** इत्यत्र

व्रजेति विधि: ‘न प्रमादवशादेव नायिकान्तरगमनं नायकस्य, अपि तु गाढानुरागात्, येनान्यादृङ्मुखराग: गोत्रस्खलनादि च, केवलं पूर्वकृतानुपालनात्मना दाक्षिण्येन एकरूपत्वाभिमानेन त्वमत्र स्थित:, तत्सर्वथा शठोऽसीति गाढक्षोभरूपो नायिकाभिप्रायोऽत्र प्रतीयते। न चासौ व्रज्याभावरूपो निषेध:, नापि विध्यन्तरमेवान्यनिषेधाभाव:।’ इति।

न च अर्थशक्तिमूलव्यञ्जनास्थलेऽपि अनुमानेनैव तादृशव्यङ्ग्यार्थप्रतीतिसम्भवे कृतं व्यञ्जनयेति वाच्यम्, तथात्वे “गङ्गायां घोष” इत्यादावपि मुख्यार्थबाधादेव तात्पर्योपपत्तयेऽनुमानेनैवात्रापि लक्ष्यार्थप्रतीतिरस्तु कृतं लक्षणया ? यदि चात्र लक्षणया प्रत्येमीति अनुव्यवसायवशादेव लक्षणाया अङ्गीकार इति उच्येत, तदा तुल्यरीत्या “व्यञ्जनया प्रत्येमी”ति सहृदयहृदयानामनुभवबलात् कथं न व्यञ्जनास्थीयेत? तथाच तर्कसंग्रहदीपिकानीलकण्ठ-प्रकाशिकायामपि प्रकाशितम् – “**यदि पुनरानुभविकलोकानां**

**स्वरसवाही 'शब्दादमुमर्थं प्रत्येमि' इत्यनुभवः, तदा वैयञ्जनिकी प्रतीतिः गीर्वाणगुरुणाप्यशक्यवारणा इति व्यञ्जनासिद्धिः निष्प्रत्यूहैवेति मन्तव्यम्**" इति। (पृष्ठायाम् ३३०)

यदुक्तं नीलकण्ठप्रकाशिकायां "**तथाच घोषः शैत्यपावनत्ववान् तादृशदेशवृत्तित्वात् यो यद्देशवृत्तिः स तद्देशवृत्तिशैत्यपावनत्वान्यतरवान् पावनत्वापावनत्वान्यतरवांश्च केरलदेशवृत्तिग्रामवत् उष्णदेशवृत्तिग्रामवच्च**" इति तदपि व्यभिचारिहेतुकम्, गाङ्गेयपुरुषादीनां व्यापकीभूतशैत्यपावनत्वादेरसत्त्वेऽपि व्याप्यस्य तद्देशवृत्तित्वस्य सत्त्वात्।

**तात्पर्यवृत्तिः** - अभिधादिवृत्तिभिः प्रतिपादितेऽर्थे तदर्थानां मिथो सम्बन्धरूपो वाक्यार्थः समुल्लसति तात्पर्यवृत्तिद्वारैव, तत्रान्यासां वृत्तीनां विरतव्यापारत्वात्, **"तात्पर्यार्थोऽपि केषुचित्"** इति मम्मटभट्टभणितेरालंकारिकैरपि कतिपयैः

तात्पर्याख्यवृत्तिरङ्गीकृतेति गम्यते। तदुक्तं ध्वन्यालोकलोचने- “तात्पर्यशक्त्यैव अन्वयप्रतिपत्ति:” इति। साहित्यदर्पणेऽप्युक्तम् – “तात्पर्याख्यां वृत्तिमाहु: पदार्थान्वयबोधने” इति। अभिहितानामेव पदार्थानां पश्चादाकाङ्क्षाबलादन्वये सति अन्वयबोधापरपर्याय: शाब्दबोधो जायत इत्यभिहितान्वय-वादिनां मतम्। तत्र च पदार्थानामभिहितानां मिथ:संसर्गस्तु संसर्गमर्यादया भासत इति नैयायिका:। किन्तु अन्विताभिधानवादिमते स च संसर्गोऽपि वृत्तिद्वारा उपस्थाप्यत इति तदुपस्थापिका तात्पर्यवृत्तिरङ्गीक्रियते। किन्तु वृत्त्यनुस्थाप्यमानस्य पदार्थस्य शाब्दबोधविषयत्वे तु “घटोऽस्ती”त्यादौ पटविषयकशाब्दबोधापत्ते: अतिप्रसङ्ग-सम्भवात् निरुक्तवाक्यार्थस्यापि वृत्तिविशेषेणोपस्थितिरिति तत्र पदानां शक्तेरभावात् तात्पर्याख्या वृत्तिर्वाक्यार्थोपस्थापिका वाक्यनिष्ठा काचनाङ्गीक्रियते।

**अभिधावृत्तिमातृकामतमर्दनम्** - अत्रेदमवधेयं यत् मुकुलभट्टेन शब्दव्यापारत्वेन अभिधामात्रमेव स्वीकृतम्। तच्च

नामदर्शनादेव प्रतीयते ‘अभिधा चासौ वृत्तिश्चे’ति कर्मधारयसमासेन ‘अभिधावृत्तिरि’ति पदं निष्पद्यते। ततश्च ‘तस्या: मातृका’ (मातृकल्पा) इति विग्रहेण षष्ठीसमासेन ‘अभिधावृत्तिमातृका’ इति पदं निष्पन्नम्। सा चाभिधा आदौ मुख्या, ततो लाक्षणिकीति द्वेधा। ततश्च मुख्यापि चतुष्प्रकारिका, तत: लाक्षणिकी अपि षट्प्रकारिका इति अभिधा दशविधेति प्रपञ्चितम्। व्यञ्जना चात्र न चर्चिता। तत: पूर्वं मीमांसकवैयाकरणाचार्यैर्व्यञ्जनाया: स्फुटं प्रतिपादनाभावात् तत्प्रतिष्ठापकानामानन्दवर्धनाचार्याणामु-त्तरकालवृत्तित्वात्। तदुक्तं तेन अभिधावृत्तिमातृकायाम् –

**“सकलशब्दाविभागात्मकस्य शब्दतत्त्वस्य यदा शब्दार्थसम्बन्धत्रितयरूपतया रज्जुसर्पतया विवर्तमानत्वं तदा तदभिधावृत्तं दशविधव्यवहारोपारोहितया उपपद्यते, न तु संहृतार्थवाक्तत्त्वविषयतयेति दर्शयितुमाह- विवर्तमानं वाक्तत्त्वं दशधैव विलोक्यते --- अप्रत्यस्तमितसकलविकल्पोल्लेखो-**

**पप्लवे तु क्रमभेदसंहारेण तस्मिन् वाक्तत्त्वे विवर्तमाने तेषां दशानामभिधावृत्तानां कुतो गतिर्नैव प्रसर इत्यर्थ:**" इति। ग्रन्थादौ च तै: प्रतिज्ञातम् –"**शब्दस्य मुख्येन लाक्षणिकेन वाभिधाव्यापारेणार्थावगतिहेतुत्वमिति मुख्यलाक्षणिकयोरभि-धाव्यापारयोरत्र विवेक: क्रियते**" इति। वस्तुतस्तु अयञ्चापि ग्रन्थो न विरुध्यते प्रकृते अभिधापदेन वृत्तिमात्रस्य ग्रहणात् लक्षणापि परम्परानुसारेणैव व्याख्यातमिति न विरोध:।

**व्यक्तिविवेककृतमतमर्दनम् -**

**"अनुमानेऽन्तर्भावं सर्वस्यैव ध्वने: प्रकाशयितुम्।**

**व्यक्तिविवेकं कुरुते प्रणम्य महिमा परां वाचम्॥"**

इति मङ्गलश्लोकत एव प्रतीयते ध्वनिरेभिर्नाङ्गीकृत इति न केवलं ध्वने: लक्षणाया अपि शब्दव्यापारत्वमेभिर्नोररीकृतम्। अत्रेदं वैलक्षण्यं महिमभट्टमुकुलभट्टयोर्यत्, मुकुलभट्टेन लक्षणाया: शब्दव्यापारत्वमङ्गीकृतम्। किन्तु सा भाक्तीति। तत्र च महिमभट्टनये लक्षणाया वृत्तित्वमेव नास्तीति। कुतो न वृत्तित्वम्? न्यायनयमनुसरता भट्टेन भणितम् - शब्द: हि

तृतीयक्षणवृत्तिध्वंसप्रतियोगीति शब्द: प्रथमक्षणे उत्पन्न: सन् द्वितीयक्षणे अभिधयाऽर्थं प्रतिपाद्य तृतीयक्षणे चिरं नश्यतीति कथम् अर्थान्तरं प्रतिपादयितुमलमिति लक्षणा व्यञ्जना वा नाऽङ्गीकर्तव्या, नष्टे घटे जलस्य वृत्तेरभावादिव। किञ्च "लक्षणाऽरोपिता क्रिया" इत्यादिर्वचोभिर्लक्षणाया: शब्दवृत्तित्वमेवापास्यते उपास्यते चार्थव्यापारत्वमिति।

व्यङ्ग्यव्यञ्जकत्वं त्रिधा सम्भवति- "**तत्र कारणात्मनि कार्यस्य शक्त्यात्मनावस्थानात् तिरोभूतस्येन्द्रियगोचरत्वा-पत्तिलक्षण आविर्भाव एका यथा- क्षीराद्यवस्थायां दध्यादे:--- तस्यैव कुतश्चित् प्रतिबन्धादप्रकाशमानस्य प्रकाशकेनोप-सर्जनीकृतात्मना सहैव प्रकाशो द्वितीया यथा- प्रदीपादिना घटादे:--- तस्यैव अनुभूतपूर्वस्य संस्कारात्मनान्तर्विपरिवर्तिन: कुतश्चिदव्यभिचारिणोऽर्थान्तरात् तत्प्रतिपादकाद्वा संस्कारप्रबोधमात्रं तृतीया- यथा धूमादग्ने:**" इति।

तत्र आद्यमध्यमौ न युज्येते, तस्य दध्यादेरेवेन्द्रियविषयभावापत्तिप्रसङ्गाद् घटादेरिव

वाच्यार्थसहभावेनेदन्ताप्रतीतेरसम्भवात्। ततश्च तृतीय: पक्ष एषां सन्तोषित:। तदुक्तम् – “**तृतीयस्यास्तु यल्लक्षणं तदनुमानस्यैव सङ्गच्छते, न व्यक्ते:। यदुक्तं – ‘त्रिरूपाल्लिङ्गाद्यदनुमेये ज्ञानं तदनुमानमि’ति**” इति।

तत्रेदं वक्तव्यं यत् “भ्रम धार्मिक” इत्यादौ व्यङ्ग्यार्थस्य प्रतिपत्तिर्याऽनुमानगम्येति प्रतिपादितं तन्नातिरमणीयम्, तत्र तत्र व्यभिचारसम्भवात्। तथाहि “**भ्रम धार्मिक- इत्यादौ गृहे श्वनिवृत्त्या विहितं भ्रमणं गोदावरीतीरे सिंहोपलब्धेरभ्रमणमनुमापयतीति यद्वक्तव्यं तत्रानैकान्तको हेतु:” भीरोरपि गुरो: प्रभोर्वा निदेशेन प्रियानुरागेण वा गमनस्य संभवात्, पुंश्चल्या वचनं प्रामाणिकं न वेति संदिग्धासिद्धेश्च**” (पञ्चमोल्लासे) इति। काव्यप्रकाशकारेणाप्युदितम् – “**भीरोरपि गुरो: प्रभोर्वा निदेशेन, प्रियानुरागेण, अन्येन चैवंभूतेन हेतुना सत्यपि भयकारणे भ्रमतीत्यनैकान्तिको हेतु:**”(पञ्चमोल्लासे) इति। न च अनैकान्तिकत्वेऽपि नास्माकं विरोध:, काव्ये

सत्यासत्यविचारणाया अपारमार्थिकत्वेन रसास्वादस्यैव पारमार्थिकत्वात् इति वाच्यम्। तथात्वे भवदुक्तङ्ग्यव्यञ्जकत्वस्यापि अपारमार्थिकत्वात् तद्विचारणाया अप्ययौक्तिकत्वात्। यदि च तस्य व्यावहारिकत्वमभ्युपेयतेऽपि "**तस्यैवानुभूतपूर्वस्य संस्कारात्मनान्तर्विपरिवर्तिन: कुतश्चिदव्यभिचारिणोऽर्थान्तरात् तत्प्रतिपादकाद्वा संस्कारप्रबोधमात्रं तृतीया- यथा धूमादग्ने:**" इति अव्यभिचारिवचसा विरोधापत्तेश्च।

<u>**दशरूपकमतखण्डनम्**</u> - दशरूपककारमते तात्पर्यशक्त्यैव व्यङ्ग्यार्थप्रतीते: सम्भवात्, कृतं ध्वनिना? तद्ध्वनितं धनिकेन-

"**तात्पर्यानतिरेकाच्च व्यञ्जकत्वस्य न ध्वनि:।**

**किमुक्तं स्यादश्रुतार्थतात्पर्येऽन्योक्तिरूपिणि॥**"

(४/३४)इति।

तच्च न युज्यते, विकल्पासहत्वात्। यत् तत्परत्वम्? किं तदर्थत्वं तात्पर्यशक्त्या तद्बोधक्त्वं वा? नाद्ये वाद:, व्यङ्ग्यस्यापि

तदर्थत्वानपायात्। द्वितीये पुन: प्रश्न: - तात्पर्यं च कीदृशम्? अभिहितान्वयवाद्यङ्गीकृतम् तद्भिन्नं वा? आद्ये संसर्गमात्रस्य बोधिकायास्तात्पर्यशक्तेर्व्यङ्ग्यार्थबोधकत्वासम्भव:। द्वितीयेऽपि तन्नामान्तरमात्रं न तु अर्थान्तरमिति वेद्यम्।

**रेवाप्रसादद्विवेदिमहोदयानां साहित्यशरीरकमतसमीक्षणम्** –

यच्च साहित्यशरीरके रेवाप्रसादद्विवेदिभि: काव्यस्य वाक्यात्मकत्वात् वाक्यार्थप्रतिपादने तात्पर्यवृत्तेरेव सोपयोगत्वादभिधादिवृत्तीनां न पारमार्थिकत्वमित्युक्तं तन्न युक्तम्[१]। शब्दब्रह्मवादिनां वैयाकरणानां मते कथञ्चित् तदादरणेऽपि साहित्यशास्त्रे तथात्वस्य वक्तुमशक्यत्वात्। किञ्च अभिधादिभि: कृत एवार्थप्रतिपादने तात्पर्यवृत्तेर्व्यापार:। किञ्च यत्र अभिधादिप्रतिपाद्यचमत्कारमेवादाय वाक्यस्य काव्यत्वं पर्यवस्यति, तत्रापि अभिधादीनामपि परमत्वमाख्येयम्। सैनिकानां विक्रमत्वे दुर्बलस्यापि राज्ञो जये राज्ञो जयगानगानेऽपि सैनिकानामेव परमत्वं चरमत्वं लोके

अवधार्यत इति किं न दृष्टचरम्? अभिधादीनामपि नान्तरीयकत्वमिति वेद्यम्।

**राधावल्लभाचार्यमतसमीक्षणम्-**

राधावल्लभत्रिपाठिमहोदयैरपि अभिधादिवृत्तिप्रतिपाद्येभ्योऽर्थेभ्योऽपेक्षया वाक्यार्थस्य परमत्वमावेदितम् तन्मते अभिधामात्रादेव लक्षणामात्रादेव व्यञ्जनामात्रादेव वा काव्यस्य न सौन्दर्यम्, शब्दार्थनामर्थानां वा तादृशपरस्परस्पर्धाधिरोहाख्यसम्बन्धे सत्येव काव्यस्य काव्यत्वमिति आशय: परिस्फुटति। तादृशसम्बन्धपर्यालोचनं च वाक्यार्थबोध एव भवतीति वाक्यार्थस्यैव परमत्वमावेदितमिति वेद्यम्। तदुक्तं तेनाभिनवकाव्यालंकार-सूत्रे – "**आधिभौतिकाधिदैविकाध्यात्मिकसत्तानां पारस्परिक: सम्बध: पदपदार्थ-वाक्यार्थानामिव वर्तते। वाक्यार्थ एव परमार्थ:। पदन्तु आधिभौतिकं रूपम्, पदार्थस्तेन बुध्यते। स च पदार्थो मानसिकबोधे पर्यवस्यन् परामृशति आधिदैविकं**

**तत्त्वम्। वाक्यार्थबोधे तु आध्यात्मिकी सत्ता समुल्लसती**”ति। (२७ पृष्ठायाम् )

तदेतन्न रम्यतां धत्ते, प्रागुक्तदूषणगणग्रासापत्ते:। यच्चोदितं व्यापारस्याखण्डत्वेऽपि “**अर्थबोधकाले एतावानर्थो मया लक्षणया, अत: परं च योऽर्थ: स व्यञ्जनयाऽवगत इति पार्थक्यबुद्धेरभावात्**” इति। तत्रायं प्रश्न: - ‘अर्थबोधकाले’ इत्यत्र अर्थबोधपदं पदार्थबोधपरं वाक्यार्थबोधपरं वा? नाद्य:, अनुभवविरोधात्। मुख्यार्थबाधादनन्तरमेव तत एव लक्ष्यार्थबोध:, मुख्यार्थस्य सदैव प्राथम्येनोपस्थितिनियमात्, “मुख्यार्थबाधे सति तद्योगे रूढितोऽथ प्रयोजनात्” इति तथा “**यथा अपूर्वनिर्माणे चिकीर्षिते पूर्वं भूमिर्विरच्यते तथा ध्वनिस्वरूपे प्रतीयमानाख्ये निरूपयितव्ये निर्विवादसिद्धवाच्याभिधानं भूमि:**” इति ध्वन्यालोक-लोचनकृद्वचस: विरोधापत्तेश्च। नान्त्य:, वाक्यार्थबोधस्य कार्यत्वेन वाच्याद्यर्थबोधस्य च तत्र कारणत्वात् कार्यकारणयो: क्षणैकव्यवधानाङ्गीकारानुरोधाद् वाक्यार्थबोधकाले

"वाच्याद्यर्थ: अयम्, अयं व्यङ्ग्यार्थ" बोधस्य कस्यापीष्टत्वाभावादिति इष्टापत्ते:।

यदि तावद्वाक्यार्थस्य परमत्वेन तदपेक्षया पदार्थस्य न्यूनत्वादभिधादीनां न पारमार्थिकत्वमिति तदपि अन्विताभिधानवादिनां वैयाकरणानां शब्दब्रह्मवादिनां नये पदार्थानां प्रकृतिप्रत्ययानां चाविद्यकत्वमस्तु, साहित्यिकानां तत् कथमिति असमञ्जसमिति। न च तेषां मते शब्दार्थानां कल्पितत्वमस्ति, काव्यस्य तद्घटित्वादेवेति ध्येयम्।

**<u>हेमचन्द्राचार्यरचितकाव्यानुशासनमतसमीक्षणम्-</u>**

शब्दस्य अर्थचातुर्विध्यमङ्गीकृतमिति तद्भेदेन चतुर्विधो व्यापारोऽङ्गीकृत: - मुख्या गौणी लक्षणा व्यञ्जना चेति। तथाच सूत्रितम् – "**मुख्यगौणलक्ष्यव्यङ्ग्यार्थभेदादान्मुख्यगौण-लक्षकव्यञ्जका: शब्दा:**"(१/१५) इति। अपि च सूत्रितम् – मुख्याद्यास्तच्छक्तय: (१/२०) इति। अत्रेदमवधेयं यत्

विषयभेदेन शब्दस्य भेदोऽङ्गीक्रियते। स च न स्वाभाविक:। शब्दस्तु एक एव। तदुक्तं काव्यानुशासनसूत्रवृत्तौ – "**विषयभेदाच्छब्दस्य भेदो न स्वाभाविक:**" इति (१/१५) इति।

अत्रेदं विवेक्तव्यं यत्, अलंकारसम्प्रदायवृत्तीनां चिरन्तनानां तु नये गौणार्थस्य अत्र प्रतिपादितस्य लक्ष्यार्थमध्य एवान्तर्भावो दृश्यते। अत्र तु तयोरपि पृथक्त्वेन निवेश: परिलक्ष्यते। ननु कोऽयं भेद:? अत्र लक्षणायां यद्बीजं मुख्यार्थबाध: सादृश्यादिसम्बन्ध: प्रयोजनमित्येतत्सर्वमेव गौणवृत्तौ परिलक्षितुं शक्येत लक्षणायामपि एतत्त्रितयमस्त्येव। किन्तु गौणस्थले मुख्यार्थे लक्ष्यार्थ आरोपित एव। लक्षणायान्तु लक्ष्यार्थस्तत्त्वेन लक्ष्यमाणो न भेदाभेदाभ्यामिति बोध्यम्। तथाच गौणस्योदाहरणम् – "**तत्र सादृश्ये निमित्ते भेदेनारोपितो यथा- गौर्वाहीक:। इदं वक्ष्यमाणस्य रूपकालंकारस्य बीजम् " इति। अभेदेन यथा- गौरेवायमिति**"।

तत्र लक्षणाविषये उदीरितम् – “**मुख्यार्थसम्बद्धस्तत्त्वेन लक्ष्यमाणो लक्ष्य:**” इति। तद्व्याख्यायाञ्च व्याख्यातम् – “**तत्त्वेन लक्ष्यमाण इति वचनाद्भेदाभ्यामारोपित इति न वर्तते। शेषं तु गौणलक्षणमनुवर्तत एव। तद्विषयो लक्षक: यथा- गङ्गायां घोष: कुन्ता: प्रविशन्ति मुख्यार्थबाधे निमित्ते प्रयोजने च भेदाभ्यामारोपितो गौण:**” (१/१७) इति। वस्तुतस्तु मम्मटेन द्वयोरपि मुख्यार्थबाधादिकारणत्रितयसत्त्वात् लक्षणायामे-वान्तर्भावोऽवादि। अनेन तु तत्रापि सादृश्यसम्बन्धस्य द्वारीकरणाकरणाभ्यां गौणलक्षणभेदा-वङ्गीकृतौ इति।

<u>**काव्यप्रकाशखण्डनखण्डनम्**</u> – “**अनेनेदं नोक्तम्, किन्तु व्यञ्जितमिति प्रतीत्योर्वैलक्षण्यात्, अभिधातो व्यञ्जना पृथक्, यथा अनुमिनोमि न साक्षात्कारोमि’ इत्यनुभवबलात् प्रत्यक्षानुमानं पृथग् इति चेन्न। तत्र प्रतीतेरन्यथोपपादयितुमशक्यत्वात्। अत्र तु अनुमानेन लक्षणया वोपपादयितुं शक्यत्वान्न व्यञ्जना पृथक्**” इति

जैनाचार्याणां सिद्धिचन्द्रगणिमहोदयानां जगन्नाथाचार्यसम-कालीनानां काव्यप्रकाशखण्डनवचोऽपि नातिरमणीयम्, उपमितिशाब्दानामपि अन्यथा अनुमानेन उपपादयितुं शक्यत्वात् तेषामपि प्रामाण्याभावप्रसङ्गात्। किञ्च "पृथिवीयम्" "गन्धवतीयम्" इति प्रत्यययोरेकधर्मिकत्वेऽपि प्रकारभेदेनैव ज्ञानभेद इति अन्यथोपपादनेऽपि पृथिवीत्वगन्धवत्त्वयोर्न केषामपि ऐक्यमभिसम्मतम् तद्वद् इदं व्यञ्जनया जानामि" "इदमनुमानेन जानामि" इत्यनयो: प्रत्यययोरेककर्मकत्वेऽपि करणगतधर्मभेद: सुतरामेवास्ती-त्यङ्गीकरणीयं प्रत्ययभेदानुरोधात्। ततोऽस्त्येव व्यञ्जना।

<u>**अभिधादिवृत्तिस्वरूपम्-**</u> ननु अभिधाया: कीदृक्पदार्थत्वमस्ति? तत्र "अस्मात्पदादयमर्थो बोध्यव्य:" इत्यर्थविशेष्यकपदप्रकारिका "इदं पदमिममर्थं बोधयतु " इति पदविशेष्यकार्थप्रकारिका वा ईश्वरेच्छा इच्छैव वा शक्तिरिति तस्या गुणत्वेन नैयायिकनये अभिधा गुणपदार्थान्तर्गतेति। तदुक्तं "**न सामयिकत्वाच्छब्दार्थसंप्रत्ययस्य** " (२/१/५६) इति

न्यायसूत्रस्य व्याख्यायां वात्सायनभाष्ये “क: पुनरयं समय:? अस्य शब्दस्येदमर्थजातमिति अभिधानाभिधेयनियमनियोग:” इति भाषितम्। तात्पर्यटीकायाञ्चाटीकितम् – “**अभिधानभिधेययोर्नियमो गोशब्दस्य सास्नादिमानेवार्थ एवमश्वशब्दस्य केशरादिमानेवेति तस्मिन्नियोगो बोध्यव्य इति भगवत: परमेश्वरस्य सर्गादौ सोऽयं समय इत्ययमर्थ:**” (२/१/५५) इति। मीमांसकमते शब्दनिष्ठा अर्थप्रतिपादनानुकूला शक्तिस्तु न गुणान्तर्गता किन्तु अतिरिक्त एवायं पदार्थ: इति बोध्यम्। पातञ्जलमते बौद्धेऽर्थे बौद्धस्य शब्दस्याभेदेनारोप: शब्दार्थयोरितरेतराध्यासात्मकसंकेत इति। तदुक्तं पातञ्जलयोगसूत्रभाष्ये- “संकेतस्तु पदपदार्थयोरितरेतराध्यासरूप: स्मृत्यात्मको योऽयमर्थ: सोऽयं शब्द इत्येवमितरेतराध्यासरूप: संकेतो भवती”ति (३/१७) इति।

तत्र च नैयायिकमतं न युज्यते , ईश्वरेच्छावत् ईश्वरज्ञानस्यापि शक्तित्वेन सुग्रहात् कथं नाभिधा ईश्वरज्ञानं

स्यादिति प्रश्नस्योपशमो न स्यात्। तदुक्तं रसगङ्गाधरे – "एवमपीश्वरज्ञानादिना विनिगमनाविरह: स्यात्, अत: प्रथमं मतमेव न्याय्यमित्यपि वदन्ति" इति। किञ्च ईश्वरसंकेत: अभिधा इत्युक्तम्, तदपि न युक्तं, संकेततोऽभिधाया: सुतरामेव भिन्नत्वात्, संकेतेन शक्त्याख्याभिधाया ग्राह्यत्वात् ग्राह्यग्राहकयोर्भेदस्य सर्वानुभवसिद्धत्वात्। तदुदितमुद्द्योते – "संकेतग्राह्यं शक्त्याख्यपदार्थान्तरमभिधा" इति। तदेव परमलघुमञ्जूषायामुपपादितं – "**उक्त ईश्वरसंकेत एव शक्तिरिति नैयायिकमतं न युक्त'मयमेतच्छक्य:' 'अत्रास्य शक्तिरि'त्यस्य संकेतस्य शक्तित: पार्थक्येन प्रसिद्धत्वात्**" इति। ततश्च सा चाभिधा पदार्थान्तरत्वेनाभिहिता रसगङ्गाधरे – "**शक्त्याख्योऽर्थस्य शब्दगत: शब्दस्यार्थगतो वा सम्बन्धविशेषोऽभिधा --- सा च पदार्थान्तरमिति केचित्**" (द्वितीये आनने ) इति। अत्रेदमवधेयं यत्, सम्बन्धस्य द्विनिष्ठत्वनियमात् पदपदार्थोभयवृत्तित्वमात्मेच्छाभूतस्य सम्बन्धस्य कथं सम्भवति? यदि च विषयतासम्बन्धेन

तन्निष्ठत्वमीष्यते, तदपि न रमणीयतामियात्, “जलवान् घट:” “रूपवान् घट” इत्यादौ संयोगसमवाययो: वृत्तिनियामकत्वादेव तन्निष्ठत्वधीरुपपद्यते, न चैवं पदपदार्थोभयवृत्तित्वमीश्वरेच्छाभूतस्य अभिधासम्बन्धस्य, तस्य वृत्त्यनियामकत्वात्। किञ्च “मोक्षे इच्छा” इत्यादौ वैषयिकाधिकरणोदाहरणेऽपि वृत्त्यनियामकस्थले मोक्षेच्छयोरेव सम्बन्ध:, न तु इच्छैव तत्र सम्बन्धत्वनोपकल्यत। तथात्वे “घटवद्भूतलमि”ति ज्ञानमात्मसमवेतमपि विषयतया घटभूतलयोरुभयवृत्तित्वात् ज्ञानमपि कथं न घटभूतलयोर्मध्ये सम्बन्धत्वेनोत्प्रेक्ष्यते? ततश्च साहित्यिकमते शब्दस्य अर्थप्रतिपादनयोग्यतारूप: व्यापार एव शब्दार्थयो: सम्बन्ध इति उच्यताम्। तस्य पदार्थान्तरत्वमस्तु, मास्तु वा किन्तु एतच्च मतान्तरेऽपि न विरुध्येत।

**“मुख्यार्थबाधनेन प्रयोगपरम्परासंस्कारप्रयोजनवत्त्वज्ञानान्यतरेण च जनिता मुख्यार्थसम्बन्धज्ञानजन्या मुख्यार्थसम्बद्धार्थविषया स्मृतिर्लक्षणा इति निर्गलितोऽर्थ**” इति काव्यप्रकाशहैमवतीटीकायामाटीकनात् **लक्षणा** तन्मते

स्मृतिविशेष इति पर्यवस्यति। न चैतदप्रामाणिकम्, भाट्टगुरूभयसम्मतत्वात्। तथाच शालिकनाथाचार्यैराहृतम्-

**"वाच्यस्यार्थस्य वाच्यार्थे सम्बन्धानुपपत्तित:।**

**तत्सम्बन्धवशप्राप्तस्यान्वयाल्लक्षणोच्यते॥"** इति।

अत्र 'प्राप्तस्य' इति पदस्य हैमवतीटीकायाम् स्मृतस्येत्यर्थ: स्वीकृत:। कुमारिलभट्टैश्चाभाणि- "**अभिधेयाविनाभूते प्रवृत्तिर्लक्षणेष्यते** " (तन्त्रवार्तिके १/४/२२) इति। अत्र च प्रवृत्तीत्यत्र प्रतीतिरिति पाठोऽमानि मम्मटै:। अतश्च हैमवतीटीकाकर्त्रनुसारं लक्षणाऽपि स्मृतिपदार्थ इति। एतेषामयमाशय: यत्, मुख्यार्थबाध: रूढिप्रयोजनान्यतरत्, मुख्यार्थयोगश्चेति त्रितयं हेतु: "हेत्वभावान्न लक्षणा" इति काव्यप्रकाशव्याख्यायां "मुख्यार्थादित्रितयं हेतु:" इति वचसा शक्यार्थसम्बन्धस्य लक्षणां प्रति हेतुत्वमुच्यते। तच्च लक्षणाया: शक्यार्थसम्बन्धरूपत्वे नोपपद्यते। कार्यकारणभावभङ्गभिया

शक्यार्थसम्बन्धरूपलक्षणाया आत्मानं प्रति हेतुत्वं नोपपद्येत। ततश्च लक्षणाया: स्मृतिपरत्वे तु तथासंगतिरस्तीति।

किञ्च "शक्यादशक्योपस्थितिर्लक्षणा"इति न्यायकोशकारादिभि: "अशक्ये तात्पर्यविषयत्वं लक्षणा" इति शक्यसम्बन्धेन अशक्यप्रतीतिर्लक्षणा इति प्राचां समवाये तथा भट्टगुरूभयमतेऽपि चित्सुखाचार्यैरपि "**मानान्तरविरुद्धे तु मुख्यार्थस्य परिग्रहे अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते**" इति प्रतीतेरेव लक्षणात्वेनोदीरणात् स्मृतिपरत्वं लक्षणाया: भाव्यम्। अर्वाचीनानां शक्यसम्बन्धरूपत्वं नावसेयमिति तच्च हेयमेव।

अत्रेदं प्रतिविधेयं यत्, मास्तु लक्षणाया मुख्यार्थसम्बन्धरूपत्वम्, मुख्यार्थसम्बन्धस्य मुख्यलक्ष्यार्थोभय-निष्ठत्वात्, साक्षात् शब्दनिष्ठत्वेन वक्तुमशक्यत्वात्, सामीप्यादिभेदेन तस्य चानन्त्यात्प्रत्युत अभिधावत् लक्षणाऽपि शब्दशक्ति: शब्दगतव्यापारविशेषो वेति वाच्यम्। शब्दस्यैव तथा प्रत्ययोपपादनसामर्थ्यात्। यच्चोक्तमेकदेशिभि:

स्मृतिरूपत्वं लक्षणाया: पर्यवस्यति, तदपि न यथार्थम्। "अभिधेयाऽविनाभुते प्रवृत्तिर्लक्षणेष्यते" इति तन्त्रवार्तिकवचनेऽपि प्रवृत्तिपदं प्रकृष्टव्यापारमेव प्रतिपादयति न च प्रतीतिम्। वृत्तिश्चात्र व्यापार एव। यदि च मम्मटेन प्रवृत्तिपदस्थले प्रतीतिपदं प्रयुक्तं तत्रापि करणे क्तिना निष्पत्तिदर्शनात् मुख्यार्थसम्बद्धस्य लक्ष्यार्थस्य प्रतीति: यया वृत्त्या भवति सा लक्षणेति अर्थो द्रष्टव्यस्तत्र। ततश्च शब्दव्यापारत्वं लक्ष्यार्थप्रतिपादनयोग्यतारूपत्वं च लक्षणाया: पर्यवस्यतीति ध्येयम्। तदुक्तं काव्यप्रकाशसम्प्रदाय-प्रकाशिनीटीकायाम्- "यत्सेत्यत्र यदित्यव्ययं यत इत्यर्थो यतो व्यापाराल्लक्षयति शब्द: सा लक्षणेत्यर्थ:। न तु यल्लक्ष्यते सा लक्षणेति लक्ष्यार्थविशषणतया योज्यम्। तथाच सति यल्लक्ष्यं सा लक्षणेत्यायातम्। न ह्येषा लक्षणा। लक्ष्यत्वं ह्यर्थस्य धर्मो लक्षणा तु शब्दस्य। अतो यतो व्यापाराल्लक्षयति शब्द:, सा लक्षणेत्यवस्थितम्" इति। ततश्च साहित्यदर्पणेऽपि लक्षणालक्षणे लक्षणाया: शब्दशक्तित्वेनोल्लेख: कृत:। तदुक्तं तत्र-

**“मुख्यार्थबाधे तद्युक्तो ययाऽन्योऽर्थ: प्रतीयते।**

**रूढे: प्रयोजनाद्वासौ लक्षणा शक्तिरर्पिता॥”** (२/५)

इति।

तद्व्याख्यायाञ्च व्याख्यातम् – “**यया च गङ्गायां घोष इत्यादौ गङ्गादिशब्दा जलमयादिरूपार्थवाचकत्वात् प्रकृतेऽसम्भवन् स्वस्य सामीप्यादिसम्बन्धिनं तटादिकं बोधयति, सा शब्दस्यार्पिता स्वाभाविकेतरा ईश्वरानुद्भाविता वा शक्तिर्लक्षणा नाम** ” इति।

**एवं व्यञ्जनाऽपि** शब्दशक्तिरेवेति वेद्यम्। तदुक्तं साहित्यदर्पणे –

**“वाच्योऽर्थोऽभिधाबोध्यो लक्ष्यो लक्षणया मत:।**

**व्यङ्ग्यो व्यञ्जनया ता: स्युस्तिस्र:शब्दस्य शक्तय:॥”**

(२/११) इति।

साहित्यसारेऽपि आवेदितम्-

**“अर्थप्रतीतिजनने स्वत: सामर्थ्यलक्षणम्।**

**शब्देनार्थस्य सम्बन्धं शक्तिं मीमांसका जगु:।।**

**तत्र लाक्षणिके शब्देऽपीश्वरेच्छास्त्यतोऽखिला।**

**उच्छिद्येल्लक्षणातोऽत्र मीमांसकमतं मतम्॥**"(पूर्वार्धे २/३-५)। इत्यत्रापि शब्दशक्तित्वेनैव स्वीकार:। सा च शक्ति: पदार्थान्तमन्यवेत्यन्यदेव इति ध्येयम्।

अत्र चैतदुद्यं वस्तुतत्त्वे न नो विवाद: नूत्ननामकरणे न किञ्चिन्नूत्नत्वमिति वेद्यं विद्भिरिति। ततश्च परिशेषत: अभिधा लक्षणा, व्यञ्जना, तात्पर्यशक्तिश्चेति शब्दार्थसम्बन्धा इति साहित्यिकमतं सेत्स्यतीति मा भूत् श्रमो भूयाद्भूयश्शमो शेमुषीजुषामेषां समेषामिति शम्।

**<u>तथ्यसूत्रम्-</u>**

१. "अयमत्र विशेषो यद्वक्तासौ प्राचीनेषु श्रद्धालुरपि न त्यजति नवीनेषु तर्केषु श्रद्धाम्। ततश्च न श्रद्धत्ते एष ध्वनिसंज्ञायाम्, न चानादरपात्रीकुरुतेऽलंकारम्। व्यञ्जनाया: शब्दवृत्तित्वे वक्तुरस्य नास्ति श्रद्धा। काव्यं हि वाक्यात्मकम्। वाक्यञ्च सम्बन्धार्थकम्।

सम्बन्धश्च न शक्यते स्प्रष्टुमभिधयेति। काव्यस्य समग्रोऽर्थोऽभिधयाया अविषय एव प्रायेण तात्पर्यनाम्नी वृत्तिरत्र शक्यतेतरां कल्पयितुम्। तदा न लभिष्यतेऽवकाशोऽभिधादिव्यापारात्तेभ्य:, तात्पर्यवृत्त्यैव लक्षणादीनां व्यञ्जनायाश्च कार्यस्य सिद्धे:। एतेषु तर्केषु जाग्रत्सु यत्तद्ग्रन्थप्रामाण्येनैव साहित्यशास्त्राध्येतॄणां न ह्येव शक्यते स्वीकर्तुं समग्रग्राहिणीत्वेन दृक्" – (ड: मण्डनमिश्रै:साहित्यशरीरकग्रन्थस्य प्रस्तावनायाम्)

**<u>ग्रन्थपञ्जी</u>**


१. *अभिधावृत्तिमातृका* सुबोधिनीसंस्कृतवृत्त्या सङ्गमनी-हिन्दीवृत्त्या च विभूषिता डा.सुज्ञानकुमारमाहान्ति-सम्पादिता वाराणसीस्थचौखम्बाकृष्णदास-अकादेमीत: २००८ ख्रीष्टाब्दे प्रकाशिता।

२. *अभिनवालंकारसूत्रम्* राधावल्लभत्रिपाठिरचितम्।

३. *काव्यप्रकाश:* मम्मटाचार्यविरचित: शिवराजरचित-हैमवतीटीकासम्बलित:।

४. *काव्यप्रकाशः* मम्मटाचार्यविरचितः श्रीविद्याचक्रवर्तिप्रणीतसम्प्रदायप्रकाशिनीटीकासहितः।

५. श्रीभट्टगोपालप्रणीतसाहित्यचूडामणिटीकासहितश्च रा. हरिरहरशास्त्रिणा संशोधितः १९२६ ख्रीष्टाब्दे त्रिवान्द्रामतः प्रकाशितः।

६. *काव्यप्रकाशखण्डनम्* महामहोपध्याय-खुशफहम्-सिद्धिचन्द्रगणिरचितम्।

७. प्रा.रसिकलालछोटालालपरिखसम्पादितम् मुम्बइ-स्थितसिंघीजैनशिक्षापीठभारतीयविद्याभवनतः १९४३ ख्रीष्टाब्दे प्रकाशितम्।

८. *तर्कसंग्रहदीपिका* नीलकण्ठप्रकाशिकादिनवटीकोपेता सातकरिमुखोपाध्यायसम्पादितः वाराणसीस्थ-चौखम्बासंस्कृतविद्याभवनतः प्रकाशिता।

९. *दशरूपकं* धनञ्जयप्रणीतम् धनिकरचितावलोकाख्य-संस्कृतटीकासहितम् डा.भोलाशङ्करव्याससम्पादितम्

वाराणसीस्थचौखम्बाविद्याभवनत: २००३ ख्रीष्टाब्दे प्रकाशितम्।

१०. *ध्वन्यालोक:* लोचनटीकासमेत: डा.गङ्गा-सागररायसम्पादित: वाराणसीस्थचौखम्बासंस्कृत-भवनत: २०१० ख्रीष्टाब्दे प्रकाशित:।

११. *न्यायमञ्जरी* ग्रन्थिभङ्गव्याख्यासम्बलिता श्रीगौरीनाथशास्त्रिसम्पादिता सम्पूर्णानन्दविश्वविद्या-लयत: १९८२ ख्रीष्टाब्दे प्रकाशिता।

१२. *न्यायसूत्रम्*,भाष्यवार्तिकतात्पर्यटीकावृत्तिसहितम्,तारानाथतर्कतीर्थामरेन्द्रमोहनतर्कतीर्थभ्यां सम्पा-दितं देहलीनगरीस्थमुन्सीराममनोहरलालप्राइभेट्लि-मिटेड्त: २००३ ख्रीष्टाब्दे प्रकाशितम्।

१३. *प्रकरणपञ्चिका* शालिकनाथविरचिता श्रीमुकु-न्दशास्त्रिसंधोधिता काशीत: १९६१ ख्रीष्टाब्दे प्रकाशिता।

*१४. वाक्यपदीयम्* हरिवृषभकृतस्वोपज्ञवृत्तिसहितम् पण्डितरघुनाथशर्मकृताम्बाकर्त्रीटिकासहितं सम्पूर्णानन्दविश्वविद्यालयत: १९८८ ख्रीष्टाब्दे प्रकाशितम्।

*१५. वाचस्पत्यम्,* तारानाथविद्यावाचस्पतिभट्टाचार्यमहाशयै: संकलितं सम्पादितञ्च वाराणसीस्थ-चौखम्बासंस्कृतसिरीज्-अफिस्द्वारा १९६२ इतीशवीयवर्षे प्रकाशितम्।

१६. *रसगङ्गाधर:* जगन्नाथाचार्यविरचित:।

१७. *साहित्यदर्पण:* विश्वनाथकविराजप्रणीत:।

१८. *साहित्यशरीरकम्* रेवाप्रसादद्विवेदिप्रणीतम्।

१९. *साहित्यसारम्* डा.ददनोपाध्यायप्रणीतम् सरसामोदाख्यस्वोपज्ञव्याख्यासहितम् वाराणसीस्थसम्पूर्णानन्दविश्वविद्यालयत: २००४ ख्रीष्टाब्दे प्रकाशितम्।

-----------------

# शाबरभाष्यभाषितशब्दार्थसम्बन्धतत्त्वविवेकः

सुव्रत-गायनेन
स्नातकोत्तरस्थन्यायविभागीयच्छात्रेण
रामकृष्णमिशन्-विद्यामन्दिरस्य

**उपोद्घातः ---**

भारतीयदर्शननिकाये मोक्षतत्त्वं मुख्यत्वेन भूयसा प्रथितं दृश्यते। तत्प्रसङ्गसङ्गत्या प्रमाणतत्त्वमिव शब्दार्थसम्बन्धतत्त्वमप्युपसर्जनत्वेन प्रायः सर्वेष्वेव दर्शनु चर्च्चितम्। दर्शनेष्वपि शाब्दिकसम्प्रदाये, नैयायिकसम्प्रदाये मीमांसासम्प्रदाये च चर्चासरण्यां शब्दार्थसम्बन्धतत्त्वं प्रामुख्यं भजते। तत्रापि शब्दार्थसम्बन्धतत्त्वविषये न्यायमीमांसयोः साक्षाद्विमतिर्हि धीधुरीणधीस्थैव। किञ्च, शाब्दिकमीमांसकयोः शब्दार्थस्वरूपविषये किञ्चित्साम्ये सत्यपि तयोः सम्बन्धविषये तु विरुद्धमतभाजस्ते शाब्दिकमीमांसका इति विप्रकीर्णं बहुसूक्ष्मयुक्तिनिर्भरं पारिभाषिकजालजटिलं विचारसापेक्षञ्च शब्दार्थसम्बन्धतत्त्वम्। ननु न्याय-शाब्दिक-मीमांसासम्प्रदायेषु त्रिषु सुप्रथितेऽपि शब्दार्थसम्बन्धतत्त्वे कथमत्र मीमांसासम्मततत्त्वप्रख्यापनप्रवृत्तिरिति चेदुच्यते

मीमांसेतरशास्त्रशासिततत्त्वस्य बहुत्र विविधग्रन्थेषु विविधैर्बहुचर्चिततत्त्वात्पिष्टपेषणभियोपेक्षा। किञ्च, यत्र परमकरुणघना भगवती श्रुतिर्हि जरती जननीव भूयसा हेलया न्यक्कृता तत्र का कथा पुनः श्रुतिसिद्धस्य बहुवित्तव्यायायाससाध्यस्य यागस्य तथा श्रुत्यर्थप्रतिपादकस्य विचारशास्त्रस्य मीमांसाशास्त्रस्य? तस्माद्दौर्भाग्यान्मीमांसा चर्चाधुना शैथिल्यमुपगतेति तत्तद्ग्रन्थग्रथितविषया अप्स्फुटा टीकाटिप्पण्याद्यटवीवृता दुर्गम्या भीदाश्च। अतस्तत्त च्छास्त्रनिहिततत्त्वरसपीयूषं पातुं पाययितुञ्चेयं चिकीर्षा मे। अधो मीमांसासम्मतं शब्दार्थसम्बन्धतत्त्वं समासेन निरूप्यते --

मीमांसकानां नये शब्दार्थयोः सम्बन्धो ह्यौत्पत्तिकः। तथाहि भगवता जैमिनिना सूत्रितम् –**औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानमुपदेशऽव्यतिरेकश्चार्थेऽनुपलब्धे तत्प्रमाणं वादरायणस्यानपेक्षत्वात्**[1] इति। औत्पत्तिकः स्वाभाविक इति यावदिति मीमांसामीमांसा।भाषितं च शबरेण –**औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानं, तुशब्दः पक्षं व्यावर्तयति। अपौरुषेयः शब्देनार्थस्य सम्बन्धः।**[2] इति। वाच्यवाचकयोर्नित्यत्वात्तत्सम्बन्धस्यापि स्वाभाविकत्वं

---

[1]. मीमांसासूत्रम् – 1.1.5

[2]. शाबरभाष्ये 1.1.5, 41पृष्ठाङ्के

नित्यत्वमेव। नित्यत्वाच्चाकृतत्वं तथापौरुषयेत्वमपि। परमेकाकिनी प्रतिज्ञा हि प्रतिज्ञातं न साधयेदिति न्यायं स्मरता तदनु एव शबरस्वामिना शब्दार्थसम्बन्धनित्यत्वे विमृष्टिरपि उपन्यस्ता।

शब्दार्थसम्बन्धः संज्ञासंज्ञिसम्बन्धो वा कृतकः पुरुषकृतः पुरुषाधीनत्वात्, रज्जुघटसंयोगवत् इत्यनुमानेन पुरुषकृता नित्यत्वसिषाधयिषवो विपक्षिणः। अन्योन्यात्यन्तभिन्नयो रज्जुघटयोः सम्बन्ध इव मिथोऽत्यन्तभिन्नयोः शब्दार्थयोः सम्बन्धोऽपि पुरुषसाध्य एवेत्यनित्य इति विपक्षिपक्षः। अत्र मीमांसाधुरीणाः प्रत्यवतिष्ठन्त इत्थं यत्सम्बन्धकर्तृपुरुषा भावादद्यापि सम्बन्धः कृतकः कल्पितो वेति निर्णेतुं न कैश्चिच्छक्यते। एवं तत्र संज्ञासंज्ञिसम्बन्धनिर्णायक पुरुषाभावात्प्रत्यक्षप्रमाणेन न तदस्तित्वं कथमपि सिद्ध्यति। प्रत्यक्षप्रमाणाभावाच्च न तत्रानुमानादीनामपि प्रसृतिस्तेषां प्रत्यक्षमूलत्वात्। अतो वैदिकपदपदार्थसम्बन्धकर्तुरस्तित्वस्य प्रत्यक्षप्रमाणासिद्धत्वात् न तत्र कृतकत्वाशङ्का। तथाहि भाष्ये भाषितम् - **अपौरुषेयत्वात्सम्बन्धस्य सिद्धमिति कथं पुनरिदमवगम्यते। अपौरुषेय एव सम्बन्ध इति। पुरुषस्य**

**सम्बन्धुरभावात्। कथं सम्बन्धो नास्ति। प्रत्यक्षस्य प्रमाणस्याभात्। तत्पूर्वकाच्चेतरेषाम्।**[3] इति।

ननु वर्तमाने सम्बन्धकर्तृपुरुषप्रत्यक्षत्वाभावेऽपि पुरातीते कदाचित् तत्प्रत्यक्षग्राह्यतामादाय तदस्तितत्व साधनप्रचेष्टा तु सर्वथायुक्ता प्रागपि प्रत्यक्षगृहीतस्य क्वचिदपि स्मृतिविषयत्वात्। परं नहि वैदिकपदपदार्थसम्बन्धकर्ता स्मर्यते केनचित्।

पुनरत्रायं विपक्षीयाणामाक्षेपोयत् पुरा प्रत्यक्षगृही तस्यापि पदपदार्थस्म्बन्धकर्तुः स्मरणं बहुव्यवधानादेव न सम्भवम्।तथाहि वैदिकसंज्ञासंज्ञिसम्बन्धकारः पुरा प्रत्यक्षगृहीतोऽपि बहुकालव्यवधानात् कालेन अल्पधियां धीदौर्बल्यात् नाधुना स्मर्यते, यथा लोके स्थलेषु क्वचित् क्वचित् वापी, उपवनम् इत्येतेषां दृश्यमानानां कर्ता पुरा स्मर्यमाणोऽपि बहुकालव्यवधानान्न स्मर्यते। परमत्र प्रत्यवतिष्ठन्ते मीमांसकाः। तेषां नये देशोत्सादनं कुलोत्सादनं वा स्मृतिविघातकम्। प्रत्यक्षगृहीतस्य स्मरणकर्तृणां देशोत्सादनतः कुलोत्सादनतो वा नाशात् स्मरणपरम्परानाशे तत्तत्कर्ता अद्यत्वे अज्ञातः अस्मृतश्च। एवं सर्वत्र स्मृतिविघाते प्राकृतिकविपर्यस्यैवाविनाभावित्वं कल्प्यते। परमत्र न तथा

---

3. शाबरभाष्ये – 53 पृष्ठाङ्के

वक्तुं पार्यते, यतो हि गुरुशिष्यसम्प्रदायक्रमेण वेदाध्ययनपरम्परा अविच्छिन्नतया एव प्रचलति। अतो न त्र स्मृतिनाशसम्भावनालेशोऽपि। वस्तुतस्तु वैदिकपदपदार्थ सम्बन्धकर्ता न कश्चिदपि सम्भवति, तेन पदपदार्थयोः सम्बन्धो नित्योऽकृतकोऽपौरुषेय एवेति। परं स्मरणाभावात् कुम्भकारस्यास्तित्वं न विलीयते। भाषितं भाष्ये शबरस्वामिना --- **ननु चिरवृत्तत्वात्प्रत्यक्षस्याविषयो भवेदिदानीन्तनानाम्। न हि चिरवृत्तः सन् स्मर्येत। न च हिमवदादिषु कूपारामिदवदस्मरणं भवितुमर्हति। पुरुषवियोगो हि तेषु भवति देशोत्सादेन कुलोत्सादेन वा। न च शब्दार्थव्यवहारवियोगः पुरुषाणामस्ति।**[4]इति।

पुनरत्रायमाक्षेप उपस्थाप्यते पूर्वपक्षिभिर्यद् लोके घटशराबादयः सर्वैरेव व्यवह्रियन्ते, परं कोऽपि तस्य घटस्य कर्तारं स्मरति वा? प्रयोजनाभावान्न कोऽपि एको घटव्यवहारकाले कुम्भकारं स्मरति। एवं पदपदार्थसम्बन्धेनैव व्यवहारनिर्वाहे तत्सम्बन्धकर्तृस्मरणेन किम्? परं नानेन तत्कर्तृत्वाभावः सिद्ध इति चेन्न, विषम एव उपन्यासः, दृष्टान्तस्यायथाभूतत्वात्। तथाहि आप्तोक्तत्वादेव वेदवाक्यानां प्रामाण्यम्। अथ वैदिकपदपदार्थसम्बन्धकर्तृपुरुषस्याप्तत्व

---

4. तत्रैव

भावाद्धि वर्णाश्रमधर्मिणाम् ऐहिकपारत्रिकविध्यादीनां प्रामाण्यं स्यात्। परं वैदिकपदपदार्थसम्बन्धकर्तरि अज्ञाते तस्याप्तत्वमनाप्तत्वमप्यनिर्णेयम्। तथा सति वैदिकविधीनां यथार्थार्थावधारणं यथा दुष्करं, तदीयं प्रामाण्यमपि तथैव दुर्निरूप्यम्। अत एव स्थिते सम्बन्धकर्तरि नूनं स स्मर्तव्यः। अन्यथा
तदाप्तत्वेऽज्ञातप्रामाण्यःप्रभूतार्थव्ययसापेक्षयागादिकर्मणि न कोऽपि प्रवर्तेत। सम्बन्धकर्तृपुरुषस्मरणस्यावश्यिकत्वेऽपि नात्र स्मर्यत इति नास्त्येव सम्बन्धकर्तृपुरुषः कश्चिदिति सिद्ध्यततीति मीमांसकानां विदां वादः। भाषितं च --- **स्यादेतत्, सम्बन्धमात्रव्यवहारिणो निष्प्रयोजनं कर्तृस्मरणमाद्रियणाणा विस्मरेयुरिति। तन्न यदि हि पुरुषः कृत्वा सम्बन्धं व्यवहारयेत्। व्यवहारकालेऽवश्यं स्मर्तव्यो भवति।**[5]इति।

किञ्च, अज्ञातेऽपि विषये कुम्भकारेण विना यथा घटो नोत्पद्यते इत्यर्थापत्त्या कुम्भकारः प्रमीयते तथैव अर्थापत्त्या शब्दार्थयोः सम्बन्धकर्तापि प्रमितो भवतीति पूर्वपक्षिपक्षः। तथाहि यद्यपि न दृश्यते कश्चिद् वैदिकसंज्ञासंज्ञिसम्बन्धकर्ता, तथापि वैदिकपदाद् अर्थबोधे अवश्यं कश्चित् कर्ता सम्भवति, यतो हि न तत्कर्तुरभावे पदपदार्थयोः अत्यन्तभिन्नयोः सम्बन्धः

---

[5]. तत्रैव

सुकरः, नापि चासति कर्तरि कर्म स्वयमुत्पद्यते इति चेन्न विनापि सम्बन्धकर्त्रार्थबोधस्यान्येनापि प्रकारेण सम्भवात्। यथा व्यवहारदर्शनात् संज्ञासंज्ञिसम्बन्धज्ञानं जायते। तथाहि गामानय इत्युत्तमबृद्धप्रयुक्तस्य मध्यमवृद्धस्य गलकम्बलविशिष्टानयनम्, तथा पुनः गां बधान, अश्वमानय इत्युच्चारित उत्तमवृद्धेन गलकम्बलवज्जीवबन्धनं तदितरस्य कस्यचिज्जीवस्यानयनं वलोक्याव्युत्पन्नोऽपि ऊहापोहाभ्या मावापोद्वापाभ्यां गलकम्बलविशिष्टस्य गोशब्दवाच्यत्व मितरस्य चाश्ववाचकत्वमित्यवधारयति। एवं विनापि सम्बन्धज्ञापकज्ञानं केवलं व्यवहारदर्शनादेवाव्युत्पन्नस्यापि सङ्केतज्ञानं सुशकम्। तथाहि शास्त्रेषु शक्तिग्रहोपाया अपि निर्दिष्टाः ---

**शक्तिग्रहं करणोपमानकोषाप्तवाक्याद्व्यवहारतश्च।**

**वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः।।**[6] इति। अतो सम्बन्धकर्त्रा विना संज्ञासंज्ञिसम्बन्ध ज्ञानमनुपपन्नमिति प्रलापमात्रम्।

ननु सम्बन्धकर्तृपुरुषेण प्रागनिर्दिष्टस्यापिसम्बन्धस्य कथं व्यवहाराद् ग्रहः? अन्यथाव्युत्पन्नस्यापि प्रथमश्रवणेनैव ज्ञानपूर्वकार्थग्रहापत्तिर्दुर्निर्वार्या। अत्रैवं समाधिर्गद्यते यद्

6. भाषापरिच्छेदे शब्दखण्डे 418-419पृष्ठाङ्के

वस्तुतस्तु आधुनिक-सङ्केतेषु यथा कर्तृस्वातन्त्र्यं न तथा वैदिकपदपदार्थनिर्धारणे। तथाहि अभिनवसङ्केतस्थलेषु स्वेच्छया नवजातकादीनां डित्थडवित्थादि सङ्केतस्थापनम्। तथाहि वैदिकसंज्ञासंज्ञिसम्बन्धनिर्धारणे त्वव्युत्पन्नेन केनदिद् गोशब्दस्य कम्बुग्रीवादिमदर्थे शक्तिर्निर्धार्यत इति चेन्नेदं नेदमित्युच्चैर्निवारयन्तस्तं व्युत्पन्ना वृद्धा सास्नादिमत्त्वमेव गोत्वमिति प्रतिपादयन्ति। तेन न चेयं विचिकित्सा चिकीर्षा कस्यचिद् यद्वैदिकपदपदार्थसम्बन्धग्रहे न व्युत्पन्ना व्युत्पन्नान्यतरस्वातन्त्र्यम्। स्वतन्त्रः कर्ता। क्रियायां यस्य स्वातन्त्र्यं स एव कर्ता, येन स्वातन्त्र्यवन्तस्ते न कर्तारः। तेन व्युत्पन्ना अपि वैदिकपदपदार्थसमम्बन्धस्य न कारका, अपि तु ज्ञापका वक्तारो वा। कर्ता चार्थापत्त्यानुमेय इति चेन्न वृद्धव्यवहारेणैव प्रवृत्तिसाफल्यात्। तथाहि सूत्रकृता - **औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानं, तुशब्दः पक्षं व्यावर्तयति। अपौरुषेयः शब्देनार्थस्य सम्बन्धः।**[7]तस्य शब्दार्थसम्बन्धस्य ज्ञानं हि उपदेशो नाम व्युत्पन्न वृद्धसङ्केतनिर्देशपर्यायो व। ननु कुतस्त्यो व्युत्पन्नवृद्धानां शक्तिग्रहः ? अत्रोच्यते पूर्वेभ्यो व्युत्पन्नवृद्धेभ्य इति व्युत्पन्नवृद्धपरम्परात्र ध्येया। अस्याश्च परम्परायाः आदिनिर्देशाभावात् अनादित्वाद् वैदिकसंज्ञासंज्ञिसम्बन्धोऽपि

[7]. मीमांसासूत्रम् – 1.1.5

अनादिरेव। किञ्च, अर्थापत्त्याप्रमितः शब्दार्थसम्बन्धकर्तेति चेत्तदपि स्तनन्धयबालमतमिव निर्युक्तिकं हासास्पदञ्च।यत्र न सङ्केतकर्तुः प्रत्यक्षग्राह्यत्वं कथं तस्यार्थापत्त्या प्रमेयत्वम्। अतो व्युत्पन्नाव्युत्पन्नान्यतराः सिद्धसम्बन्धान् एव व्यवहरन्ति, नासिद्धान् अतोऽसिद्धसिद्धये सम्बन्धकर्ता कश्चित् उररीकार्य इति पूर्वपक्षिणां विषम उपन्यास एव, व्यवहारेण व्युत्पन्नवृद्धसङ्केतनिर्देशेन च तदुपपत्तेः। अतः संज्ञासंज्ञिसम्बन्धो न सापेक्षः कृतकः कल्पितो वा, अपि तु निरपेक्षोऽनादिरनित्यः।

ननु शब्दार्थसम्बन्धनित्यत्वे अव्युत्पन्नानामपि प्रथमश्रवणेनैवार्थबोधापत्तिरिति चेदत्रोच्यते मीमांसकैः यच्छाब्दबोधे पदपदार्थसम्बन्धधीः सहकारिणी। तथाहि घोरान्धकारे वर्तमानो घटो यथा न चक्षुरिन्द्रियेण प्रत्यक्षतया गृह्यते। परं प्रदीपे आनीतमात्रे एव तदुपलक्ष्यते, तथैव शब्दे अर्थे शब्दार्थसम्बन्धे, न सहकारिणा सम्बन्धज्ञानेन विनाव्युत्पन्नानां शाब्दबोधः पदपदार्थबोधो वा। तेन संज्ञासंज्ञिसम्बन्धस्य नित्यत्वात् प्रतिनियतत्वेऽपि न तज्ज्ञानस्य नित्यत्वं प्रतिनियतत्वञ्च।किन्तु व्युत्पन्ननियतत्वमेव। अत इतरेतरात्यन्तभिन्नयोरपि पृथग्व्यपदिष्टयोरपि शब्दार्थयोः सम्बन्धोऽनादिरनित्यःअकृतकः अकल्पित एव।

वस्तुतस्तु शब्दार्थसम्बन्धस्य नित्यत्वमन्येनापि प्रकारेण मीमांसामीमांसाधुरीणैः कैश्चित्प्रतिपाद्यते। तथाहि शब्दार्थयोर्यः सम्बन्धः न स संयोगः, न समवायः, न कार्यकारणलक्षणः। तथाहि श्लोकवार्तिके व्याहृतम् ---

**वाच्यवाचकसम्बन्धनिषेधे लोकबाधनम्।**

**विरोधश्च स्ववाक्येन न हि सम्बन्धवर्जितैः।।**[8] इति।

अपि वाच्यवाचकभावरूपः प्रत्याय्यप्रत्यायकभावात्मको वेति। तत्रान्वयव्यतिरेकेण यथा शब्दश्रवणेनार्थप्रतीतिः, अश्रवणे नेति शब्दार्थयोर्वाच्यवाचकभावसम्बन्ध एव सर्वजनग्राह्यत्वेनोररी कृतः।

**विमर्शः ---**

इत्थं सामासिकीं भाष्यभणितिततिं मथित्वा मन्यामहे यच्छब्दार्थसम्बन्धयोर्नित्यत्वमेव युक्तिसिद्धम्। न चात्र कर्तृत्वलेशोऽपि सह्यः, मानाभावात्। तथा च नात्र प्रत्यक्षं ग्राह्यम्, अनुभवविरोधात्। नाप्यनुमानम्, व्याप्तिग्रहणासम्भवात्। नापि स्मृतिरत्र प्रमाणमिति वाच्यम्, लोके तथादर्शनात्। परमत्रेदं लक्ष्यं यल्लोके निर्दिष्टो हि शब्दो निर्दिष्टमर्थं प्रकाशयति, न च यस्मात् कस्मादपि यस्य

---

8. श्लोकवार्तिके सम्बन्धाक्षेपे 236पृष्ठाङ्के

कस्यचिदर्थस्य बोधो भवति। तस्माद्धि वक्तुं शक्यते यदेकसम्बन्धिज्ञानमपरसम्बन्धिनं स्मारयतीति न्यायानुगुणं सम्बद्धो हि शब्दः सम्बद्धमर्थं प्रतिपादयति, न त्वसम्बद्धम्। स च सम्बन्धो वाच्यवाचकभावरूपो नित्य एव, संयोगादीनामसम्भवादिति मे मतिरिति मीमांसामतं चतुरस्रम्। यदनुमानं पुनः पूर्वपक्षिभिरुपस्थापितं संज्ञासंज्ञिसम्बन्धः पुरुषकृतः पुरुषाधीनत्वात् रज्जुघटसंयोगवत् इति नायं न्यायः, किन्तु नरशिरःकपालं शुचि प्राण्यङ्गत्वात् शङ्खादिवत् इतिवत् न्यायाभासः अयम् इति शम्।

# <u>सहायकग्रन्थाः</u>


1. वैयाकरणानामन्येषां च मतेन *शब्दस्वरूपतच्छक्तिविचारः*, कालिकाप्रसादशुक्लः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, 1979।

2. *मीमांसादर्शनम्*, भूतनाथसप्ततीर्थेनानूदितम्, संस्कृतुक्-डिपो, कलिकाता, 1416 वङ्गाब्दे।

3. *मीमांसाश्लोकवार्तिकम्*, साम्बशास्त्रिसंशोधितम्, अनन्तशयनसंस्कृतग्रन्थावली, वाराणसी, 1990।

4. *श्लोकवार्तिकम्*, गङ्गानाथझासम्पादितम्, इण्डोलजिकाल् एण्ड ओरियेण्टाल् पाब्लिशार्स, दिल्ली, 1989।

5. *शाबरभाष्यम्*, गङ्गानाथझासम्पादितम्, ओरियेण्टाल् इन्स्टिट्युट्, बरोदा, 1990।

6. *शास्त्रदीपिका*, गजाननशास्त्रिमहोदयानूदिता, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, 2008।


------------------